
ओ३म्

वर्णोच्चारणशिक्षा

(उणादिसूत्रपाठसहिता)



व्याख्याकारः
आचार्यप्रद्युम्नः

ओ३म्

वर्णोच्चारणशिक्षा

(उणादिसूत्रपाठसहिता)

व्याख्याकारः

आचार्यप्रद्युम्नः

आर्ष गुरुकुल खानपुर

पत्रालय-मण्ढ़ाणा, तहसील-नारनौल,

जिला- महेन्द्रगढ़, (हरियाणा)

पिन-123001, दूरभाषाङ्कः 8954890130

प्रकाशक	**आर्ष गुरुकुल खानपुर** **पत्रालय-मण्ढ़ाणा, तहसील-नारनौल,** **जिला- महेन्द्रगढ़, (हरियाणा)** **पिन-123001, दूरभाषाङ्कः 8954890130**
आईएसबीएन	978-81-957013-1-5
ई-मेल	divyayoga@rediffmail.com
वेबसाइट	www.divyayoga.com
दूरभाष	**(01334) 244107, 240008, 246737**
फैक्स	**(01334) 244805**
मूल्य	**251/-**
सर्वाधिकार	© **प्रकाशकाधीन**
प्राप्ति-स्थल	1. आर्ष गुरुकुल खानपुर, पत्रालय- मण्ढ़ाणा, तहसील- नारनौल, जिला- महेन्द्रगढ़, (हरियाणा) पिन- **123001**, दूरभाषाङ्क : **8954890130** 2. पतञ्जलि योगपीठ हरिद्वार, उत्तराखण्ड 3. विश्ववारा कन्या गुरुकुल रुड़की जिला- रोहतक (हरियाणा) दूरभाषाङ्क : **9416197366** 4. कन्या गुरुकुल चोटीपुरा जिला- अमरोहा (उत्तरप्रदेश)
संस्करण	प्रथम
मुद्रक:	: ....

ॐ सच्चिदानन्दात्मने नमः

प्राक्कथनम्

'वर्णोच्चारणशिक्षा' इत्याख्यस्य ग्रन्थस्य व्याख्यानकरणेऽहमेतदर्थं प्रवृत्तो यत् सरलतयाऽध्येतारः सूत्राणामर्थं सम्यग्रूपेण बुध्येरन्। शिक्षाशास्त्रस्य गम्भीराध्येतॄणां कृते तु शिक्षाविषये प्रामाणिकानां महाविदुषाम् उदयनाचार्याणां रामलालकपूरट्रस्टतः प्रकाशितं 'शिक्षाशास्त्रम्' इति ग्रन्थरत्नं प्रकाशतेतमाम्। परं प्रारम्भिकाणां छात्राणां कृते सूत्रार्थप्रधानस्य वृत्तिग्रन्थस्यावश्यकता मयानुभूता, तदर्थमहमस्मिन् कर्मणि प्रवृत्तः। व्याकरणरीत्यात्र सर्वोऽपि विचारः प्रस्तुतः। सूत्रपाठस्त्वस्माभिः 'शिक्षाशास्त्रम्' इति ग्रन्थनिर्दिष्ट एव गृहीतः। यमविषयेऽपेक्षितं व्याख्यानं किञ्चिद् विस्तरेण प्रदत्तम्। 'सस्थानेन द्वितीयाः' 'हकारेण चतुर्थाः' इति सूत्रयोरर्थः सृक्कणीशब्दश्चात्र स्पष्टतयावगन्तुं शक्यते।

मम जीवनस्य परिष्कारे पतञ्जलियोगपीठात् प्राप्तं महान्तं सहयोगं कदापि विस्मर्तुं नार्हामि। श्रीस्वामिमहाभागैः श्रीआचार्यदेवैर्मम योगक्षेमं निप्रत्यूहं साध्यते, तत्कृते तेभ्यो बहुशो धन्यवादान् वितनोमि।

विद्वद्वरेण्यानां डा. विजयपालशास्त्रिमहाभागानामथ च मम सुहृदामुदयनाचार्याणां कृते भूरिशो धन्यवादान् प्रयच्छामि, येषां साहाय्येन ह्येतत् कठिनमपि कार्यं सरलमभूदिति। मम आत्मजकल्पाभिः सुरभि-स्वाति-करुणादिभिरस्मिन् कर्मणि कश्चिद् महान् सहयोगः प्रादायीति तासां कृते महतीं सद्भावनां विनिवेदयामि।

अस्मिन् संस्करणे पाणिनीयशिक्षासूत्राणां मूलपाठः प्रारम्भे मुद्रितः, येन छात्राणां स्मरणं पारायणञ्च कर्त्तुं सौविध्यं स्यात्। एतदर्थमेव चोणादिसूत्रपाठोऽपि पुस्तकान्ते संगृहीतः।

आचार्यप्रद्युम्नः

ओ३म्

निगम - नीडम्

(वेदगुरुकुलम्)

NIGAMA-NEEDAM

(VEDAGURUKULAM)


महर्षि दयानन्द सरस्वती

Registration No. 130/2004

ग्राम&पत्रालय- पिडिचेड, मण्डल- गज्वेल, जिला- सिद्धिपेट (तेलंगाणा) ५०२२७८

Vill.& Post-Pidiched, Mdl-Gajwel, Dist-Siddhipet (Telangana) 502278

संस्थापक, अध्यक्ष- उदयनाचार्य, फोन : 09440721958, 9949810975

प्रस्तावः

शब्ददर्शनम्- ‘श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः’ (म.भा. अइउण्)। यो वक्त्रा प्रयुज्यमानः प्रकटितो भवति, उच्चारितो भवति, आकाशं च व्याप्नोति[1], श्रोतुः श्रोत्रेन्द्रियेण यो गृह्यते, स शब्दः। अयञ्च विषयोऽत्रावधेयोऽस्ति यद्- बाह्येन्द्रियविषयेषु शब्दो वाचः श्रोत्रस्य चैव विषयः, न तु चक्षुषः। वाक्छ्रोत्रविषयकः शब्दो मुख्यः। लिपिभूतानां (लिखितानां) वर्णानां शब्दानां च चक्षुर्विषयत्वात् तत्र न साक्षाच्छब्दत्वम्। तेषां दर्शनेन मुख्यः शब्दः स्मर्यते, तेनार्थो ज्ञायते। एवं मुख्यशब्दस्मरणपूर्वकं लिपिभूतानां चक्षुर्विषयाणां वर्णसमुदायानां शब्दत्वं व्यवह्रियते। तच्च शब्दत्वं गौणभूतम्। अत एव शब्दलक्षणे ‘चक्षुर्ग्राह्यः शब्दः’ इति नोक्तम्। शिक्षाग्रन्थे चास्मिन् वाचः श्रोत्रस्य बुद्धेश्च विषयभूतस्य शब्दस्य उत्पत्त्यादिकं समग्रं विज्ञानं महर्षिपाणिनिना प्रतिपादितम्।

महर्षिपाणिनिना विरचितः सूत्रात्मकः शिक्षाग्रन्थो द्विविध उपलभ्यते- १.लघुपाठः २.वृद्धपाठश्चेति। तत्र तावद् लघुपाठस्य व्याख्यानम् इदम्प्रथमतया महर्षिदयानन्दसरस्वतीभिः कृतम्। ते स्वामिनः १९३६ तमे वैक्रमाब्दे (१८७९ तमे क्रैस्ताब्दे) महता प्रयत्नेन कस्यचित् प्रयागवास्तव्यस्य ब्राह्मणस्य गृहात् सूत्रात्मक- पाणिनीयशिक्षाया जीर्णभूतं हस्तलेखं सम्प्राप्य तस्यादौ महाभाष्यस्य कानिचन वाक्यानि संगृह्य सरलार्थभाषया तं लघुपाठं **‘वर्णोच्चारणशिक्षा’** इति

---

१. ‘कशा वाङ्नाम’ (नि. १.११.४३)। कशा.....वाक् पुनः प्रकाशयत्यर्थान् खशया (वा) (निरु.९.१९)। अर्थानां प्रकाशकत्वात्, खे मुखाकाशे उत्पन्नत्वात्, बाह्याकाशे च व्याप्तिमत्त्वाद् वाचो नाम कशा।

नाम्ना व्याचख्युः। **म.म.पं. श्रीयुधिष्ठिरमीमांसकानां** गरीयसा प्रयत्नेन पाणिनीयशिक्षाया वृद्धपाठस्य (मूलसूत्रपाठस्य) प्रकाशनं प्रथमवारं १९५३ तमे क्रैस्ताब्दे सञ्जातम्। तस्यैव व्याख्यानं **'शिक्षातत्त्वालोकभाष्यम्'** इति नाम्ना मया (उदयनाचार्येण) २००८ इति क्रैस्ताब्दे कृतमासीत्। परन्तु शास्त्रीयदृष्ट्या विवेचनेन शिक्षाशास्त्रस्य समेषां गम्भीरतमविषयाणां विदुषामाचार्याणां शोधार्थिनां च कृते व्याख्यानेऽस्मिन् महोपकारके सञ्जातेऽपि कोमलमस्तिष्कानाम् आरम्भिकाणां विद्यार्थिनां कृते व्याख्यानमिदं शिक्षामधिगन्तुं नोपयुज्यत इत्यनुभूय २०१२ इति क्रैस्ताब्दे **'पाणिनीयशिक्षा'** इति नाम्ना वृद्धपाठस्यैव 'शिक्षाभावप्रकाशः' इति व्याख्या मया रचिता। व्याख्यानेऽस्मिन् शास्त्रीयविवेचनादिकं विहाय संस्कृतेन हिन्दीभाषया च केवलं सूत्रार्थ एव प्रदर्शितः।

विद्वज्जगति आर्यजगति च सुप्रसिद्धैर्महावैयाकरणैर्वेदवेदाङ्गोपाङ्गादि-विविधशास्त्रेषु कृतभूरिपरिश्रमैराध्यात्मिकविद्यया शान्तमनोभिः सुदीर्घकालेन अध्ययनाध्यापने संलग्नैस्तपःपूतैराचार्यवर्यैः **श्रीप्रद्युम्नमहाभागैः** साम्प्रतं प्रस्तूयमानमिदं संस्कृतव्याख्यानं पाणिनीयशिक्षाया वृद्धपाठस्य महर्षिदयानन्दशैल्या **'वर्णोच्चारणशिक्षा'** इति नाम्नैव विहितमस्ति। व्याख्यानमेतद् अत्यन्तसरलया मधुरया च देवभाषया विरचितत्वात् पिपठिषूणां बालानां सुखबोधायाध्यापकानाञ्च सौकर्याय भविष्यतीत्याशासे। आचार्यप्रवराणामनेन व्याख्यानेन गुरुकुलपरम्परायां शिक्षाविषयाः सुप्रतिष्ठिता भवन्तीति मन्ये। अन्ते च सुश्रुतं स्मरामि-

वाक्सौष्ठवेऽर्थविज्ञाने प्रागल्भ्ये कर्मनैपुणे।
तदभ्यासे च सिद्धौ च यतेताध्ययनान्तगः।। (सु.सं ३.५६)

वेदादिशास्त्रीयाध्ययनान्तकामो वाक्पटुतायै अर्थविज्ञानाय ज्ञानवृद्ध्यै आर्त्विज्यकर्मकुशलतायै कर्माभ्यासायारब्धस्य कर्मणः संसिद्ध्यै चेमं शिक्षाग्रन्थमध्येतुमवश्यमेव यत्नं विदध्यात्।

ऋष्यनुचरः

आचार्य उदयनो मीमांसकः

विषय-सूची

अथ पाणिनीया शिक्षा

(वृद्धपाठः)

१. आकाशवायुप्रभवः शरीरात् समुच्चरन् वक्त्रमुपैति नादः।
स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः।।

२. तमक्षरं ब्रह्म परं पवित्रं गुहाशयं सम्युगशन्ति विप्राः।
स श्रयेसा चाभ्युदयेन चैव सम्यक् प्रयुक्तः पुरुषं युनक्ति।।

३. स्थानमिदं करणमिदं प्रयत्न एष द्विधाऽनिलः।
स्थानं पीडयति वृत्तिकारः प्रक्रम एषोऽथ नाभितलात्।।

४. स्थानकरणप्रयत्नपरेभ्यो वर्णास्त्रिषष्टिः।

५. चतुःषष्टिरित्येके।

६. तत्र वर्णानां केषां किं स्थानं किं करणं प्रयत्नश्च (कः),
ते द्विधा विभजते।

१. अथ प्रथमं स्थानप्रकरणम्

१. तत्र स्थानं तावत्।

२. अकुहविसर्जनीयाः कण्ठ्याः।

३. हविसर्जनीयावुरस्यावेकेषाम्।

४. जिह्वामूलीयो जिह्व्यः।

५. कवर्गावर्णानुस्वारजिह्वामूलीया जिह्व्या एकेषाम्।

६. सर्वमुखस्थानमवर्णमित्येके।

७. कण्ठ्यानास्यमात्रानित्येके।

८. इचुयशास्तालाव्याः।

९. ऋटुरषा मूर्धन्याः।

१०. रेफो दन्तमूलीय एकेषाम्।

११. दन्तमूलस्तु तवर्गः।

१२. लृतुलसा दन्त्याः।

१३. वकारो दन्तोष्ठ्यः।

१४. सृक्किणी स्थानमेकेषाम्।

१५. उपूपध्मानीया ओष्ठ्याः।

१६. अनुस्वारयमा नासिक्याः

१७. कण्ठनासिक्यमनुस्वारमेके।

१८. यमाश्च नासिक्यजिह्वामूलीया एकेषाम्।

१९. ए ऐ कण्ठतालव्यौ।

२०. ओ औ कण्ठोष्ठ्यौ।

२१. ङञणनमाः स्वस्थाननासिकास्थानाः।

२२. द्विवर्णानि सन्ध्यक्षराणि।

२३. सरेफ ॠवर्णः।

२४. [इति] संयुक्ताः वर्णाः।

२५. एवमेतानि स्थानानि।

२. अथ द्वितीयं करणप्रकरणम्

१. करणमपि।

२. जिह्व्यतालव्यमूर्धन्यदन्त्यानां जिह्वा करणम्।

३. जिह्वामूलेन जिह्व्यानाम्।

४. जिह्वामध्येन तालव्यानाम्।

५. जिह्वोपाग्रेण मूर्धन्यानाम्।

६. जिह्वाग्राधः करणं वा।

७. जिह्वाग्रेण दन्त्यानाम्।

८. शेषाः स्वस्थानकरणाः।

९. इत्येतत् करणम्।

३. अथ तृतीयम् अन्तःप्रयत्नप्रकरणम्

१. प्रयत्नो द्विविधः।

२. आभ्यन्तरो बाह्यश्च।

३. स्वस्थान आभ्यन्तरस्तावत्।

४. स्पृष्टकरणाः स्पर्शाः।

५. ईषत्स्पृष्टकरणा अन्तस्थाः।

६. ईषद्विवृतकरणा ऊष्माणः।

७. विवृतकरणा वा।

८. विवृतकरणाः स्वराः।

९. तेभ्य ए ओ विवृततरौ।

१०. ताभ्यामै औ।

२१. ताभ्यामप्याकारः।

२२. संवृतस्त्वकारः।

२३. इत्येषोऽन्तः प्रयत्नः।

४. अथ चतुर्थं बाह्ययत्नप्रकरणम्

१. अथ बाह्याः प्रयत्नाः।

२. वर्गाणां प्रथमद्वितीयाः शषसविसर्जनीयजिह्वामूलीयोपध्मानीया यमौ च प्रथम द्वितीयौ विवृतकण्ठाःश्वासानुप्रदाना अघोषाः।

३. वर्ग्ययमानां प्रथमा अल्पप्राणा इतरे सर्वे महाप्राणाः।

४. वर्गाणां तृतीयचतुर्था अन्तस्था हकारानुस्वारौ यमौ च तृतीयचतुर्थौ नासिक्यश्च संवृतकण्ठा नादानुप्रदाना घोषवन्तश्च।

५. वर्ग्ययमानां तृतीया अन्तस्थाश्चाल्पप्राणा इतरे सर्वे महाप्राणाः।

६. यथा तृतीयास्तथा पञ्चमाः।

७. आनुनासिक्यमेषामधिको गुणः।

८. कादयो मावसानाः स्पर्शाः।

९. यादयोऽन्तस्थाः।

१०. शादय ऊष्माणः।

११. सस्थानेन द्वितीयाः।

१२. हकारेण चतुर्थाः।

१३. इत्येष बाह्यः प्रयत्नः।

५. अथ पञ्चमं स्थानप्रपीडनप्रकरणम्

१. तत्र स्पर्शयमवर्णकारो वायुरयःपिण्डवत् स्थानमभिपीडयति।

२. अन्तस्थवर्णकारो वायुर्दारुपिण्डवत्।

३. ऊष्मस्वरवर्णकारो वायुरूर्णापिण्डवत्।

६. अथ षष्ठं वृत्तिकारप्रकरणम्

१. एवं व्याख्याने वृत्तिकाराः पठन्ति-अष्टादशप्रभेदमवर्णकुलमिति। तत्कथमुक्तम्।

२. ह्रस्वदीर्घप्लुत्वाच्च त्रैस्वर्योपनयेन च।
आनुनासिक्यभेदाच्च संख्यातोऽष्टादशात्मकः।। इति ।।

३. एवमिवर्णादयः।

४. लृवर्णस्य दीर्घा न सन्ति।

५. तं द्वादशप्रभेदमाचक्षते।

६. यदृच्छाशब्देऽशक्तिजानुकरणे वा यदा दीर्घाः स्युस्तदाष्टादशप्रभेदं ब्रुवते क्लृपक इति।

७. सन्ध्यक्षराणां ह्रस्वा न सन्ति।

८. तान्यपि द्वादशप्रभेदानि।

९. छन्दोगानां सात्यमुग्रिराणायनीया अर्धमेकारमर्धमोकारं [च] पठन्ति।

१०. तेषामप्यष्टादशप्रभेदानि।

११. अन्तस्था द्विप्रभेदा रेफवर्जिताः सानुनासिका निरनुनासिकाश्च।

१२. रेफोष्मणां सवर्णा न सन्ति।

१३. वर्ग्यो वर्ग्येण सवर्णः।

७. अथ सप्तमं क्रमप्रकरणम्

१. एष क्रमो वर्णानाम् ।

[तथैते कौशिकायाः श्लोकाः--

सर्वान्तेऽयोगवाहत्वाद् विसर्गादिरिहाष्टकः।
अकार उच्चारणार्थो व्यञ्जनेष्वनुबध्यते।।१।।

≍क≍ पयोः कपकारौ च तद्वर्गीयाश्रयत्वतः।
पलिक्क्ँनी चक्ख्ँनतुर्जिग्ग्ँमर्जग्घ्नुँरित्यत्र यद्वपुः।।२।।

नासिक्येनोक्तं कादीनां त इमे यमाः।
तेषामुकारः सस्थानवर्गीयलक्षकः।।३।।

२. तत्रैषां स्थानकरणप्रयत्नानां कथं प्रसिद्धिरित्युच्यते।

३. इह यत्र स्थाने वर्णा उपलभ्यन्ते तत् स्थानम्।

४. येन निर्वृत्यन्ते तत् करणम्।

५. प्रयतनं प्रयत्नः।

६. उत्साहः प्रयत्नः।

७. स्पृष्टतादिर्वर्णगुणः।

८. अथाष्टमं नाभितलप्रकरणम्

१. तत्र नाभिप्रदेशात् प्रयत्नप्रेरितः प्राणो नाम वायुरूर्ध्वमाक्रामन्नुरआदीनां स्थानानामन्यतमस्मिन् स्थाने प्रयत्नेन विधार्यते। विधार्यमाणः सोऽपि तत्स्थानानि विहन्ति। तस्मात् स्थानाभिघाताद् ध्वनिरुपद्यत आकाशे, सा वर्णश्रुतिः। स वर्णस्यात्मलाभः।

२. तत्र वर्णानामुत्पद्यमाने यदा स्थानकरणप्रयत्नपर्यन्तं परस्परं स्पृशति सा स्पृष्टता।

३. यदेषत् स्पृशति सा ईषत्स्पृष्टता।

४. यदा दूरेण स्पृशति सा विवृतता।

५. यदा सामीप्येन स्पृशति सा संवृतता।

६. एषोऽन्तः प्रयत्नः।

७. अथ बाह्यः प्रयत्नः।

८. स एवेदानीं प्राणो नाम वायुरूर्ध्वमाक्रम्य मूर्ध्नि प्रतिहते निवृत्तो भवति, तदा कण्ठे संहन्यमाने गलबिलस्य संवृतत्वात् संवारो नाम वर्णधर्मो जायते, विवृतत्वाद् विवारः।

९. तौ संवारविवारौ।

१०. तत्र यदा कण्ठबिलं संवृतं तदा नादो जायते।

११. विवृते तु कण्ठबिले श्वासोऽनुजायते।

१२. तौ श्वासनादावनुप्रदानावित्याचक्षते।

१३. अन्ये श्वासनादानुप्रदानं व्यञ्जने नादवत्।

१४. तत्र यदा स्थानाभिघातजध्वनौ नादोऽनुप्रदीयते तदा नादध्वनिसंसर्गाद् घोषो जायते।

१५. यदा श्वासोऽनुप्रदीयते तदा श्वासध्वनिसंसर्गाद् अघोषो जायते।

१६. सा घोषवदघोषता।

१७. महति वायौ महाप्राणः।

१८. अल्पे वायावल्पप्राणः।

१९. साल्पप्राणमहाप्राणता।

२०. [यत्र] महाप्राणत्वम् ऊष्माणस्ते।

२१. तत्र यदा सर्वाङ्गानुसारी प्रयत्नस्तीव्रो भवति, तदा गात्राणां निग्रहः, कण्ठबिलस्य चाल्पत्वं स्वरस्य च वायोस्तीव्रगतित्वाद् रौक्ष्यं भवति। तमुदात्तमाचक्षते।

२२. यदा मन्दः प्रयत्नो भवति तदा गात्राणां प्रसन्नत्वम्, कण्ठबिलस्य च महत्त्वम्, स्वरस्य च वायोर्मन्दगतित्वात् स्निग्धता भवति। तमनुदात्तम् आचक्षते।

२३. उदात्तानुदात्तसन्निकर्षात् स्वरित इति।

२४. स एवं प्रयत्नोऽभिनिर्वृतः कृत्स्नः प्रयत्नो भवति।

२५. स एवमापिशलेः पंचदशभेदाख्या वर्णधर्मा भवन्ति।

२६. तद्यथा- स्पृष्टता ईषत्स्पृष्टता विवृतता संवृतता च।
संवारविवारौ श्वासनादौ घोषवदघोषता।
अल्पप्राणमहाप्राणता उदात्तानुदात्तस्वरिताः ।। इति।।

२७. इदानीं शिक्षाग्रन्थः श्लोकैरुपसंह्रियते-

२८. अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च।।

२९. स्पृष्टत्वमीषत्स्पृष्टत्वं संवृतत्वं तथैव च।
विवृतत्वं च वर्णानामन्तः करणमुच्यते।।

३०. कालो विवारसंवारौ श्वासनादावघोषता।
घोषोऽल्पप्राणता चैव महाप्राणः स्वरास्त्रयः।।

३१. बाह्यं करणमाहुस्तान् वर्णानां वर्णवेदिनः।।

।। इति पाणिनीया शिक्षा ।।

अथ वर्णोच्चारण-शिक्षा

प्रश्नः - वर्णो वाक्षरं वा किमुच्यते?

उत्तरम् - अक्षरं न क्षरं विद्यादश्नोतेर्वा सरोऽक्षरम्।
वर्णं वाहुः पूर्वसूत्रे किमर्थमुपदिश्यते।। (म.भा. द्वितीयाह्निकान्ते)

अक्षरं न क्षरमनश्वरं विद्याज्जानीयात्। न क्षरति क्षीयते वा तदक्षरम्। अथवा अशूङ्धातोरौणादिके सरन्-प्रत्यये कृते अक्षरशब्दः सिध्यति[१]। अश्नुते व्याप्नोतीत्यक्षरम्। अथवा पूर्वसूत्रे[२] पाणिनितः प्राक्तने व्याकरणान्तरे शिक्षासूत्रे वा 'वर्णा अक्षराणि' इति वचनाद् वर्णस्याक्षरमिति संज्ञा क्रियते, रूढिरियं वर्णस्येत्यर्थः। अथ किमर्थमुपदेशः क्रियते? अक्षरसमाम्नायोपदेशः किमर्थ इत्यर्थः। अस्योत्तरं दीयते- **वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म वर्तते। तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते।।**

सोऽयमक्षरसमाम्नायो वाक्समाम्नायः पुष्पितः फलितश्चन्द्रतारकवत् प्रतिमण्डितो वेदितव्यो ब्रह्मराशिः। सर्ववेदपुण्यफलावाप्तिश्चास्य ज्ञाने भवति, मातापितरौ चास्य स्वर्गे लोके महीयेते।

वर्णा येन शास्त्रेण ज्ञायन्ते तच्छास्त्रं वाचो विषयः=बन्धनम्[३], प्रतिपादकमित्यर्थः। वर्णज्ञानं=शास्त्रं, वाचो विषयः=आश्रय इत्यर्थः। अथवा वर्णानां ज्ञानं (भावे ल्युट्) वाग्विषयः। वर्णानां ज्ञानमेव वाग्विषयत्वेन (भाषारूपेण) फलितं भवति। कारणकार्ययोरभेदोऽत्रार्थे प्रतिपादितो भवति। तथैवाऽक्षरसमाम्नायो वाक्समाम्नाय इत्यत्रापि कारणकार्ययोरभेदो द्रष्टव्यः।

---

१. अशूङ्+सरन् इति इत्संज्ञायां लोपे सति अश्+सर 'व्रश्चभ्रस्जसृज०' इति शकारस्य षकारे कृते अष्+सर 'षढोः क सि' इति ककारे अक्+सर 'इण्कोः', 'आदेशप्रत्यययोः' इति सकारस्य मूर्धन्ये अक्+षर स्वाद्युत्पत्तौ सोरमि 'अक्षरम्' इति शब्द सिध्यति। (केचित्तु 'अशू व्याप्तौ संघाते च' इति ङकारानुबन्धरहितमेव धातुमङ्गीकुर्वते)।

२. प्राक्तनानां पूर्वेषाम् (आचार्याणाम्) सूत्रे , षष्ठीतत्पुरुषः।

३. विपूर्वकात् 'षिञ् बन्धने' इति धातोः रूपम्।

का सा वाक्? यत्र च ब्रह्म वर्तते। यत्र=वाचि=पदे ब्रह्म=वेदो वर्तते चकारादन्यत् काव्यादिकं वर्तते, तस्य पदजातस्य च शास्त्रं (चतुर्दशसूत्र्यात्मकं तन्मूलकं पाणिनीयव्याकरणञ्च) विषयः, लौकिकानां वैदिकानां च पदानां (शब्दानाम्) शास्त्रं विषयः=आश्रय इत्यर्थः। तदर्थम्= शास्त्रप्रवृत्त्यर्थम्। इष्टबुद्ध्यर्थम्=कलादिदोषरहितशुद्धवर्ण-ज्ञानार्थम्[१] लघ्वर्थम्= अनुबन्धकरणमूलकप्रत्याहारद्वारा लाघवेन शास्त्रप्रवृत्त्यर्थम्। 'लघ्वर्थञ्च' इत्यत्र चकारेणानुबन्धकरणार्थत्वं समुच्चीयत इति कृत्वा कैय्यटेन लघ्वर्थमित्यस्यानुबन्धकरणार्थमिति व्याख्यानं कृतम्।

सोऽयमक्षरसमाम्नायो वाक्समाम्नायः=वाक्संग्रहोपायः, एतावद्भिरेव वर्णै- र्वाग्व्यवहारः क्रियत इत्यर्थः। दृष्टफलेनाभ्युदयेन वा पुष्पितः चन्द्रतारकवत् अनादित्वान्नित्योऽयं वाग्व्यवहारो ब्रह्मराशिः=ब्रह्मतत्त्वमेव शब्दरूपतया प्रतिभातीत्यर्थः। **उक्तं हि-** 'अकारः सर्ववर्णाग्र्यः प्रकाशः परमेश्वरः'। सर्ववेदपुण्यफलावाप्तिः सर्ववेदाध्ययनजन्यस्य पुण्यफलस्य चित्तशुद्धिरूपस्य प्राप्तिरस्य=अक्षरसमाम्नायस्य ज्ञाने भवति। मातापितरौ चास्य=अध्येतुः स्वर्गे लोके महीयेते[२]=पूजां प्राप्नुतः। तादृशपुत्रवत्त्वेन मातापित्रोः: स्वर्गे पूजा भवति। माहात्म्यातिशयः शास्त्रस्य प्रत्याहारमात्रफलाख्यानद्वारेण ख्याप्यते।

प्रश्नः - वर्णाः कथं प्रकटिता भवन्ति?

उत्तरम् - आकाशवायुप्रभवः शरीरात् समुच्चरन् वक्त्रमुपैति नादः।
स्थानान्तरेषु प्रविभज्यमानो वर्णत्वमागच्छति यः स शब्दः।।

आकाशश्च[३] वायुश्च ताभ्यां प्रभव उत्पत्तिर्भवति यस्य तादृशो भवति नादः कत्वगत्वादिभेदरहितोऽव्यक्तध्वनिरूपः। स हि नादः शरीरात्= शरीरैकदेशा-न्नाभिदेशात् समुच्चरन्=ऊर्ध्वमागच्छन् वक्त्रम्=मुखम्

१. यद्यपीदं प्रयोजनं पस्पशान्ते दूषितम्।
२. महीयशब्दः कण्ड्वादियगन्तः।
३. नाभिप्रदेशे वायोः सञ्चरणार्थोऽवकाश एवात्राकाशशब्देन गृह्यते।

उपैति प्राप्नोति। पुनः स एव नादः कण्ठादिस्थानेषु विभागं प्राप्नुवन् वर्णभावं=वर्णरूपतामापद्यते, स 'शब्दः' इत्युच्यते। यद्यपि शब्दशब्देन पदमभिधीयते, परं पदस्यापि या प्रथमा व्यक्तिर्मूलमिति यावत् तदालोच्य 'शब्द' इत्युक्तम्।

आत्मा बुद्ध्या समर्थ्यार्थान्[१] **मनो युङ्क्ते विवक्षया।**
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।
मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम्।। (पा.शि.६,७)

जीवात्मा बुद्ध्यार्थान् समर्थ्य=अर्थानामन्वयं कृत्वा, अर्थानां सङ्गतिमापाद्य वक्तुमिच्छया मनो युङ्क्ते। विद्युत्स्वरूपं मनस्तु तत्क्षणमेव जठराग्निमाहन्ति, स चाग्निर्वायुं प्रेरयति। वायुश्च उरःप्रदेशे विचरन् मन्द्रं=मधुरं कोमलं स्वरं नादध्वनिं वा जनयति=स्वरमभिव्यञ्जयति प्रकटयतीति यावत्।

प्रश्नः - शब्दस्य किं स्वरूपम्? स च कानि फलानि प्रापयति?
उतरम् - तमक्षरं ब्रह्म परं पवित्रं गुहाशयं सम्यगुशान्ति विप्राः।
स श्रेयसा चाभ्युदयेन चैव सम्यक् प्रयुक्तः पुरुषं युनक्ति।।

तं पूर्वोक्तं शब्दम्, कीदृशम्? अक्षरमविनाशिनम्। पुनः कीदृशम्? ब्रह्म ब्रह्मरूपं वेदरूपं ज्ञानरूपं वा, ज्ञानरूपता च तस्य ज्ञानकारणत्वात्[२]। उक्तञ्च-

न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।। (वा.प., ब्र.का.)

पुनः कीदृशम्, परं पवित्रं ज्ञानरूपत्वात्। **न हि ज्ञानेन सदृशं पवित्रमिह विद्यते** इति वचनात्। गुहाशयम्=गुहायां शेते गुहाशयस्तं बुद्धिगुहायां

१. अद्यत्वे 'समर्थ्य' इत्यस्य स्थाने 'समेत्य' इति श्रूयते, 'मन्द्रम्' इत्यस्य स्थाने च 'मन्दम्'। परं प्राचीनपाठस्तु 'समर्थ्य' 'मन्द्रम्' इत्येव दृश्यते।
२. कारणकार्ययोर्हि अभेदोपचारो दृश्यते, जलं जीवनमितिवत्।

विद्यमानम्। तमेतादृशं शब्दं विप्राः सम्यग् उशन्ति कामयन्ते ज्ञातुमिच्छन्ति। स हि सम्यक् प्रयुक्तः शब्दोऽभ्युदयेन= लौकिकसुखजातेन श्रेयसा=पारलौकिकसुखेन च पुरुषं युनक्ति योजयति। अतो वर्णोच्चारणस्य श्रेष्ठया शिक्षया शब्दविज्ञान आत्मानं सर्वे जनाः संयुञ्जन्तु। तथा चोक्तम्-

यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः।।

(मा.भा.पस्पशाह्निकम्)

अथ च- **एकः शब्दः सम्यग् ज्ञातः स्वर्गे लोके कामधुग् भवति।**

विदुरोऽप्याह- **अभ्यावहति कल्याणं विविधं वाक् सुभाषिता।**
स एव दुर्भाषिता राजन्ननर्थायोपपद्यते।। इति (विदुरनीतिः २.७७)

शब्दलक्षणम्

श्रोत्रोपलब्धिर्बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः। (म.भा. द्वितीयाह्निके 'अइउण्' इति सूत्रभाष्यान्ते)

भाष्ये 'अइउण्' इति सूत्रव्याख्यायामेतन्निर्दिश्यते यच्छ्रोत्र एवोपलब्धि- र्यस्येत्यर्थः। करणक्तिन्नन्तेन समानाधिकरणबहुव्रीहिर्वा श्रोत्रमुपलब्धिसाधनं यस्य। बुद्ध्या निर्ग्राह्यः पूर्व-पूर्वध्वन्युत्पादिताभिव्यक्तिजनितसंस्कारपरम्परा- प्राप्तपरिपाका[१]न्त्यवर्णबुद्धिनिर्ग्राह्यः। प्रयोगेण= उच्चारणेन अभिज्वलितः= प्रकाशितः। आकाशो देशः (स्थानम्) यस्य स आकाशदेशः। एतैर्विशेषणैर्युक्तो भवति शब्दः।

प्रश्नः- वर्णमालायां कति वर्णाः सन्ति?

उत्तरम्- त्रिषष्टिः। ते चाकारादिरूपेण विभक्ताः।

१. तत्सहकृतेत्यर्थः।

वर्णः

स्वरः (अच्)			व्यञ्जनम् (हल्)			अयोगवाहाः
ह्रस्वः	दीर्घः	प्लुतः	स्पर्शाः	अन्तः स्थाः	ऊष्माणः	ं अनुस्वारः
अ	आ	अ३/आ३	कुः (कवर्गः)	य	श	≍ : विसर्जनीयः
इ	ई	इ३/ई३	चुः (चवर्गः)	र	ष	≍ जिह्वामूलीयः
उ	ऊ	उ३/ऊ३	टुः (टवर्गः)	ल	स	उपध्मानीयः
ऋ	ॠ	ऋ३/ॠ३	तुः (तवर्गः)	व	ह	चत्वारो यमाः
ऌ	-	ऌ३/ॡ३	पुः (पवर्गः)			कुँ
	ए	ए३				खुँ
	ऐ	ऐ३				गुँ
	ओ	ओ३				घुँ
	औ	औ३				

पूर्वं वर्णानां विभागत्रयं क्रियते- स्वराः व्यञ्जनानि अयोगवाहाश्च। 'स्वराः' खलु 'अच्' इति नाम्नाप्यभिधीयन्ते। ते हि स्वरवर्णास्त्रिधा विभज्यन्ते- ह्रस्वदीर्घप्लुतभेदेन, एकमात्रिकः स्वरः किल ह्रस्वो भवति, द्विमात्रिको दीर्घः, त्रिमात्रिकश्चतुर्मात्रिको वा प्लुतः। प्लुतानां खलु लेखनप्रकारो द्विधा दृश्यते, स एवास्माभिः प्लुतस्वरूपनिर्देशपरे कोष्ठके प्रदर्शितः। व्यञ्जनानि च 'हल्' इति संज्ञयाप्युच्यन्ते। तेषामपि त्रयो विभागा भवन्ति- स्पर्शवर्णा अन्तःस्थवर्णा ऊष्मवर्णाश्चेति। तृतीयप्रकारोऽस्ति किला योगवाहः। अक्षरसमाम्नायेऽपठितत्वाद- नुस्वारादीनामन्वर्था

खल्वियं संज्ञास्ति। उक्तं हि 'हयवरट्' इति सूत्रभाष्ये- **इमेऽयोगवाहा न क्वचिदुपदिश्यन्ते, श्रूयन्ते च। तेषां कार्यार्थ उपदेशः कर्त्तव्यः। के पुनरयोगवाहाः? विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वार-नासिक्ययमाः। कथं पुनरयोगवाहाः? यदयुक्ता वहन्ति, अनुपदिष्टाश्च श्रूयन्ते।**

कात्यायनीये शुक्लयजुःप्रातिशाख्येऽयोगवाहा एवं व्याख्याताः- "अथायोगवाहाः।।८.८।।क इति जिह्वामूलीयः।।८.९।।प इत्युपध्मानीयः।।८.१०।। अं इत्यनुस्वारः।।८.११।। अः इति विसर्जनीयः।।८.१२।। हुँ इति नासिक्यः।।८.१३।। (अयं वर्ण ऋक्शाखायां प्रसिद्ध इत्युव्वटः, एवञ्चेमं वर्णं सम्मेल्य वर्णानां चतुःषष्टिः संख्या जायते) कुँ खुँ गुँ घुँ इति यमाः।।८.१४।।"

अयोगवाहविषये भाष्यकारीयं यदुद्धरणमुपरि प्रदत्तमस्ति, भट्टोजिदीक्षितकृते शब्दकौस्तुभनामके ग्रन्थे तस्य व्याख्यानमेवमुपलभ्यते-

अविद्यमानो योगः प्रत्याहारेषु सम्बन्धो येषां तेऽयोगाः, अनुपदिष्टत्वादुप- दिष्टैरगृहीतत्वाच्च प्रत्याहारसम्बन्धशून्या इत्यर्थः। वाहयन्ति निर्वाहयन्ति प्रयोगमिति वाहाः, अयोगाश्च ते वाहाश्चेति (नञ्बहुव्रीहिगर्भः कर्मधारयः)**। अनुपदिष्टत्व उपदिष्टैरगृहीतत्वे च सति श्रूयमाणा इत्यर्थः।** (श.कौ., हयवरट्)

वाजसनेयप्रातिशाख्यस्य भाष्यकारेण उव्वटेनायोगवाहस्य निर्वचनं किलैवं कृतम्- **अकारादिना वर्णसमाम्नायेन सहिताः सन्त एते वहन्त्यात्मलाभं प्राप्नुवन्त्ययोगवाहाः।** (वा.प्रा. ८.१८)

अत्रैवान्यो व्याख्याकारोऽनन्तभट्टस्तु लिखति - 'अयोगवहत्वं चेत्थम् अयोगेनाकारादिवर्णसमुदायेन सहिताः सन्त आत्मानं च वहन्त इति अयोगवाहाः' अर्थाद् अवर्णादीनन्तरेणैतेषामस्तित्वमेव नास्ति। इदन्तु तथ्यमयोगवाहघटकेना- नुस्वारशब्देनापि प्रमाणी क्रियते। तद्यथा- स्वर एव स्वारः, तं स्वारमनुगतोऽनुस्वारः। स्वरात् परमुच्चारितत्वमनुस्वारत्वम्। अयोगवाहस्य हीदं द्वितीयं निर्वचनमेवमवगन्तुं शक्नुमः- 'अस्य' (अत्र

'अ' इत्यवर्णादीनामुपलक्षणमस्ति) योगः (सम्बन्धः) अयोगः, अयोगेन वहन्तीत्ययोगवाहाः। इममेव भावं प्रकटयन् वर्णरत्नप्रदीपिकाशिक्षाकारो लिखति-

संयोगवाहा एवैते निजस्वरविवर्जिताः।
पूर्वस्याङ्गं भवन्त्येते स्वर एतेषु पूर्ववत्।। (५१)

(अवर्णादीनां) संयोगेन वहन्ति कार्यमिति संयोगवाहाः। अयोगवाहस्यैवानर्थान्तर 'संयोगवाह' इत्युक्तम्। सम्प्रति यमानां विषये किञ्चिद् विचार्य्यते- यमशब्दो युगलवाचकोऽस्ति। द्वयोर्वर्णयोर्निमित्तेन व्युत्पद्यमानस्य वर्णस्य 'यम' इति नाम भवति। कयोर्द्वयोर्वर्णयोर्निमित्तवशाद् 'यम' इति विशिष्टमक्षरमुत्पद्यते? प्रत्येकं वर्गस्य प्रथम-द्वितीय-तृतीय-चतुर्थस्पर्शवर्णानां मध्ये कस्याप्येकस्य वर्णस्य पश्चात् कस्यचिदपि वर्गस्य पञ्चमो वर्णः परो भवति चेद् द्वयोर्वर्णयोर्मध्ये वर्णसमाम्नायेऽनुपदिष्टस्य नासिक्यवर्णस्य श्रवणं (उत्पत्तिः) भवति, अयमेव 'यम' इत्युच्यते। यम्यन्त आस्यध्वनिनिरोधेन निर्वर्त्यन्त इति यमाः।

'कुँ खुँ गुँ घुँ यमाः' इत्येतस्मिन् सूत्रे 'क् ख् ग् घ्' इत्येते उदित आश्रयत्वेन निर्दिष्टाः सन्ति। यथा 'जिह्वामूलीय-उपध्मानीय' इति स्वरूपे निर्देष्टव्ये कपावपि निर्दिश्येते। अतो नैतन्मन्तव्यं यत् सानुनासिकाः ककारादयो यमसंज्ञां लभन्ते। सानुनासिकानां ककारादीनां शिक्षाशास्त्रकारैरस्वीकारात्। अतो 'यमाः' विशिष्टे स्थल आगमत्वेनोपनिपतिता भवन्ति। तच्च विशिष्टं स्थलमस्ति यत्र पञ्चमेऽनुनासिके परे पूर्वत्र चतुर्णां स्पर्शानां उपलब्धिर्भवति। एकैकशो यद्यवलोकनं क्रियते तदा त्विमे स्पर्शवर्णा विंशतिसंख्याका भवन्ति, परं ते सर्वेऽपि वर्णाः 'प्रथम-द्वितीय-तृतीय-चतुर्थाः' इत्यभिधीयन्ते अतः चत्वार एव यमा भवन्तीति दिक्।

एतदप्यत्र ध्यातव्यमस्ति यद् यमानां काचिद् लिपिर्नास्ति केवलं सति निमित्ते श्रवणेन ते ज्ञायन्ते। अत्र विषये पूर्वाचार्यैर्निर्दिष्टानि लक्षणानि यथावदुद्ध्रियन्ते-

१. स्पर्शा यमान् अननुनासिकाः स्वान् परेषु स्पर्शेष्वनुनासिकेषु। (ऋ.प्रा. ६.२९)
२. अन्तःपदेऽपञ्चमः पञ्चमेषु विच्छेदः[1]। (वा. प्रा. ४.१६३)
३. स्पर्शादनुत्तमादुत्तमपरादानुपूर्व्यान्नासिक्याः। (तै.प्रा.२१.१२)
४. अनन्त्यान्त्यसंयोगे मध्ये यमः पूर्वगुणः। (ऋ.त., साम. प्रा.१.२)
५. समानपदेऽनुत्तमात् स्पर्शादुत्तमे यमैर्यथासंख्यम् (च.अ. १.१९)
६. अपञ्चमैश्चैकपदे संयुक्तं पञ्चमाक्षरम्।
उत्पद्यते यमस्तत्र सोऽङ्गं पूर्वाक्षरस्य हि।। (या.शि. २१३)
७. स्पर्शात् परेऽपञ्चमास्तु वर्ग्या एकपदे स्थिते।
पञ्चमे तु परे नासिक्याश्चाभिनिहिता यमाः।। (कौ.शि. ८४)
८. स्पर्शानां पञ्चमैर्योगे चत्वारश्च यमाः स्मृताः। (व.प्र.शि. १४.१७६)
९. चतुर्णां पञ्चमैर्योगे उत्पद्यन्ते यमाश्च ये। (व.प्र.शि. १७)
१०. अपञ्चमात् पदे नित्यं पञ्चमेषु परेषु च।
यमोत्पत्तिर्भवेत् तत्र रुक्ँमः पापँ्मा निदर्शनम्।। (वा.प्र.शि. १७४, १७५)
११. यत्रोष्माविकृतेः स्पर्शादुत्तमोर्ध्वे त्वनुत्तमात्।
आनुपूर्व्याद्यमानेतान् वर्णयन्त्यागमान् बुधाः।। (व्या.शि. ३५५,३५६)
१२. अनन्त्यश्च भवेत् पूर्वोऽन्त्यश्च परतो यदि।
तत्र मध्ये यमस्तिष्ठेत् सवर्णः पूर्ववर्णयोः।। (ना.शि. २.२.८)
१३. कुँ खुँ गुँ घुँ इत्यनन्त्यान्त्यसंयोगेनान्त्यपूर्वेऽन्त्योत्तरे व्यवधानवर्जिते,
तत्र यमा वर्तन्ते न संशयः।। (सा.गौ.शि.१.२)
१४. स्पर्शानामुत्तमैः स्पर्शैः संयोगाच्चेदनुक्रमात्।
आनुपूर्व्या यमाँस्तत्र जानीयाच्चतुरस्तथा।। (अ.मा.शि)
१५. स्पर्शानां पञ्चमैर्योगे भवन्तीह यमाः स्मृताः। (शै.शि.पृ. ४)
१६. अथानन्त्याश्चत्वारस्ते सयमास्ते कुँ खुँ गुँ घुँ इत्यन्तसंयोगेऽन्त्य-
पूर्वोऽन्त्योत्तरे व्यवधानवर्जिते, तत्र यमा वर्तन्ते न संदेहः। (शि.प्र.४)
१७. पदमध्ये विद्यमानाः पञ्चमभिन्नाः स्पर्शाः पञ्चमेषु यममापद्यन्ते। (वि.प्र.१४०)

---

१. 'विच्छेदो यम इत्यनर्थान्तरम्' इत्युव्वटस्तत्रैव।

१८. तत्र यमा नाम वर्गेष्वादितश्चतुर्णां पञ्चमेषु परतः त एव नासिक्या भवन्ति। (पदमञ्जरी)

१९. वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये यमो नाम पूर्वसदृशो वर्णः प्रातिशाख्ये वर्णितः। (सि.कौ. १२, संज्ञाप्रकरणम्)

२०. वर्गेष्वादितश्चतुर्णां पञ्चमे परे तन्मध्ये पूर्ववर्णसमानाकारं वर्णान्तरं प्रातिशाख्येष्वागमत्वेन विहितं तद्यमसंज्ञम्।। (श.कौ. १.१.८)

२१. यमो नाम वर्गपञ्चमे परे वर्गाद्यचतुष्टयाऽन्यतमसदृशो वर्णः।

(उद्योतः, म.भा. १.१.८)

२२. वर्गान्त्येऽनन्त्यात् परे तयोर्मध्यवर्ती नासिकास्थानो यमः।

(हयवरट् सूत्रे क्षीरोदकारः)

उपर्युक्तानामनेकेषामाचार्याणां निर्दिष्टैर्लक्षणैरेतदेव ज्ञायते यत् पदमध्येऽनु- नासिकपञ्चमस्पर्शवर्णात् समनन्तरपूर्वं निरनुनासिकः स्पर्शवर्णः स्याच्चेत् तयोरुभयोरपि स्पर्शवर्णयोर्मध्ये नासिक्यवर्णस्यागमो (आगमनम्, उत्पत्तिः) जायते, अयमेव 'यम' इत्युच्यते। अस्यैवापरं नाम 'विच्छेद' इत्यपि भवति, सा चान्वर्थसंज्ञाऽस्ति। आस्यध्वनिजवर्णयोर्मध्येऽनास्य- ध्वनिजे (शुद्धनासिक्यध्वनिजे) यम उच्चारिते ह्यास्यध्वनिप्रवाहस्य विच्छेदो भवति। अत एव शुक्लयजुःप्रातिशाख्ये 'विच्छेद' इति नाम्नाऽभिधीयते। **विच्छिनत्ति आस्यध्वनिमिति विच्छेदः।** इमे यमाः क्वचिद् अशरीरेति विशेषणेनापि विशेषिता भवन्ति। अशरीरेति कथनस्येदमेव तात्पर्यं यदिमेऽन्यान् वर्णानाश्रित्यैव स्वीयं शरीरं (स्वरूपम्, अस्तितत्वम्) प्रकटयन्ति। एतेषां हि काचिल्लिपिरपि नास्ति[१]। अशरीरशब्देनैतेषाम् अयोगवाहत्वमपि प्रकटी भवति[२]।

---

१. अशरीरमिति स्वरभक्त्यादिवद् व्यञ्जकलिपिविशेषशून्यमित्यर्थः। लक्षणवशेनैव तदीय- स्थलविशेषनिश्चयसम्भवाल्लिपिसम्प्रदायप्रवर्त्तकाचार्यैः स्वरभक्तेरिव यमस्यापि व्यञ्जकीभूता लिपिर्न कल्पितेत्यर्थः। (श. कौ. १.१.८)

२. यमविषये कश्चिदधिकं ज्ञातुमिच्छति चेद् विद्वत्प्रकाण्डानामुदयनाचार्याणां

स्वराणां व्यञ्जनानाञ्च लक्षणम्

स्वयं राजन्त इति स्वराः। (म.भा. १.२.२९)

येषामुच्चारणेऽन्येषां वर्णानां साहाय्यं नापेक्ष्यते ते 'स्वराः' इत्यभिधीयन्ते। **पृषोदरादीनि यथोपदिष्टम्** (अ.६.३.१०८) इति सूत्रेण 'स्वयम्' इति शब्दस्य 'स्व' इत्यादेशः, 'राजृ दीप्तौ' धातोश्च ड-प्रत्ययः। तत्र च 'राज्' इत्यस्य टिलोपे 'स्वर' इति शब्दः सिध्यति।

अन्वग् भवति व्यञ्जनमिति। (म.भा. १.२.२९)

अत्र कैयटः सूत्रमिदमेवं व्याचख्यौ- अन्वग्भवति=अनुगच्छतीत्यर्थः। अज्गुणमिति शेषः। यद्यजुदात्तोऽस्ति चेत्तत् सम्बद्धं पूर्वव्यञ्जनमप्युदात्तं भवति, यद्यनुदात्तो भवति तर्हि व्यञ्जनमप्यनुदात्तं भवति। यदि च स्वरितो भवति तर्हि व्यञ्जनमपि तथैव भवति।

अन्वग्भवतीति व्यञ्जनमिति शिष्टसमाचारादिदं निर्वचनमभिहितं, न त्वत्र वर्णसादृश्यं किञ्चिदस्ति अथवा गतिरपि व्यञ्जेरर्थः, विविधं गच्छत्युपरागवशादिति व्यञ्जनमित्ययमर्थोऽपि भाष्यकारेण निरुच्यते यो हि यमनुगच्छति स तद्वद् विविधं गच्छतीत्यर्थः। उपरागश्च पूर्वपराच्सन्निधानेऽपि परेणाचा हलो भवति न पूर्वेण। स्वभाव एवात्र बीजं नान्यदिति मन्तव्यम्।

भाष्यकारेणैतदप्यत्र निर्णीतम् - उदात्तादयोऽचामेव गुणाः (धर्माः) भवन्ति न तु हलाम्। तत्सामीप्यात्तु व्यञ्जनमपि तद्गुणमुपलभ्यते। तद्यथा द्वयो रक्तयोर्वस्त्रयोर्मध्ये शुक्लं वस्त्रं तद्गुणमुपलभ्यते। 'बदरपिटके[1] रिक्तको'[2] लोहकंसस्तद्गुण[3] उपलभ्यते। भाष्यकाराः

शिक्षातत्त्वालोकभाष्योपेते शिक्षाशास्त्रमितिनामके वैदुष्यपूर्णे ग्रन्थेऽवलोकयितुमर्हति।

१. बदरफलयुक्तपेटिकेति सम्प्रदायः।

२. घर्षणेनोज्ज्वलीकृतः।

३. आदर्शः।

पूर्वपक्षमत्रोपस्थापयन्ति- 'कुतो नु खल्वेतत्- अच एते गुणाः स्युः, तत्सामीप्यात्तु व्यञ्जनमपि तद्गुणमुपलभ्यते। न पुनर्व्यञ्जनस्यैते गुणाः स्युस्तत्सामीप्यात्त्वजपि तद्गुण उपलभ्येतेति'।

अस्य समाधानं प्रस्तुवन्ति- 'अन्तरेणापि व्यञ्जनमच एवैते गुणा लक्ष्यन्ते, न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणमपि भवति। अन्वर्थं खल्वपि निर्वचनम्- 'स्वयं राजन्त इति स्वराः, अन्वग् भवति व्यञ्जनम्'। 'आप्यायध्वम्' इति यथात्र आकार उदात्त, तिङन्तस्य निघातः। ततश्चाऽन्वयव्यतिरेकाभ्यामच एवैते गुणाः। यदि तु हलामप्येते गुणा अभविष्यन् तदा हलामचां च भिन्नस्वरताप्युपालप्स्यत, यस्मात्त्वचामेवाचार्याः स्वरमनुविदधति, न हलाम्। तस्मान्न हलां स्वयं स्वरोऽस्तीति निश्चयः।

ऊकालोऽझ्रस्वदीर्घप्लुतः। (अष्टा. १.२.२७)

अनेन हि पाणिनीयसूत्रेणाचां 'ह्रस्वो' 'दीर्घः' 'प्लुत'श्चेति सञ्ज्ञात्रयं क्रियते। 'ऊकालोऽच्' इति संज्ञिनो निर्देशः। 'ऊकाल' इत्येकं समस्तं पदम्। समासस्त्वत्रास्ति- द्वन्द्वगर्भषष्ठीतत्पुरुषगर्भबहुव्रीहिः। विग्रहस्त्वस्यैवं कर्त्तव्यः - 'उश्च ऊश्च ऊ३श्चेति' वः, द्वन्द्वसमासे 'उ +ऊ' इत्येतयोः सवर्णदीर्घे कृते सति 'ऊ+ऊ३' इत्येतयोरपि सवर्णदीर्घ 'ऊ' इति जाते जस्-विभक्तौ 'ऊ+अस्' इति स्थिते 'प्रथमयोः पूर्वसवर्णः' (अष्टा.६.१.९८) इति प्राप्तौ 'नादिचि'(अष्टा. ६.१.१००) इति निषेधे 'इको यणचि' (अष्टा.६.१.७४) इति यणादेशे 'वस्' (वः) इति रूपं सिध्यति। पुनः वां काल इत्यूकाल इति कालशब्देन सह षष्ठीसमासे कृते ऊकालशब्दस्यान्येनैकेन कालशब्देन बहुव्रीहौ समासे पूर्वपदान्तर्गतोत्तरपदस्य कालशब्दस्य लोपे 'ऊकाल' इत्येवावशिष्यते।

ततश्चायमर्थो जायते- उकारस्य ऊकारस्य ऊ३कारस्य च काल इव कालो यस्य (अचः) तादृशोऽच् क्रमशो ह्रस्वो दीर्घः प्लुतश्चेति संज्ञां लभते।

ह्रस्वं लघु। (अष्टा.१.४.१०)

ह्रस्वस्य 'लघु' इत्येषा संज्ञा भवति। यथा- हरिः।

संयोगे गुरु। (अष्टा. १.४.११)

संयोगे परतः पूर्वस्य ह्रस्वस्याक्षरस्य 'गुरु' इतीयं संज्ञा भवति। यथा- 'विप्रः' इत्यत्र 'इकारः' गुरुसंज्ञकोऽस्ति, यतस्तस्मात् परे पकाररेफयोः संयोगोऽस्ति।

हलोऽनन्तराः संयोगः। (अष्टा.१.१.७)

न विद्यतेऽन्तरं ययोर्येषां वा तादृशा हलः संयोगसंज्ञका भवन्ति।

दीर्घञ्च। (अष्टा. १.४.१२)

दीर्घं वर्णमपि गुरुसंज्ञकं भवति।

स्वराणामुच्चारणदोषाः

ग्रस्तं निरस्तमवलम्बितं
निर्हतमम्बूकृतं ध्मातमथो विकम्पितम्।
सन्दष्टमेणीकृतमर्द्धकं द्रुतं
विकीर्णमेताः स्वरदोषभावनाः।।

शौनकीयऋग्वेदप्रातिशाख्ये वर्णदोषा एवं व्याख्याताः-

१. **ग्रस्तम् -** जिह्वामूलनिग्रहे ग्रस्तमेतत् (१४.२)। निग्रहो नाम स्तम्भनम्। जिह्वा- मूलस्य निग्रहं (स्तम्भनम्, कठोरत्वम्) कृत्वोच्चारणम्। उच्चारणमित्यध्याह्रियते चेद् 'ग्रस्तं निरस्तम् अवलम्बितम्' इत्येवंरूपेण पठ्यन्ते। अथ 'दोष' इत्यध्याह्रियते तदा हि भाष्ये 'संवृतः कलो ध्मात एणीकृतोऽम्बूकृतोऽर्द्धको ग्रस्तो निरस्तः प्रगीत उपगीतः क्ष्विण्णो रोमश' इत्येवंरूपेण पुल्लिङ्गेन पठिताः।

२. **निरस्तम्-** निरस्तं स्थानकरणापकर्षे (१४.२)

कण्ठादिस्थानानि करणं (जिह्वाम्) चापकृष्योच्चारणम् अर्थात् वर्णस्योच्चारणे स्थानकरणयोर्यथावत् प्रयत्नमविधायाग्रिमवर्णस्य (पुरतो) विद्यमानवर्णस्योच्चारणवत् स्थानकरणयोश्चेष्टितम् (व्यापारः)। अयं भावः- अनियंत्रितस्थानकरणाभ्यां (इतस्ततः प्रचलिताभ्याम्) वर्णस्य यथावदुच्चारणस्याभावाद्धि स स वर्णः स्वस्वस्थानकरणाभ्यामपकृष्टो भवति। एतदेवात्र निरस्तमित्यनेनोच्यते। निष्ठुरं (त्वरितम्) इति कैयटः।

३. **अवलम्बितम्-** (क्वचित्तु 'अविलम्बितमि'ति पाठः, तत्तु 'अर्द्धकम्' 'द्रुतम्' इत्यनेनैव गतार्थं भवति) वर्णान्तरमाश्रित्योच्चारणम्। वर्णान्तरासम्भिन्नमिति यावत्।

४. **निर्हतम्-** आघात इव प्रहारं कृत्वोच्चारणम्।

५. **अम्बूकृतम्-** ओष्ठयोरवरोधनमिव कृत्वोच्चारणम्। कदाचिन्मुखे जलं भवति, लाला वाधिकं स्रवति तद् बहिर्न गच्छेदिति भयवशादुभावप्योष्ठौ परस्परं मिलिताविव भवतः। एवञ्चोच्चारितो वर्णः शब्दो वाऽन्तर्मुखमेव तिष्ठति। श्रोता हि तदा न तं स्पष्टं श्रोतुमर्हति। एवञ्चात्रास्पष्टोच्चारणदोष एवात्राम्बूकृतमित्यनेन लक्ष्यते। उक्तं ह्यमरकोषे-

लुप्तवर्णपदं ग्रस्तं निरस्तं त्वरितोदितम्।
अम्बूकृतं सनिष्ठीवमबद्धं स्यादनर्थकम्।। ३५१ ।।

यो व्यक्तोऽप्यन्तर्मुख इव श्रूयत इति कैयटः।

६. **ध्मातम्-** श्वासभूयिष्ठतया ह्रस्वोऽपि दीर्घ इव लक्ष्यते।

७. **विकम्पितम्-** ससम्भ्रमं सकम्पं यथा स्यात् तथोच्चारणम्।

८. **सन्दष्टम्-** हनुद्वयं समीपमानीय निष्पीड्योच्चारणम्। वर्द्धित इवोच्चारणम् इति कैयटः।

९. **एणीकृतम्-** उच्चत्व-नीचत्व-रूपविषमध्वनिना विषमगत्या वोच्चारणम्। अविशिष्टः (संश्लिष्टः, संदिग्ध इति यावत्। किमयमोकारोऽथौकार इति यत्र सन्देह इति कैयटः)।

१०. **अर्धकम्-** दीर्घोऽपि ह्रस्व इव कालसङ्कोचेनोच्चारितम्।

११. **द्रुतम्-** अभ्यासकालादन्यस्मिन्नपि कालेऽत्यधिकशीघ्रतयोच्चारणम्।

१२. **विकीर्णम्-** वर्णानां शब्दानां वा विप्रसृतानामिव यथोचितसम्बद्धताराहित्येनो- च्चारणम्। शब्दानां शुद्धोच्चारणे वर्णानां सम्बद्धतार्थाद् यथोचितवर्णविभाजन- मतितरामावश्यकं भवति। अन्यथासम्बद्धतया (अनुचितयतिप्रयोगेण)[१] अर्थराहित्यं विपरीतार्थकं वा, सम्बन्धभेदाद् (यतिभेदाद्) अर्थभेदो जायते।

उपर्युक्ता द्वादश स्वरदोषभावनाः (स्वरदोषजातयः) यद्यपीमे स्वरसम्बन्धिनो दोषा उक्ताः, पुनरपि केचन दोषा अत्र व्यञ्जनोच्चारणेऽपि भवितुमर्हन्ति।

महाभाष्यकारेण पतञ्जलिनान्ये ये स्वरदोषाः परिगणितास्तेऽपि व्याख्यायन्ते-

१३. **संवृतः-** असंवृतानां=विवृतप्रयत्नानां वर्णानाम् (आ, इ, ई, उ,ऊ इत्येवमादीनां सर्वेषामपि स्वराणाम्) संवृतवर्णवत् सङ्कुचितकण्ठेनोच्चारणम्।

१४. **कलः-** काकलकेनोच्चार्यमाणेभ्योऽन्येषामपि वर्णानां काकलकेनोच्चारणम्।

---

१. यतिर्विराम इति छन्दःशास्त्रे प्रसिद्धम्। तस्यानुचितप्रयोगेण विवक्षितार्थविघातो भवति। यथा कस्यापि गमनस्य निवारणे विवक्षिते ‘रोको, मत जाने दो’ इत्युच्यते। ‘रोको मत, जाने दो’ इत्यस्थाने यतिप्रयोगाद् विवक्षितार्थबाधो विपरीतार्थबोधश्च जायते।

१५. **प्रगीतः-** सामगानवद् गानं कृत्वोच्चारणम्।

१६. **उपगीतः-** समीपवर्णान्तरगीत्यानुरक्तोच्चारणम्।

१७. **क्ष्विण्णः-** कम्पनयुक्तमुच्चारणम्।

१८. **रोमशः-** गम्भीरतयोच्चारणम्।

अथोदात्तादिस्वरोच्चारणसम्बन्धिनो दोषाः प्रदर्श्यन्ते-

असंदिग्धान् स्वरान् ब्रूयात् (ऋ.प्रा.३.२९)

उदात्तानुदात्तस्वरितप्रचयस्वरान्[1] असन्दिग्धान्=सन्देहरहितान् अर्थाद् यथावद् विस्पष्टतयोच्चारयेत्।

अविप्रकृष्टान् (ऋ.प्रा.३.३०)

उदात्तादिस्वरान् अथवाकारादिस्वरान् सन्धिस्थलेषु अविप्रकृष्टान् = निकटस्थान् दूरे कृत्वा नोच्चारयेत्।

अकम्पितान् (ऋ.प्रा. ३.३१)

स्वरितस्वरो गौणमुख्यभेदेन द्विधा विभज्यते। तत्र गौणस्तावद् उदात्तपूर्वो भवति। स च पुनर्वैवृत-तैरोव्यञ्जन-तैरोविराम-ताथाभाव्य-प्रातिहत इति पञ्चधा विभज्यते। मुख्यस्वरितः सन्धिजोऽसन्धिज इति द्विधा गण्यते। असन्धिजस्तावत् नित्यस्वरितो जात्यस्वरितो वेति नाम्ना ज्ञायते। सन्धिजस्वरितस्तु त्रिधा परिगण्यते-प्रश्लिष्टस्वरितः (सवर्णदीर्घसन्धिजः), क्षैप्रस्वरितः (यण्सन्धिजः), अभिनिहितस्वरितः (पूर्वरूपसन्धिजः)। उदात्तपूर्वकाणां पञ्चानां स्वरितानाम् उच्चारणविधानं प्रातिशाख्येष्वेवमुक्तमस्ति-स्वरितस्याद्यांशस्य उदात्तस्य उच्चारणम् उच्चतरेण, अन्त्यानुदात्तांशस्य उच्चैर्वक्तव्यमिति। परन्तु शेषाणां जात्यप्रश्लिष्टादीनां स्वरितानामुच्चारणमेवं विहितमस्ति यद्- यदि उदात्तो वा

१. प्रचयः = एकश्रुतिः

स्वरितो वा परे भवति चेद् जात्यादीनां चतुर्णां स्वरितानाम् आद्यांशोदात्तस्य उच्चतरेण अवशिष्टांशस्यानुदात्तत्वेन (नीचैर्ध्वनिना) उच्चारणं भवेदिति। अत्रैव विशेषतोऽवधेयमिदं यदस्मिन्नुच्चारणे (उच्चरतरः+अनुदात्तः)+(उदात्तः/स्वरितः) इत्येवं क्रमो भवति। इह उच्चतर-उच्चध्वन्योर्मध्येऽत्यन्त स्वल्पकालं यावद् अनुदात्तः (नीचैर्ध्वनिः) उच्चार्यते। स चोच्चध्वन्योर्मध्ये विद्यमानत्वात् कम्पमान इव श्रूयते। अत एवायं ध्वनिः (अनुदात्तभागः) कम्पसंज्ञकः[१]। नायं दोषः, विहितत्वाद्। विहितादन्यत्र अर्थाद् वैवृतादिष्वपि स्वरितेषु कम्पः क्रियते चेत् स दोषो भवति। स एव दोषः परिहर्तव्य इति शौनक आह- **अकम्पितान्** इति। वैवृतादीन् स्वरितान् कम्परहितान् उच्चारयेद् इत्यर्थः।

अतोऽन्ये व्यञ्जनदोषाः। शशः षष इति मा भूत्। पलाशः पलाष इति मा भूत्, मञ्चको मञ्जक इति मा भूत्। (म.भा. पस्पशाह्निके)

उपरि ये स्वरदोषाः परिगणिताः, तेभ्योऽन्ये केचन व्यञ्जनदोषा अपि भवन्ति। यथा तालव्यशकारो मूर्धा वा दन्तैर्वा नोच्चारयितव्यः।

अयमेव किल भावोऽस्मिन्नपि श्लोके निर्दिष्टः-

यद्यपि बहु नाधीषे तथापि पठ पुत्र! व्याकरणम्।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत्।।

'श ष स' इत्येतेषां वर्णानामुच्चारणे प्रायो वक्तारः स्खलन्ति, अतो भाष्य- कारेणोच्चारयितॄणां ध्यानमाकृष्टम्।

प्रश्नः- अस्मिन् शिक्षाग्रन्थे कति प्रकरणानि सन्ति?

उत्तरम्- श्रीस्वामिदयानन्दाः, श्रीयुधिष्ठिरमीमांसकाः, शिक्षाशास्त्रपारावारीणा उदयनाचार्याः ('शिक्षाशास्त्रम्' इति ग्रन्थस्य लेखकाः) त्रयोऽपि

---

१. वेदमत्रेष्वयं कम्पो विशिष्टलेखनप्रकारेण प्रदर्शितो भवति। तं विज्ञातुं परमविदुषा उदयनाचार्येण विरचितं शिक्षाशास्त्रम् (पृष्ठ. ५४-५५) द्रष्टव्यम्।

विद्वांसोऽत्राष्टौ प्रकरणानीत्याहुः। परं विद्वद्वरेण्याः प्रो. डॉ. विजयपालशास्त्रिणः (‘प्रचेता’ इत्युपनाम्ना ख्याताः) किल प्रबलयुक्तिबलात् सप्तैव प्रकरणानीति साग्रहं स्वमतं स्थापयन्ति। तेषां हि कथनमिदमस्ति यत् ‘प्रक्रम एषोऽथ नाभितलात्’ इति वाक्यरचनास्वारस्यबलेन एकमेव प्रकरणमत्र निर्दिश्यते। केवलं ‘नाभितलात्’ इति पदं साकांक्षं तिष्ठतीति कृत्वा न तेन कश्चिद् भिन्नः प्रकरणरूपार्थो ग्रहीतुं शक्यते। प्रक्रमशब्दार्थविषयेऽपि विवदन्ते। वर्णानां क्रमविशेष एव प्रक्रमशब्देनोच्यत इति प्रायेणार्थो गृह्यते, परं प्रचेतोमहाभागास्तु प्राचीनशिक्षाग्रन्थानुसारितया महाभाष्यानुरोधेन च ‘उच्चैरुदात्त’ इति सूत्रभाष्यवार्तिकनिर्दिष्टं प्रक्रममेव मन्यन्ते[१]। स चेत्थम्-

उच्चनीचस्यानवस्थितत्वात्सञ्ज्ञाप्रसिद्धिः। इदमुच्चनीचमनवस्थित-पदार्थकम्, तदेव हि कञ्चित्प्रत्युच्चैर्भवति, कञ्चित्प्रति नीचैः। एवं हि कश्चित्कञ्चिदधीयानमाह- किमुच्चै रोरूयसे शनैर्वर्ततामिति। तमेव तथाधीयानमपर आह- किमन्तर्दन्तकेनाधीषे उच्चैर्वर्ततामिति। एवमुच्चनी- चमनवस्थितपदार्थकम्, तस्यानवस्थितत्वात्सञ्ज्ञाया अप्रसिद्धिः।।

एवं तर्हि लक्षणं करिष्यते- ‘आयामो दारुण्यमणुता खस्येति उच्चैःकराणि शब्दस्य।’ **आयामो गात्राणां निग्रहः। दारुण्यं स्वरस्य दारुणता रूक्षता। अणुता खस्य कण्ठस्य संवृतता। उच्चैःकराणि शब्दस्य।।** ‘अन्ववसर्गो मार्दवमुरुता खस्येति नीचैःकराणि शब्दस्य।’ **अन्ववसर्गो गात्राणां शिथिलता। मार्दवं स्वरस्य मृदुता स्निग्धता। उरुता खस्य महत्ता कण्ठस्येति नीचैःकराणि शब्दस्य।।**

एतदप्यनैकान्तिकम्। यद्ध्यल्पप्राणस्य सर्वोच्चैस्तद्धि महाप्राणस्य सर्वनीचैरिति पूर्वपक्षं प्रस्तूय भाष्यकारः पूर्वोक्तं लक्षणं सिद्धान्तत्वेन

---

१. ‘उदात्तादिस्वरूपविषयक कैय्यटादि भाष्यव्याख्याताओं की महती भ्रान्ति’ इति शीर्षकोपनिबद्धः प्रचेतोमहोदयस्य लेखो वेदवाण्यादिषु पत्रिकासु प्रकाशितः। अस्य पुस्तकस्यान्तेऽपि परिशिष्टरूपेण प्रदत्तः।

स्थापयितुं वार्तिकमवतारयन्नाह- सिद्धं तु समानप्रक्रमवचनात्।। सिद्धमेतत्।। कथम्?।। (समानप्रक्रमवचनात्)। समाने प्रक्रम इति वक्तव्यम्।। कः पुनः प्रक्रमः? उरः कण्ठः शिर इति''।। (म.भा.- १.२.२९-३०)

अर्थात् प्राचीनेषु शिक्षाग्रन्थेषु प्रातिशाख्यग्रन्थेषु च सवनत्रयरूपस्त्रिविधः प्रक्रमः (वायोरुत्थानरूपो मन्द-मध्य-तीव्ररूपः प्रयासः) नाभितलाद् यदि समानस्तदा अल्पप्राणमहाप्राणयोरस्मिन् समाने प्रक्रमे सति 'आयामो दारुण्यमि'त्यादि तैत्तिरीयप्रातिशाख्यगतं लक्षणमेव वार्तिककृता कात्ययनेन समर्थ्यते। पाणिनीयशिक्षायाः वृद्धपाठेऽपि अन्तिमभागे- 'तत्र यदा सर्वाङ्गानुसारी प्रयत्नस्तीव्रो भवति' इत्यादिवचनेन सह स्फुटतया संवादिता भाष्यवार्तिककृद्वचनानां दृश्यते। एतदेव च 'त्रिधा बद्धो वृषभो रोरवीति' इत्यत्र मन्त्रव्याख्यानप्रसङ्गे पस्पशायां भाष्यकारेण 'त्रिषु स्थानेषु बद्धः उरसि कण्ठे शिरसी'त्युक्त्वा सङ्केतितम्।

अथ प्रथमं स्थानप्रकरणम्

१. तत्र स्थानं तावत्।

अर्थः- (तत्र) स्थानकरणप्रयत्नादिषु (तावत्) प्रथमम्, पूर्वम् (स्थानम्) मुखगतं वर्णोच्चारणस्थानमुच्यते, निरूप्यत इति भावः।

२. अकुहविसर्जनीयाः कण्ठ्याः।

अकुहविसर्जनीयाः १.३।। कण्ठ्याः १.३।।

समासः- अश्च कुश्च हश्च विसर्जनीयश्च अकुहविसर्जनीयाः, इतरेतरयोगद्वन्द्वः। कण्ठे भवा उत्पन्ना जाता उपलब्धा वा इति कण्ठ्याः। शरीरावयवाच्च (अष्टा.४.३.५५) इति भवार्थे यत्-प्रत्ययः।

अर्थः- (अकुहविसर्जनीयाः) अवर्णः (ह्रस्वो, दीर्घः, प्लुतश्चेति) कवर्गो हकार अकारोत्तरवर्ती विसर्गश्च (कण्ठ्याः) कण्ठस्थानभवा अर्थात् कण्ठत उत्पद्यन्त उपलभ्यन्ते, कण्ठेनोच्चारणीया इति यावत्।

श्लोकात्मिकायां पाणिनीयशिक्षायां द्वाविंशतितमे श्लोके ह्युक्तम्-

अनुस्वारयमानां च नासिका स्थानमुच्यते।
अयोगवाहा विज्ञेया आश्रयस्थानभागिनः।।

अत्र विसर्गस्य विसर्जनीयस्य वान्वर्थं खलु निर्वचनम्- विविधरूपेण सर्जनीय उच्चारणीय इति विसर्गः। यथा- वेदः, कविः, गुरुः, कवेः, गुरोः, रैः, गौरित्यादयः।

३. हविसर्जनीयावुरस्यावेकेषाम्।

हविसर्जनीयौ १.२।। उरस्यौ १.२।। एकेषाम् ६.३।।

समासः- हश्च विसर्जनीयश्चेति हविसर्जनीयौ, इतरेतरयोगद्वन्द्वः। उरसि भव उरस्यः, तावुरस्यौ पूर्ववद् यत्प्रत्ययः।

अर्थः- (एकेषाम्) केषाञ्चिदाचार्याणां मतेन (हविसर्जनीयौ) हवर्णो विसर्गश्च (उरस्यौ) उरःस्थानभवौ विद्येते।

४. जिह्वामूलीयो जिह्व्यः।

जिह्वामूलीयः १.१।। जिह्व्यः १.१।।

समासः- जिह्वाया मूलं जिह्वामूलम्- षष्ठीतत्पुरुषः तस्मिन् जिह्वामूले भवः=उत्पन्नो जिह्वामूलीयः। 'जिह्वामूलाङ्गुलेश्छः' (अष्टा.४.३.६२) इति छप्रत्ययः। जिह्वाशब्दाद् भवार्थे शरीरावयवाच्च (अष्टा.४.३.५५) इति यति प्रत्यये सति जिह्व्य इति सिध्यति।

अर्थः- (जिह्वामूलीयः) क, ख इति कखाभ्यां प्रागर्धविसर्गसदृशः जिह्वामूलीयः, जिह्वामूलीयसंज्ञको वर्णः। अयं (जिह्व्यः) जिह्वास्थानभवो भवति अर्थात् जिह्वामूलेन कण्ठोपकण्ठस्थेन उच्चारणीय इत्यर्थः।

५. कवर्गावर्णानुस्वारजिह्वामूलीया जिह्व्या एकेषाम्।

कवर्गावर्णानुस्वारजिह्वामूलीयाः १.३।। जिह्व्याः १.३।। एकेषाम् ६.३।।

समासः- कवर्गश्चावर्णश्चानुस्वारश्च जिह्वामूलीयश्चेति कवर्गावर्णानुस्वर-जिह्वामूलीयाः- इतरेतरयोगद्वन्द्वः।

अर्थः- (एकेषाम्) कतिपयाचार्याणां मते (कवर्गावर्णानुस्वारजिह्वा-मूलीयाः) कवर्गीयाः कादयः पञ्च वर्णाः, अष्टादशभेदात्मकोऽवर्णः, अनुस्वारसंज्ञकः 'अं' इति वर्णः, जिह्वामूलीयसंज्ञकः क, ख इति पूर्वोक्तस्वरूपः, एते (जिह्व्याः) जिह्वामूलभवाः जिह्वामूलेनोच्चारणीया इति भावः।

६. सर्वमुखस्थानमवर्णमित्येके।

सर्वमुखस्थानम् १.१।। अवर्णम् १.१।। इति अव्ययम्।। एके १.३।।

समासः- सर्वञ्चादो मुखञ्च सर्वमुखम्, सर्वमुखं स्थानं यस्यावर्णस्य तत् सर्वमुखस्थानम्-कर्मधारयगर्भबहुव्रीहिः।

अर्थः- (अवर्णम्) अष्टादशभेदात्मकमवर्णम् (सर्वमुखस्थानम्) सर्वमुख- स्थानभवमस्ति (इति) एवं (एके) केचनाचार्या मन्यते। सर्वेषु स्थानेषु अवर्णमुच्चारयितुं शक्यत इति भावः। 'किं पुनरास्यम् (मुखम्)? ओष्ठात् प्रभृति प्राक्काकलकात्' (म.भा. १.१.९)।

७. कण्ठ्यानास्यमात्रानित्येके।

कण्ठ्यान् २.३।। आस्यमात्रान् २.३।। इति अव्ययम्।। एके १.३।।

समासः- कण्ठे भवाः कण्ठ्याः, तान् कण्ठ्यान्।

अर्थः- (इति) एवमेव (एके) केचनाचार्याः (कण्ठ्यान्) अ-कु-ह-विसर्जनीयान् कण्ठ्यान् वर्णान् (आस्यमात्रान्) मुखमात्रान्, सर्वमुखस्थानान् मन्यन्ते। सर्वमुखस्थानभवास्ते सर्व इति यावत्।

८. इचुयशास्तालव्याः।

इचुयशाः १.३।। तालव्याः १.३।।

समासः- इश्च चुश्च यश्च शश्चेति इचुयशाः-इतरेतरयोगद्वन्द्वः। तालुनि भवाः तालव्याः 'शरीरावयवाच्च' (अष्टा. ४.३.५५) इति यत्-प्रत्ययः।

अर्थः- (इचुयशाः) अष्टादशभेदात्मक इवर्णः, पञ्चवर्णात्मकश्चवर्गः, सानुनासिकनिरनुनासिकभेदात्मकं यकारद्वयं शकारश्च, एते (तालव्याः) तालुस्थानभवा इति ज्ञेयाः। तालुस्थानेनोच्चारणीया इति भावः।

९. ऋटुरषा मूर्धन्याः।

ऋटुरषाः १.३।। मूर्धन्याः १.३।।

समासः- आ (ऋ) च टुश्च रश्च षश्च इति ऋटुरषाः इतरेतरयोगद्वन्द्वः। मूर्ध्नि भवा मूर्धन्याः 'शरीरावयवाच्च' (अष्टा. ४.३.५५)।

अर्थः- (ऋटुरषाः) अष्टादशभेदात्मक ऋकारः, पञ्चवर्णात्मकष्टवर्गः,रेफः, षकारश्च, एते (मूर्धन्याः) मूर्धस्थानभवा वेदितव्याः। मूर्धस्थानेन एत उच्चारणीया इति भावः।

१०. रेफो दन्तमूलीय एकेषाम्।

रेफः १.१।। दन्तमूलीयः १.१।। एकेषाम् ६.३।।

समासः- दन्तानां मूलम् इति दन्तमूलम् षष्ठीतत्पुरुषः। दन्तमूले भवो दन्तमूलीयः=दन्तमूलस्थानः। 'गहादिभ्यश्च' (अष्टा. ४.२.१३७) इति छप्रत्ययः।

अर्थः- (रेफः) र-वर्णः (दन्तमूलीयः) ऊर्ध्वदन्तमूलस्थानभवोऽस्तीति (एकेषाम्) केषाञ्चिदाचार्याणां मतम्।

११. दन्तमूलस्तु तवर्गः।

दन्तमूलः १.१।। तु अव्ययम्।। तवर्गः १.१।।

समासः- दन्तानां मूलं (स्थानं) यस्य (तवर्गस्य) सः दन्तमूलः- बहुव्रीहिः। एकेषामित्यनुवर्तते।

अर्थः- (तवर्गः) पञ्चवर्णात्मकस्तवर्गः (तु) (दन्तमूलः) दन्तमूल-स्थानभवोऽस्तीति (एकेषाम्) एकेषामाचार्याणां मतम्।

१२. लृतुलसा दन्त्याः।

लृतुलसाः १.३।। दन्त्याः १.३।।

समासः - ला (लृ) च तुश्च लश्च सश्चेति लृतुलसाः- इतरेतरयोगद्वन्द्वः। दन्तेषु भवा दन्त्याः- 'शरीरावयवाच्च' (अष्टा. ४.३.५५) इति यत् प्रत्ययः।

अर्थः- (लृतुलसाः) द्वादशभेदात्मकः स्वरसंज्ञकः लृकारः, पञ्चवर्णात्मक-स्तवर्गः, सानुनासिकनिरनुनासिकभेदेन द्विविधो लकारः सकारश्च, एते (दन्त्याः) दन्तस्थानभवाः। उपरितनदन्तमूलस्थानेनोच्चारणीया इति भावः।

१३. वकारो दन्तोष्ठ्यः।

वकारः १.१।। दन्तोष्ठ्यः १.१।।

समासः- दन्ताश्च ओष्ठौ च दन्तोष्ठम्- समाहारद्वन्द्वः। 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' (अष्टा. २.४.२) इत्येकवद्भावः। 'स नपुंसकम्' (अष्टा. २.४.१७) इति नपुंसकलिङ्गम्। 'ओत्वोष्ठयोः समासे वा पररूपं वक्तव्यम्' (वा. ६.१.९४) इति पररूपम्। दन्तोष्ठे भवो दन्तोष्ठ्यः 'शरीरावयवाच्च' (अष्टा. ४.३.५५) इति यत्प्रत्ययः।

अर्थः - (वकारः) सानुनासिकनिरनुनासिकभेदात्मको वकारः (दन्तोष्ठ्यः) दन्तस्थानभव ओष्ठकरणश्च भवति। उपरितनदन्तानाम् अधस्तनोष्ठस्य च सम्मिलितयत्नेन उच्चारणीयोऽयं वर्ण इति भावः।

१४. सृक्किणी[१] स्थानमेकेषाम्।

सृक्किणी १.२।। स्थानम् १.१।। एकेषाम् ६.३।। 'वकारः' इत्यनुवर्तते, षष्ठ्यन्तेन च तस्य विपरिणामः।

अर्थः- (वकारस्य) (स्थानम्) उच्चारणस्थानम् (सृक्किणी) सृक्किणी भवत इति (एकेषाम्) केषाञ्चिदाचार्याणां मतम्।

१५. उपूपध्मानीया ओष्ठ्याः।

उपूपध्मानीयाः १.३।। ओष्ठ्याः १.३।।

१. सृजतो लालादीनीति सृक्किणी=ओष्ठप्रान्तभागौ, ओष्ठपर्यन्तभागौ। 'प्रान्तावोष्ठस्य सृक्किणी' (अमर.२.६.९१)। अस्यानेकं समरूपं समानार्थकमपि शब्दरूपं प्राप्यते। यथा- सृक्कः, सृक्कम्, सृक्कम्, सृक्कन् (नपुं.), सृक्कन् (नपुं.) सृक्कि (नपुं.), सृक्किन् (नपुं.), सृक्किन् (नपुं.), सृक्कणी, सृक्किणी, सृक्कणी, सृक्किणी, सृक्कि इत्यादयः। आङ्ग्लभाषायां वकारस्य कृते ध्वनिद्वयं श्रूयते v तथा w । अनयोः 'w' रूपस्योच्चारणं सृक्किभागेन (उभयोरप्योष्ठयोः प्रान्तभागेन) भवति, यथा- world इति शब्दमाङ्ग्लीया उच्चारयन्ति।

समासः- उश्च पुश्च उपध्मानीयश्च इति उपूपध्मानीयाः- इतरेतरयोगद्वन्द्वः।

अर्थः- (उपूपध्मानीयाः) अष्टादशप्रकार उवर्णः पादिपञ्चवर्णात्मकः पवर्गः, एते सर्वे (ओष्ठ्याः) ओष्ठस्थानभवाः। तत्र चोत्तरोष्ठः स्थानरूपेणाधरोष्ठश्च करणरूपेण मन्यते। उपध्मानीयः पफाभ्यां प्रागर्धविसर्गसदृशः उपध्मानीयसञ्ज्ञको वर्णः।

१६. अनुस्वारयमा नासिक्याः।

अनुस्वारयमाः १.३।। नासिक्याः १.३।।

समासः- अनुस्वारश्च यमाश्च इति अनुस्वारयमाः-इतरेतरयोगद्वन्द्वः। नासिकायां भवा नासिक्याः 'शरीरावयवाच्च' (अष्टा. ४.३.५५) इति यत्प्रत्ययः।

अर्थः- (अनुस्वारयमाः) ह्रस्वदीर्घगुरुस्वरसम्पृक्त अनुस्वारसंज्ञको वर्णः (अं) इत्यादिरूपः चत्वारश्च यमसंज्ञा वर्णाः (नासिक्याः) नासिकास्थानभवा नासिकयोच्चारणीया इति भावः।

१७. कण्ठनासिक्यमनुस्वारमेके।

कण्ठनासिक्यम् २.१।। अनुस्वारम् २.१।। एके १.३।।

समासः- कण्ठश्च नासिका चेति कण्ठनासिकम्-समाहारद्वन्द्वः। 'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' (अष्टा. २.४.२) इत्येकवद्भावः, 'स नपुंसकम्' (अष्टा. २.४.१७) इति नपुंसकत्वम्। कण्ठनासिके भवः कण्ठनासिक्यः (अनुस्वारः), तं कण्ठनासिक्यम्।

अर्थः- (एके) केचनाचार्याः (अनुस्वारम्) अनुस्वारसंज्ञकं ह्रस्वदीर्घगुरु- स्वरसम्पृक्तं वर्णं (कण्ठनासिक्यम्) कण्ठनासिकास्थानभवं मन्यन्ते।

१८. यमाश्च नासिक्यजिह्वामूलीया एकेषाम्।

यमाः १.३।। च अव्ययम्।। नासिक्यजिह्वामूलीयाः १.३।। एकेषाम् ६.३।। नासिकायां भवा नासिक्याः 'शरीरावयवाच्च' (अष्टा. ४.३.५५) इति यत्प्रत्ययः। जिह्वामूले भवा जिह्वामूलीयाः 'जिह्वामूलाङ्गुलेश्छः' (अष्टा. ४.३.६२) इति छ-प्रत्ययः।

समासः- नासिक्याश्चामी जिह्वामूलीयाश्च इति नासिक्यजिह्वामूलीयाः- कर्मधारयः।

अर्थः- (यमाः) कुँ इत्यादयश्चत्वारो यमसंज्ञका वर्णाः (च) (नासिक्य-जिह्वामूलीयाः) नासिकाजिह्वामूलस्थानभवा इति (एकेषाम्) केषाञ्चिद् आचार्याणां मतमिदम्।।

१९. ए ऐ कण्ठतालव्यौ।

ए ऐ लुप्तविभक्तिकनिर्देशः।। कण्ठतालव्यौ १.२।।

समासः- कण्ठश्च तालु च इति कण्ठतालु-समाहारद्वन्द्वः। 'द्वन्द्वश्च प्राणि.' (अष्टा. २.४.२) इत्येकवद्भावः। 'स नपुंसकम्' (अष्टा. २.४.१७) इति नपुंसकत्वम्। कण्ठतालुनि भवौ कण्ठतालव्यौ 'शरीरावयवाच्च' (अष्टा. ४.३.५५) इति यत्प्रत्ययः।

अर्थः- (ए ऐ) द्वादशप्रभेदात्मकौ सन्ध्यक्षरत्वेन विज्ञातौ वर्णौ (कण्ठतालव्यौ) कण्ठतालुस्थानीयौ। उभाभ्यामपि स्थानाभ्यां उच्चारणीयाविति भावः।

२०. ओ औ कण्ठोष्ठ्यौ।

ओ औ इति लुप्तविभक्तिकनिर्देशः।। कण्ठोष्ठ्यौ १.२।।

समासः- कण्ठश्च ओष्ठौ च कण्ठोष्ठम्-समाहारद्वन्द्वः। पूर्ववद् एकवद्भावो नपुंसकलिङ्गञ्च। 'ओत्वोष्ठयोः समासे वा पररूपं वक्तव्यम्' (वा. ६.१.९४) इति पररूपम्। कण्ठोष्ठे भवौ कण्ठोष्ठ्यौ। पूर्ववद् यत्प्रत्ययः।

अर्थः- (ओ औ) इत्येतौ सन्ध्यक्षरत्वेन विज्ञातौ द्वादशप्रभेदात्मकौ वर्णौ (कण्ठोष्ठ्यौ) कण्ठोष्ठस्थानभवौ। एताभ्यामुभाभ्यां स्थानाभ्यामुच्चारणीयाविति यावत्।

२१. ङञणनमाः स्वस्थाननासिकास्थानाः।

ङञणनमाः १.३।। स्वस्थाननासिकास्थानाः १.३।।

समासः- ङश्च ञश्च णश्च नश्च मश्चेति ङञणनमाः-इतरेतरयोगद्वन्द्वः। स्वं स्थानं येषां ते स्वस्थानाः। नासिका स्थानं येषां ते नासिकास्थानाः-उभयत्र बहुव्रीहिः।स्वस्थानाश्च नासिकास्थानाश्चेति स्वस्थाननासिकास्थानाः-इतरेतरयोगद्वन्द्वः। बहुव्रीहिगर्भेतरेतरयोगद्वन्द्वसमासः।

अर्थः- (ङञणनमाः) ङ्, ञ्, ण्, न्, म् इत्येते अनुनासिकसंज्ञका वर्गपञ्चमा वर्णाः (स्वस्थाननासिकास्थानाः) स्वकीयस्थानाः सन्तो नासिकास्थाना भवन्ति। ङकारः कण्ठनासिक्यो ञकारस्तालुनासिक्यो णकारो मूर्धनासिक्यो नकारो दन्तमूलनासिक्यो मकारश्चौष्ठनासिक्य इति भावः।

२२. द्विवर्णानि सन्ध्यक्षराणि।

द्विवर्णानि १.३।। सन्ध्यक्षराणि १.३।।

समासः- द्वौ वर्णौ यस्य तत् द्विवर्णम्, तानि द्विवर्णानि-बहुव्रीहिः।

अर्थः- (सन्ध्यक्षराणि) ए, ऐ, ओ, औ इत्येतानि सन्ध्यक्षरसंज्ञकानि अक्षराणि (द्विवर्णानि) द्विस्वरयुक्तानि, द्विस्वरात्मकानि। द्वयोर्द्वयोः स्वरवर्णयोः मेलनेन सम्पन्नानीति भावः।

२३. सरेफ ऋवर्णः।

सरेफः १.१।। ऋवर्णः १.१।।

समासः- रेफेण सहित इति सरेफः बहुव्रीहिः। आ (ऋ) चासौ वर्णश्चेति ऋवर्णः-कर्मधारयः।

अर्थः- (ऋवर्णः) ऋकारः (सरेफः) रेफेण (रेफश्रुत्या) सहितो विद्यत इति ज्ञेयम्।

२४. (इति) संयुक्ताः वर्णाः।

(इति-अव्ययम्)।। संयुक्ताः १.३।। वर्णाः १.३।।

अर्थः-(इति) एवम् (संयुक्ताः) वर्णान्तरैः सम्पृक्ताः (वर्णाः) वर्णिताः।

२५. एवमेतानि स्थानानि।

एवम्-अव्ययम्।। एतानि १.३।। स्थानानि १.३।।

अर्थः- (एतानि) अनुपदमेव प्रत्यक्षतो ज्ञातानि (स्थानानि) सर्वाणि वर्णोत्पादकस्थानानि, वर्णोच्चारणस्थानानि (एवम्) इत्थम् समाप्तानि। 'तत्र स्थानं तावत्' (१.१) इति प्रतिज्ञातं स्थानप्रकरणं समाप्तमिति यावत्।

।। इति प्रथमं स्थानप्रकरणम्।।

अथ द्वितीयं करणप्रकरणम्

१. करणमपि।

करणम् १.१।। अपि-अव्ययम्।।

अर्थः- स्थानप्रकरणं समाप्य सम्प्रति (करणम्) वर्णोच्चारणाय साधकतमभूतं करणं साधनम् (अपि) चोच्यते, उपदिश्यते।

२. जिह्व्यतालव्यमूर्धन्यदन्त्यानां जिह्वा करणम्।

जिह्व्यतालव्यमूर्धन्यदन्त्यानाम् ६.३।। जिह्वा १.१।। करणम् १.१।।

समासः- जिह्व्याश्च तालव्याश्च मूर्धन्याश्च दन्त्याश्चेति जिह्व्यतालव्य-मूर्धन्यदन्त्याः, तेषां जिह्व्यतालव्यमूर्धन्यदन्त्यानाम्-इतरेतरयोगद्वन्द्वः। जिह्व्यादिषु सर्वत्र शरीरावयवत्वात् 'तत्र भव' इत्येतस्मिन्नर्थे पूर्ववद् यत्-प्रत्ययः।

अर्थः- (जिह्व्यतालव्यमूर्धन्यदन्त्यानाम्) जिह्व्यानां जिह्वामूलस्थानभवानां तालुस्थानभवानां मूर्धस्थानभवानां दन्तस्थानभवानाञ्च वर्णानाम् (करणम्) उच्चारणे प्रधानं साधनम् (जिह्वा) वागिन्द्रियमस्तीति विज्ञेयम्।

३. जिह्वामूलेन जिह्व्यानाम्।

जिह्वामूलेन ३.१।। जिह्व्यानाम् ६.३।।

समासः- जिह्वाया मूलम् इति जिह्वामूलम्, तेन जिह्वामूलेन-षष्ठीतत्पुरुषः।

अर्थः- (जिह्व्यानाम्) जिह्वामूलस्थानभवानां क, ख इत्येवमादीनाम् उच्चारणम् (जिह्वामूलेन) जिह्वाया मूलभागेन कर्तव्यम्। राम करोति, राम खनति इत्येवमादिषु कखाभ्यां प्रागर्धविसर्गसदृशो जिह्वामूलीयो

भवति। इत्थं जिह्वामूलीयस्य स्वरूपद्वये जिह्व्यानामिति बहुवचनं किमर्थम्? अत्रोच्यते- कवर्गावर्णानुस्वारजिह्वामूलीयानां जिह्वा एकेषामिति (वृद्ध.१.१५) मतं पुरस्कृत्यात्र सूत्रे जिह्व्यानामिति बहुवचनं वेदितव्यम्।

४. जिह्वामध्येन तालव्यानाम्।

जिह्वामध्येन ३.१।। तालव्यानाम् ६.३।।

समासः-जिह्वाया मध्य इति जिह्वामध्यः, तेन जिह्वामध्येन-षष्ठीतत्पुरुषः।

अर्थः-(तालव्यानाम्) तालुस्थानानाम् इ-चु-य-शानां वर्णानामुच्चारणम् (जिह्वामध्येन) जिह्वाया मध्यभागेन कर्त्तव्यम्। तालुस्थानभवानां करणं जिह्वामध्यभाग इति यावत्।

५. जिह्वोपाग्रेण मूर्धन्यानाम्।

जिह्वोपाग्रेण ३.१।। मूर्धन्यानाम् ६.३।।

समासः- अग्रस्य समीपम् इति उपाग्रम्-अव्ययीभावः। जिह्वाया उपाग्रम् इति जिह्वोपाग्रम्-षष्ठीतत्पुरुषः। इत्थम् अव्ययीभावगर्भतत्पुरुषः, तेन जिह्वोपाग्रेण।

अर्थः- (मूर्धन्यानाम्) मूर्धस्थानानाम् ऋ-टु-र-षाणां वर्णानामुच्चारणम् (जिह्वोपाग्रेण) जिह्वाग्रोपरितनभागेन कर्त्तव्यम्। मूर्धस्थानभवानां वर्णानां साधनं जिह्वाग्रोपरितनभाग इति भावः।

६. जिह्वाग्राधः करणं वा।

जिह्वाग्राधः १.१।। करणम् १.१।। वा-अव्ययम्।।

समासः- जिह्वाया अग्रम् इति जिह्वाग्रम्-षष्ठीतत्पुरुषः। जिह्वाग्रस्य अधः इति जिह्वाग्राधः- षष्ठीतत्पुरुषः।

अर्थः- (वा) अथवा (मूर्धन्यानाम्) पूर्वोक्तानां मूर्धस्थानानां वर्णानाम् (करणम्) साधकतमम् (जिह्वाग्राधः) जिह्वाया अधस्तनो भागः।

७. जिह्वाग्रेण दन्त्यानाम्।

जिह्वाग्रेण ३.१।। दन्त्यानाम् ६.३।।

समासः-जिह्वाया अग्रम् इति जिह्वाग्रम्, तेन जिह्वाग्रेण-षष्ठीतत्पुरुषः।

अर्थः- (दन्त्यानाम्) लृ-तु-ल-सानां दन्त्यानां वर्णानाम् उच्चारणम् (जिह्वाग्रेण) जिह्वाया अग्रिमभागेन कर्तव्यम्। दन्त्यानां जिह्वाग्रभागः करणम् इति यावत्।

८. शेषाः स्वस्थानकरणाः।

शेषाः १.३।। स्वस्थानकरणाः १.३।।

समासः-स्वं स्थानम् एव करणं येषां ते स्वस्थानकरणाः-बहुव्रीहिः। शेष उक्तादन्यः शेषः।

अर्थः-(शेषाः) अवशिष्टा: कण्ठ्या अकुहविसर्जनीया ओष्ठ्या उवर्ण-पवर्ग-उपध्मानीया वर्णा नासिक्या अनुस्वारयमाश्च वर्णाः (स्वस्थानकरणाः) स्वं स्वं स्थानमेव करणं साधनं येषां ते तादृशाः। अनुस्वारयमादय इत्यत्रादिशब्देन **हुँ इति नासिक्यः** (वा.प्रा. ८.२३) इति परिभाषितो वर्णो ग्राह्यः।

९. इत्येतत् करणम्।

इति-अव्ययम्।। एतत् १.१।। करणम् १.१।।

अर्थः-(एतत्) साम्प्रतमेवाधीतमिदम् (करणम्) करणविषयप्रतिपादकं प्रकरणम् (इति) एवं समाप्तिमगात्।

।। इति द्वितीयं करणप्रकरणम्।।

अथ तृतीयम् अन्तःप्रयत्नप्रकरणम्

१. प्रयत्नो द्विविधः।

प्रयत्नः १.१।। द्विविधः १.१।।

अर्थः-(प्रयत्नः) वर्णोच्चारणविषयको यत्नः (द्विविधः) द्विप्रकारकोऽस्ति।

२. आभ्यन्तरो बाह्यश्च।

आभ्यन्तरः १.१।। बाह्यः १.१।। च-अव्ययम्।।

अर्थः- (आभ्यन्तरः) आभ्यन्तरयत्नः (बाह्यः च) बाह्ययत्नश्चेति प्रयत्नस्य द्विविधत्वम्। आभ्यन्तरप्रयत्न एव मुखप्रयत्न-आस्यप्रयत्न-अन्तःप्रयत्न-करण-प्रदान- इत्येतैर्नामभिरप्युच्यते। भाष्यकारेण **ओष्ठात्प्रभृति प्राक्काकलकात्** (म.भ. १.१.९) इत्येवंरूपेणास्येत्येतस्य विवरणं प्रस्तुतम्। **काकलकं नाम ग्रीवायामुन्नतप्रदेशः** (कैय्यटः)। अस्मिन् आस्यभागे निष्पन्नः प्रयत्न आस्यप्रयत्न आभ्यन्तरप्रयत्नो वाभिधीयते। अस्माद् बहिर्भूतेभ्यो भागेभ्यो निष्पन्नः प्रयत्नो बाह्यप्रयत्न इति नाम्नोच्यते। एतदत्रावधेयम्- वर्णानामुच्चारणे पूर्वं बाह्यप्रयत्नः प्रवर्तते पश्चाच्च अन्तःप्रयत्नः।

३. स्वस्थान आभ्यन्तरस्तावत्।

स्वस्थाने ७.१।। आभ्यन्तरः १.१।। तावत्-अव्ययम्।।

समासः- स्वस्य स्थानमिति स्वस्थानम्, तस्मिन् स्वस्थाने-षष्ठीतत्पुरुषः।

अर्थः- (तावत्) बाह्ययत्नोपदेशात् पूर्वं (स्वस्थाने) वर्णानां पूर्वोपदिष्टे उच्चारणस्थाने (आस्ये) जायमानः (आभ्यन्तरः) आभ्यन्तरयत्न उच्यते।

४. स्पृष्टकरणाः स्पर्शाः।

स्पृष्टकरणाः १.३।। स्पर्शाः १.३।।

समासः-स्पृष्टं करणम्=प्रयत्नो येषां ते स्पृष्टकरणाः[१]-बहुव्रीहिः। जिह्वा वाधरोष्ठो वा यदा स्थानानि पूर्णतया स्पृशति तदा सा स्पृष्टतोच्यते (द्र. ८.२)।

अर्थः- (स्पर्शाः) स्पर्शसंज्ञकाः कादयो मावसानाः पञ्चविंशतिर्वर्णाः (स्पृष्टकरणाः) स्पृष्टाख्याभ्यन्तरप्रयत्नकाः। करणशब्दोऽत्राभ्यन्तर-प्रयत्नवाचकः। क्रिया करणम्। प्रयतनं प्रयत्नः।

५. ईषत्स्पृष्टकरणा अन्तस्थाः।

ईषत्स्पृष्टकरणाः १.३।। अन्तस्थाः १.३।।

समासः- ईषत् स्पृष्टं करणं येषां ते ईषत्स्पृष्टकरणाः- त्रिपदबहुव्रीहिः। ईषच्छब्दः स्वल्पवाचकः। तथा चामरः-**किञ्चिदीषन्मनागल्पे** (३.४.८)। जिह्वा वाधरोष्ठो वा यदा स्थानं किञ्चित् सामीप्येन स्पृशति, तदा सा ईषत्स्पृष्टतोच्यते (द्र. ८.३)।

अर्थः- (अन्तस्थाः) य्, र्, ल्, व् इत्येत अन्तस्थसंज्ञा वर्णाः (ईषत्स्पृष्टकरणाः) किञ्चित्स्पृष्टप्रयत्नाः।

६. ईषद्विवृतकरणा ऊष्माणः।

ईषद्विवृतकरणाः १.३।। ऊष्माणः १.३।।

समासः-ईषद् विवृतं करणं येषां ते ईषद्विवृतकरणाः-त्रिपदबहुव्रीहिः। जिह्वा वाधरोष्ठो वा यदा स्थानं किञ्चिद्दूरेण स्पृशति तदा सा ईषद्विवृततोच्यते (द्र. ८.४)।

अर्थः-(ऊष्माणः) ऊष्मसंज्ञकाः शषसहा वर्णाः (ईषद्विवृतकरणाः) किञ्चिद्- विवृताख्यप्रयत्नकाः।

---

१. स्पृष्टतानुगतं करणं कृतिर्येषां ते स्पृष्टकरणाः। (न्यासः १.१.९)

७. विवृतकरणा वा।

विवृतकरणाः १.३।। वा-अव्ययम्।।

समासः-विवृतं करणं येषां ते विवृतकरणाः-बहुव्रीहिः। उपरिष्टाद् ऊष्माण इत्यनुवर्तते। जिह्वा वाधरोष्ठो वा यदा स्थानं दूरेण स्पृशति तदा सा विवृततोच्यते (द्र.८.४)।

अर्थः- (वा) अथवा (ऊष्माणः) ऊष्मसंज्ञका इमे वर्णाः (विवृतकरणाः) विवृताख्याभ्यन्तरप्रयत्नकाः। भाष्यवार्तिककारयोस्तु 'ईषद्विवृतकरणा ऊष्माणः' इति मतं निश्चीयते 'नाज्झलौ' इति सूत्रस्य प्रत्याख्यातत्वात्। एवञ्च 'विवृतकरणा वा' इति सूत्रोक्तपक्ष एव पाणिन्यनुमोदितोऽवगम्यते[१]।

८. विवृतकरणाः स्वराः।

विवृतकरणाः १.३।। स्वराः १.३।।

समासः-पूर्ववद् बहुव्रीहिः।

अर्थः-(स्वराः) अकारादयः (विवृतकरणाः) विवृताख्यप्रयत्नकाः सन्ति।

९. तेभ्य ए ओ विवृततरौ।

तेभ्यः ५.३।। ए, ओ इति लुप्तविभक्तिकौ। विवृततरौ १.२।।

समासः- ते सर्वे विवृताः, अयं तेभ्य अतिशयेन विवृत इति विवृततरः, तौ विवृततरौ 'द्विवचनविभज्योपपदे तरबीयसुनौ' (अष्टा. ५.३.५७) इति तरप्-प्रत्ययः।

---

१. उदयनाचार्यास्तु स्वकीयशिक्षातत्त्वालोकभाष्ये 'ईषद्विवृतकरणा ऊष्माण' इत्यत्र ऊष्मपदेन 'शषसा' इति त्रीनेव वर्णानाहुः। अथ 'विवृतकरणा वा' इत्यत्र च अनुवर्तमानेन ऊष्माण इति बहुवचनान्तेन पदेन हकारमात्रस्यैव ग्रहणमिच्छन्ति, वा इति पदं चावधारणार्थकं व्याख्यान्ति। बहुवचनं चाविवक्षितमिति वदन्ति।

अर्थः-(तेभ्यः) उक्तस्वरवर्णेभ्यः (ए ओ) ए ओ इत्येतौ संयुक्तस्वरौ (विवृततरौ) अतिशयेन विवृतौ भवतः।

१०. ताभ्यामै औ।

ताभ्याम् ५.२।। ऐ औ-इति लुप्तविभक्तिकौ। विवृततरावित्यनुवर्तते।

अर्थः-(ताभ्याम्) ए-ओभ्याम् (ऐ औ) ऐ, औ चेत्येतौ वर्णौ (विवृततरौ) अतिशयेन विवृतौ भवतः।

११. ताभ्यामप्याकारः।

ताभ्याम् ५.२।। अपि-अव्ययम्।। आकारः १.१।। विवृततरावित्यनुवर्तते, तच्चैकवचनान्तेन विपरिणम्यते।

अर्थः-(ताभ्याम्) ऐ औ इत्येताभ्याम् (अपि) (आकारः) आवर्णो विवृततरः। ताभ्यामप्यधिको विवृतकरण इति यावत्।

१२. संवृतस्त्वकारः।

संवृतः १.१।। तु-अव्ययम्।। अकारः १.१।। तु-इति अव्ययपदं 'विवृतकरणाः स्वराः' (३.८) इति कथनव्यावृत्त्यर्थम्।

अर्थः-(अकारः) षट्प्रभेदात्मको ह्रस्वावर्णः (तु) (संवृतः) संवृतप्रयत्नः।

१३. इत्येषोऽन्तःप्रयत्नः।

इति-अव्ययम्।। एषः १.१।। अन्तःप्रयत्नः १.१।।

अर्थः-(इति) एवंप्रकारेण (एषः) 'प्रयत्नो द्विविधः' (३.१) इत्युपक्रम्य वर्णित एषः (अन्तःप्रयत्नः) मुखस्याभ्यन्तरे क्रियमाणस्य प्रयत्नस्य विषयः समाप्तिं गतः।

।। इति तृतीयम् अन्तःप्रयत्नप्रकरणम्।।

अथ चतुर्थं बाह्ययत्नप्रकरणम्

१. अथ बाह्याः प्रयत्नाः।

अथ-अव्ययम्।। बाह्याः १.३।। प्रयत्नाः १.३।।

अर्थः-(अथ) अन्तःप्रयत्ननिरूपणानन्तरमिदानीम् (बाह्याः प्रयत्नाः) बाह्या यत्ना निरूप्यन्ते।

२. वर्गाणां प्रथमद्वितीयाः शषसविसर्जनीयजिह्वामूलीयोपध्मानीया यमौ च प्रथमद्वितीयौ विवृतकण्ठाः श्वासानुप्रदाना अघोषाः।

वर्गाणाम् ६.३।। प्रथमद्वितीयाः १.३।। शषस... ध्मानीयाः १.३।। यमौ १.२।। च-अव्ययम्।। प्रथमद्वितीयौ १.२।। विवृतकण्ठाः १.३।। श्वासानुप्रदानाः १.३।। अघोषाः १.३।।

समासः-प्रथमाश्च द्वितीयाश्चेति प्रथमद्वितीयाः। शश्च षश्च सश्च विसर्जनीयश्च जिह्वामूलीयश्चोपध्मानीयश्च इति शषसविसर्जनीयजिह्वामूलीयोपध्मानीयाः। प्रथमश्च द्वितीयश्चेति प्रथमद्वितीयौ-सर्वत्रेतरेतरयोगद्वन्द्वः। विवृतः कण्ठः काकलको येषां ते विवृतकण्ठाः। श्वासोऽनु पश्चात् प्रदीयते येषामुच्चरणे ते श्वासानुप्रदानाः। अविद्यमानो घोषो येषामुच्चारणे त अघोषाः- त्रिष्वपि बहुव्रीहिः।

अर्थः-(वर्गाणाम्) कवर्ग-चवर्ग-टवर्ग-तवर्ग-पवर्गाणां (प्रथमद्वितीयाः) क्, च्, ट्, त्, प् इत्येते पञ्च प्रथमवर्णाः, ख्, छ्, ठ्, थ्, फ् इत्येते च पञ्च द्वितीयवर्णाः तथा च (शषसविसर्जनीयजिह्वामूलीयोपध्मानीयाः) श, ष, स्, :, क, प, इत्येते वर्णाः (यमौ च प्रथमद्वितीयौ) कुँ इति प्रथमयमः, खुँ इति द्वितीययमश्च, एते (विवृतकण्ठाः) विस्तृतस्वरयन्त्रमुखोद्भवाः (श्वासानुप्रदानाः) श्वासस्यानुप्रदानं कण्ठस्य विवृतत्वात् सुखेन निर्गमनं यत्र

तादृशाः (अघोषाः)[1] घोषरहिता भवन्ति। एते त्रयो बाह्ययत्नाः सन्त्युक्तानां वर्णानामिति यावत्।

३. वर्ग्ययमानां प्रथमा अल्पप्राणा इतरे सर्वे महाप्राणाः।

वर्ग्ययमानाम् ६.३।। प्रथमाः १.३।। अल्पप्राणाः १.३।। इतरे १.३।। सर्वे १.३।। महाप्राणाः १.३।।

समासः- वर्गे भवा वर्ग्याः 'दिगादिभ्यो यत्' (अष्टा. ४.३.५४) इति यत्-प्रत्ययः। वर्ग्याश्च यमाश्चेति वर्ग्ययमाः, तेषां वर्ग्ययमानाम्-इतरेतरयोगद्वन्द्वः। अल्पः प्राणो निर्गच्छति येषामुच्चारणे त अल्पप्राणाः। महान् प्राणो निर्गच्छति येषामुच्चारणे ते महाप्राणाः-बहुव्रीहिरुभयत्र।

अर्थः-(वर्ग्ययमानाम्) वर्ग्येषु वर्गस्थवर्णेषु यमेषु यमसंज्ञकवर्णेषु च (प्रथमाः) क-च-ट-त-पाः कुँ इति च प्रथमसंज्ञकाः (अल्पप्राणाः)। (इतरे) प्रथमातिरिक्ताः ख-छ-ठ-थ-फाः खुँ इति च द्वितीयाः तथा च श-ष-स-विसर्जनीयजिह्वामूलीय-उपध्मानीयाः, एते (सर्वे) वर्णास्तु (महाप्राणाः)।

४. वर्गाणां तृतीयचतुर्था अन्तस्था हकारानुस्वारौ यमौ च तृतीयचतुर्थौ नासिक्याश्च संवृतकण्ठा नादानुप्रदाना घोषवन्तश्च।

वर्गाणाम् ६.३।। तृतीयचतुर्थाः १.३।। अन्तस्थाः १.३।। हकारानु-स्वारौ-१.२।। यमौ १.२ ।। च-अव्ययम्।। तृतीयचतुर्थौ १.२।। नासिक्याः १.१।। च-अव्ययम्।। संवृतकण्ठाः १.३।। नादानुप्रदानाः १.३।। घोषवन्तः १.३।। च-अव्ययम्।।

समासः- तृतीयाश्च चतुर्थाश्च इति तृतीयचतुर्थाः। हकारश्चानुस्वारश्चेति हकारानुस्वारौ। तृतीयश्च चतुर्थश्चेति तृतीयचतुर्थौ-सर्वत्रेतरेतरयोगद्वन्द्वः। संवृतः कण्ठो येषां ते संवृतकण्ठाः। नादस्यानुप्रदानं यत्र कण्ठस्य संवृतत्वात् ते नादानुप्रदानाः-उभयत्र बहुव्रीहिः।

१. अनुरणनरूपाः

घोषोऽस्ति येषाम् (उच्चारणे) ते घोषवन्तः 'तदस्यास्त्यस्मिन्निति मतुप्' (अष्टा. ५.२.९४) इति मतुप्-प्रत्ययः। नासिकायां भवा नासिक्याः 'शरीरावयवाच्च' (अष्टा. ४.३.५५) इति यत्प्रत्ययः।

अर्थः-(वर्गाणाम्) कवर्ग-चवर्ग-टवर्ग-तवर्ग-पवर्गाणाम् (तृतीयचतुर्थाः) ग-ज-ड-द-बा घ-झ-ढ-ध-भाश्च (अन्तस्थाः) अन्तस्थसंज्ञका य-र-ल-वाः (हकारानुस्वारौ) हकार अनुस्वारः (अं) च (यमौ च तृतीयचतुर्थौ) तथा च 'गुँ' इति तृतीययमः, 'घुँ' इति च चतुर्थयमः (नासिक्यः च) हुँ इति नासिक्यसंज्ञको वर्णश्च (संवृतकण्ठाः) संवृतकाकलप्रभवाः (नादानुप्रदानाः) नादोत्तराः (घोषवन्तः च) घोषयुक्ताः। एते त्रयो बाह्ययत्नाः सन्ति ग-ज-आदीनां वर्णानामिति यावत्। संवृते गलबिले नादो जायते ततश्च तदनुरणनरूपो घोषः। विवृते च गलबिले सङ्कोचाभावात् श्वासोऽनुजायते न तु नादः। नादाभावे घोषस्य तदनुरणनरूपस्याप्यभावः।नादानुरणनरूपो घोष इति गीताश्लोकस्वारस्यादपि स्फुटी भवति- **सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान्** (गीता १.१२)**। स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत्** (गीता १.१९) **इति।**

५. वर्ग्ययमानां तृतीया अन्तस्थाश्चाल्पप्राणा इतरे सर्वे महाप्राणाः।

वर्ग्ययमानाम् ६.३।। तृतीयाः १.३।। अन्तस्थाः १.३।। च-अव्ययम्।। अल्पप्राणाः १.३।। इतरे १.३।। सर्वे १.३।। महाप्राणाः १.३।। वर्गे भवाः वर्ग्याः- 'दिगादिभ्यो यत्' (अष्टा. ४.३.५४) इति यत्प्रत्ययः।

समासः- वर्ग्याश्च यमाश्चेति वर्ग्ययमाः, तेषां वर्ग्ययमानाम्-इतरेतरयोगद्वन्द्वः। अल्पः प्राणो येषां त अल्पप्राणाः। महान् प्राणो येषां ते महाप्राणाः-उभयत्र बहुव्रीहिः।

अर्थः- (वर्ग्ययमानाम्) वर्ग्येषु वर्गस्थवर्णेषु यमेषु=यमसंज्ञकवर्णेषु च (तृतीयाः) ग-ज-ड-द-बाः 'गुँ' इति च तृतीयसंज्ञका यमाः (अन्तस्थाः) अन्तस्थसंज्ञका य-र-ल-वाश्च (अल्पप्राणाः) (इतरे) पूर्वसूत्रोक्ता-

स्तृतीयान्तस्थातिरिक्ता घ-झ-ढ-ध-भाः 'घुँ' इति च चतुर्थसंज्ञकास्तथा च हकारानुस्वारनासिक्या इत्येते (सर्वे) सर्वे वर्णाः (महाप्राणाः)।

६. यथा तृतीयास्तथा पञ्चमाः।

यथा-अव्ययम्।। तृतीयाः १.३।। तथा-अव्ययम्।। पञ्चमाः १.३।।

अर्थः- (तृतीयाः) ज-ब-ग-ड-दा इति तृतीयवर्णाः (यथा) यादृशा बाह्यप्रयत्नवन्तः (पञ्चमाः) ञ-म-ङ-ण-न-मा इति पञ्चमवर्णा अपि (तथा) तादृशा एव अर्थात् संवृतकण्ठा नादानुप्रदाना घोषवन्तोऽल्पप्राणाश्च भवन्तीति ज्ञेयम्।

७. आनुनासिक्यमेषामधिको गुणः।

आनुनासिक्यम् १.१।। एषाम् ६.३।। अधिकः १.१।। गुणः १.१।। अनुनासिकस्य भाव आनुनासिक्यम्। 'पञ्चमाः' इत्यनुवर्तते, षष्ठ्यन्तेन च विपरिणम्यते।

अर्थः- (एषाम्) उक्तानां पञ्चमवर्णानां [तृतीयेभ्यः] (आनुनासिक्यम्) अनुनासिकत्वम् (गुणः) (अधिकः) अतिरिक्तो विद्यते।

८. कादयो मावसानाः स्पर्शाः।

कादयः १.३।। मावसानाः १.३।। स्पर्शाः १.३।।

समासः-क आदिर्येषां ते कादयः। म अवसानं येषाम्, म अवसाने विद्यते येषां वेति मावसानाः-उभयत्र बहुव्रीहिः।

अर्थः-(कादयः) ककारात् प्रभृति (मावसानाः) मकारपर्यन्तं विद्यमानास्सर्वे पञ्चविंशतिर्वर्णाः (स्पर्शाः) स्पर्शाख्या ज्ञेयाः।

९. यादयोऽन्तस्थाः।

यादयः १.३।। अन्तस्थाः १.३।।

समासः-य आदिर्येषां ते यादयः-बहुव्रीहिः।

अर्थः-(यादयः) य-र-ल-वा इति यकारादयः (अन्तस्थाः) अन्तस्थसंज्ञाः सन्ति।

१०. शादय ऊष्माणः।

शादयः १.३।। ऊष्माणः १.३।।

समासः-श आदिर्येषां ते शादयः- बहुव्रीहिः।

अर्थः-(शादयः) श-ष-स-हा वर्णाः (ऊष्माणः) ऊष्माख्याः सन्ति।

११. सस्थानेन द्वितीयाः।

सस्थानेन ३.१।। द्वितीयाः १.३।।

समासः-समानं स्थानम् अवस्थानं बाह्यप्रयत्नात्मकं यस्य स ऊष्मसंज्ञकवर्णः सस्थानः=तुल्यः, तेन सस्थानेन। 'इत्थम्भूतलक्षणे' (अष्टा. २.३.२१) इत्यनेन तृतीया विभक्तिः[१]।

अर्थः-(सस्थानेन) समानस्थितिकेन ऊष्मणा वर्णेन (द्वितीयाः ख-छ-ठ-थ-फा ऊष्मतया लक्ष्यन्ते, बाह्यप्रयत्नदृष्ट्या तत्सदृशत्वात्[२]। ह-श-ष-साः ख-छ- आदीनां द्वितीयानां सस्थानाः, यथा ते ऊष्माणस्तथैव द्वितीया अपीति भावः। उभयोस्तुल्यत्वं सोष्मत्वम्।

---

१. अयं प्रकार इत्थम्, तं प्रकारविशेषं भूतः=प्राप्त इत्थम्भूतः। लक्षणम्=ज्ञापकम्। प्रकारविशेषं प्राप्तस्य ज्ञापके=सम्बन्धे द्योत्ये तृतीया स्यादिति तदर्थः। पूर्वसूत्रे शादीनां सोष्मत्वं विहितम्। सोष्मत्वरूपप्रकारविशेषं प्राप्तानां शादीनां लक्षणे द्योत्ये तृतीया जातेति लक्षणसमन्वयः।

२. पूर्वसूत्रमनुवर्त्य षष्ठ्यन्ते च विपरिणम्यैवमप्यर्थः कर्तुं शक्यते यत् 'शादीनाम् ऊष्मणां सस्थानेन=तुल्यत्वेन द्वितीया लक्ष्यन्ते=ज्ञायन्त इति।

१२. हकारेण चतुर्थाः।

हकारेण ३.१।। चतुर्थाः १.३।। इहापि पूर्ववद् इत्थम्भूतलक्षणे तृतीया तुल्यार्थयोगे वा।

अर्थः- (हकारेण) ऊष्मत्वप्रकारविशेषभूतहवर्णेन (चतुर्थाः) कवर्गादीनां घकारादयश्चतुर्थवर्णाः सोष्मत्वेन लक्ष्यन्ते। यथा हकार ऊष्मा, तथैव चतुर्था अपीति यावत्। पूर्वस्यायमपवादः।

१३. इत्येष बाह्यः प्रयत्नः।

इति-अव्ययम्।। एषः १.१।। बाह्यः १.१।। प्रयत्नः १.१।।

अर्थः-(एषः) अनुपदमेव प्रतिपादित एषः (बाह्यः) आस्यप्रयत्नभिन्नो बाह्यः (प्रयत्नः) (इति) एवंप्रकारेण समाप्तिमगात्।

।। इति चतुर्थं बाह्ययत्नप्रकरणम्।।

अथ पञ्चमं स्थानपीडनप्रकरणम्

१. तत्र स्पर्शयमवर्णकरो वायुरयःपिण्डवत् स्थानमभिपीडयति।

तत्र-अव्ययम्।। स्पर्शयमवर्णकरः १.१।। वायुः १.१।। अयः पिण्डवत्-अव्ययम्।। स्थानम् २.१।। अभिपीडयति-क्रियापदम्।।

समासः- स्पर्शाश्च यमाश्चेति स्पर्शयमाः-इतरेतरयोगद्वन्द्वः। स्पर्शयमाश्च ते वर्णाश्चेति स्पर्शयमवर्णाः- कर्मधारयतत्पुरुषः। तान् स्पर्शयमवर्णान् करोति-उत्पादयतीति स्पर्शयमवर्णकरः। अत्र वर्णानां करो वर्णकर इति षष्ठीतत्पुरुषो बोध्यः[१]। अयसः पिण्डम् अयःपिण्डम्-षष्ठीतत्पुरुषः। अयःपिण्डेन तुल्यम् आघातक्रिया अयःपिण्डवत्-'तेन तुल्यं क्रिया चेद्वतिः' (अष्टा. ५.१.११४) इति वतिप्रत्ययः।

अर्थः-(तत्र) वर्णोत्पादनार्थं क्रियमाणे प्रयत्ने (स्पर्शयमवर्णकरः) स्पर्शाख्यानां पञ्चविंशतेर्वर्णानां चतुर्णाञ्च यमानामुत्पादकः (वायुः) प्रयत्नप्रेरित ऊर्ध्वं चरन् वायुः (स्थानम्) कण्ठादि-वर्णोच्चारणस्थानम् (अयःपिण्डवत्) लोहगोलकवत् (अभिपीडयति) आहन्ति। करप्रेरितायोगोलकं कुड्यादिषु यथाघातं करोति तथैव वायुरपि स्पर्शयमानामुच्चारणे तत्तत्स्थान आघातं करोति इति यावत्।

२. अन्तःस्थवर्णकरो वायुर्दारुपिण्डवत्।

अन्तःस्थवर्णकरः १.१।। वायुः १.१।। दारुपिण्डवत्-अव्ययम्।।

समासः-अन्तस्थाश्च ते वर्णाश्चेति अन्तस्थवर्णाः- कर्मधारयतत्पुरुषः। तान् करोतीत्यन्तस्थवर्णकरः। अत्रापि पूर्ववत् षष्ठीतत्पुरुषो बोध्यः। दारुणः पिण्डं दारुपिण्डम्-षष्ठीतत्पुरुषः। दारुपिण्डेन तुल्यम् आघातक्रियेति दारुपिण्डवत्-'तेन तुल्यं क्रिया चेद्वतिः' (अष्टा. ५.१.११४) इति वतिप्रत्ययः। 'तत्र', 'स्थानम्', 'अभिपीडयति' इति चानुवर्तन्ते।

१. उपपदतत्पुरुषे तु 'कर्मण्यण्' इति विधानेन 'वर्णकार' इति स्यात्।

अर्थः- (तत्र) अन्तस्थवर्णोत्पत्त्यर्थं क्रियमाणे यत्ने (अन्तस्थवर्णकरः) अन्तस्थाख्यानां य-र-ल-वानां वर्णानां जनकः (वायुः) नाभितलात् फुफ्फुसमार्गेण मुखं प्रत्यागच्छन् (स्थानम्) यकारादीनामुच्चारणस्थानम् (दारुपिण्डवत् अभिपीडयति) हस्तप्रक्षिप्तदारुपिण्डं भित्त्यादिकं यथाहन्ति तथाहन्ति।

३. ऊष्मस्वरवर्णकरो वायुरूर्णापिण्डवत्।

ऊष्मस्वरवर्णकरः १.१।। वायुः १.१।। ऊर्णापिण्डवत्-अव्ययम्।।

समासः-ऊष्माणश्च स्वराश्चेति ऊष्मस्वराः-इतरेतरयोगद्वन्द्वः। ऊष्मस्वराश्च ते वर्णाश्चेति ऊष्मस्वरवर्णाः-कर्मधारयतत्पुरुषः। तेषाम् ऊष्मस्वरवर्णानां कर ऊष्मस्वरवर्णकरः, षष्ठीतत्पुरुषः। ऊर्णायाः पिण्डम् ऊर्णापिण्डम्-षष्ठीतत्पुरुषः। ऊर्णापिण्डेन तुल्यम् आहननम् इति ऊर्णापिण्डवत्- 'तेन तुल्यं.' (अष्टा ५.१.११४) इति वतिप्रत्ययः। 'तत्र' 'स्थानम्' 'अभिपीडयति' इति चानुवर्तन्ते।

अर्थः- (तत्र) ऊष्मणः स्वरांश्चोच्चारयितुं क्रियमाणे यत्ने (ऊष्मस्वरवर्णकरः) ऊष्मस्वरवर्णजननानुकूलः (वायुः) मुखदेशं प्राप्तः प्राणो वायुः (स्थानम्) ऊष्मस्वरवर्णानां कृत अनुकूलितं स्थानम् (अभिपीडयति) तथाघातं विदधाति (ऊर्णापिण्डवत्) यथा ऊर्णापिण्डम्।

।। इति पञ्चमं स्थानपीडनप्रकरणम्।।

अथ षष्ठं वृत्तिकारप्रकरणम्

१. एवं व्याख्याने वृत्तिकाराः पठन्ति-अष्टादशप्रभेदमवर्णकुलमिति। तत् कथमुक्तम्।

एवम्-अव्ययम्।। व्याख्याने ७.१।। वृत्तिकाराः १.३।। पठन्ति-क्रियापदम्।। अष्टादशप्रभेदम् १.१।। अवर्णकुलम् १.१।। इति- अव्ययम्।। तत् १.१।। कथम्-अव्ययम्।। उक्तम् १.१।।

समासः-वृत्तिं कुर्वन्तीति वृत्तिकाराः- उपपदतत्पुरुषः। अष्टादश प्रभेदाः सन्ति यस्य तद् अष्टादशप्रभेदम्-बहुव्रीहिः। अश्चासौ वर्णश्चेति अवर्णः, अवर्णस्य कुलम् इति अवर्णकुलम्- कर्मधारयगर्भषष्ठीतत्पुरुषः।

अर्थः- (वृत्तिकाराः) सूत्रार्थप्रधानो ग्रन्थो वृत्तिः, तां कुर्वन्ति रचयन्तीति वृत्तिकाराः। ते (व्याख्याने) सूत्र-व्याख्याने (एवम्) इत्थम् (पठन्ति) वर्णयन्ति यत् (अवर्णकुलम्) ह्रस्वादिभेदेन भिन्नानामवर्णानां वृन्दम् (अष्टादशप्रभेदम्) अष्टादशसंख्यम् (इति) एवम्। (तत्) तदष्टादशप्रभेदम् (कथम्) कथं भवतीति जिज्ञासायाम् (उक्तम्) गदितं यत्-

२. ह्रस्वदीर्घप्लुतत्वाच्च त्रैस्वर्य्योपनयेन च।
आनुनासिक्यभेदाच्च संख्यातोऽष्टादशात्मकः।।

ह्रस्वदीर्घप्लुतत्वात् ५.१।। च-अव्ययम्।। त्रैस्वर्य्योपनयेन ३.१।। च-अव्ययम्।। आनुनासिक्यभेदात् ५.१।। च-अव्ययम्।। संख्यातः-अव्ययम्।। अष्टादशात्मकः १.१।। इति-अव्ययम्।।

समासः-ह्रस्वश्च दीर्घश्च प्लुतश्च इति ह्रस्वदीर्घप्लुताः-इतरेतरयोगद्वन्द्वः। तेषां भावो ह्रस्वदीर्घप्लुतत्वम्, तस्माद् ह्रस्वदीर्घप्लुतत्वाद्। त्रयश्च ते स्वराश्चेति त्रिस्वराः-कर्मधारयः। त्रिस्वरा एव त्रैस्वर्य्यमिति स्वार्थे ष्यञ्। त्रैस्वर्य्यस्य उपनयः-त्रैस्वर्य्योपनयः, तेन त्रैस्वर्य्योपनयेन-षष्ठीतत्पुरुषः।

अनुनासिकस्य भावः-आनुनासिक्यम्, तस्य भेद इति आनुनासिक्यभेदः, तस्माद् आनुनासिक्यभेदात्-षष्ठीतत्पुरुषः।

अर्थः-(ह्रस्वदीर्घप्लुतत्वात्) अ, आ, अ३/आ३ इति ह्रस्व-दीर्घ-प्लुत-भेदेन त्रिविधोऽवर्णः। तत्रापि प्रत्येकं (त्रैस्वर्योपनयेन) उदात्तानुदात्तस्वरितैर्युक्तत्वात् नवात्मकोऽवर्णः। पुनश्च प्रत्येकं (आनुनासिक्यभेदात्) निरनुनासिक-सानुनासिकभेदेन (अष्टादशात्मकः) अष्टादशात्मकोऽवर्ण इति (संख्यातः) परिगणितो ज्ञेयः।

३. एवमिवर्णादयः।

एवम्-अव्ययम्।। इवर्णादयः १.३।।

समासः-इवर्ण आदिर्येषां त इवर्णादयः-बहुव्रीहिः।

अर्थः-(एवम्) पूर्वोक्तप्रकारेणैव (इवर्णादयः) इकारादयोऽपि स्वरा अष्टादशप्रभेदाः सन्ति।

४. लृवर्णस्य दीर्घा न सन्ति।

लृवर्णस्य ६.१।। दीर्घाः १.३।। न-अव्ययम्।। सन्ति- क्रियापदम्।।

समासः- ला (लृ) चासौ वर्णश्चेति लृवर्णः-कर्मधारयतत्पुरुषः।

अर्थः-(लृवर्णस्य) लृकारस्य (दीर्घाः) उदात्तादिभेदोपभेदभूता दीर्घवर्णाः (न) नहि (सन्ति) वर्तन्ते।

५. तं द्वादशप्रभेदमाचक्षते।

तम् २.१।। द्वादशप्रभेदम् २.१।। आचक्षते-क्रियापदम्।।

समासः- द्वादश प्रभेदाः सन्ति यस्य स द्वादशप्रभेदः, तं द्वादशप्रभेदम्-बहुव्रीहिः।

अर्थः-(तम्) तमदीर्घं लृवर्णम् (द्वादशप्रभेदम्) द्वादशविधम् (आचक्षते) वदन्ति।

६.यदृच्छाशब्देऽशक्तिजानुकरणेवायदादीर्घाःस्युस्तदाष्टादशप्रभेदं ब्रुवते क्लृपक इति।

यदृच्छाशब्दे ७.१।। अशक्तिजानुकरणे ७.१।। वा-अव्ययम्।। यदा-अव्ययम्।। दीर्घाः १.१।। स्युः-क्रियापदम्।। तदा-अव्ययम्।। अष्टादशप्रभेदम्- २.१।। ब्रुवते-क्रियापदम्। क्लृपकः १.१।। इति-अव्ययम्।।

'ऋच्छनम्' इति ऋच्छा-'गुरोश्च हलः' (अष्टा. ३.३.१०३) इति सूत्रेण 'ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु' (तु. १५) इति धातोरप्रत्ययः, ततष्टाप् (अष्टा.४.१.४।

समासः-या चासौ ऋच्छा चेति यदृच्छा-विशेषणतत्पुरुषः, कर्मधारयः (अष्टा. २.१.५६)। यदृच्छया स्वेच्छया उत्पन्नः शब्द इति यदृच्छाशब्दः, तस्मिन् यदृच्छाशब्दे। न शक्तिरित्यशक्तिः-नञ्तत्पुरुषः। अशक्त्या जायत इत्यशक्तिजः-उपपदसमासः। अशक्तिजस्य अनुकरणम् अशक्तिजानुकरणम्, तस्मिन् अशक्तिजानुकरणे-षष्ठीतत्पुरुषः। अष्टादश प्रभेदा विद्यन्ते यस्य स अष्टादशप्रभेदः, तम् अष्टादशप्रभेदम्-बहुव्रीहिः।

अर्थः-(यदृच्छाशब्दे) स्वेच्छयोत्पन्ने शब्दे (वा) अथवा (अशक्तिजानुकरणे) असामर्थ्यवशाज्जातानामुच्चारितानां वा शब्दानामनुकरणे (यदा) (दीर्घाः) दीर्घलृवर्णाः (स्युः) भवेयुः (तदा) तदानीम् (अष्टादशप्रभेदम्) लृवर्णम् अष्टादशप्रभेदम् (ब्रुवते) कथयन्ति। यथा-क्लृपक इति।

७. सन्ध्यक्षराणां ह्रस्वा न सन्ति।

सन्ध्यक्षराणाम् ६.३।। ह्रस्वाः १.३।। न-अव्ययम्।। सन्ति-क्रियापदम्।।

अर्थः- (सन्ध्यक्षराणाम्) ए-ऐ-ओ-औ इत्येतेषां सन्ध्यक्षरसंज्ञकानां वर्णानाम् (ह्रस्वाः) ह्रस्वसंज्ञका वर्णाः (न) नहि (सन्ति) भवन्ति। एतेषां दीर्घप्लुता एव भवन्तीति यावत्।

८. तान्यपि द्वादशप्रभेदानि।

तानि १.३।। अपि-अव्ययम्।। द्वादशप्रभेदानि १.३।।

समासः-द्वादश प्रभेदाः सन्ति येषां तानि द्वादशप्रभेदानि-बहुव्रीहिः।

अर्थः-लृवर्णवत् (तानि) सन्ध्यक्षराणि (अपि) च (द्वादशप्रभेदानि) द्वादशप्रकाराणि भवन्ति।

९. छन्दोगानां सात्यमुग्रिराणायनीया अर्धमेकारमर्धमोकारं (च) पठन्ति।

छन्दोगानाम् ६.३।। सात्यमुग्रिराणायनीयाः १.३।। अर्धम् २.१।। एकारम्-२.१।। अर्धम् २.१।। ओकारम् २.१।। च-अव्ययम्।। पठन्ति-क्रियापदम्।। छान्दोगानामिति निर्धारणे षष्ठी 'यतश्च निर्धारणम्' (अष्टा. २.३.४१) इति।

समासः-छन्दांसि गायन्तीति छन्दोगाः-उपपदतत्पुरुषः। सात्यमुग्रयश्चामी राणायनीयाश्चेति सात्यमुग्रिराणायनीयाः- कर्मधारयः।

अर्थः-(छन्दोगानाम्) सामगानां मध्ये (सात्यमुग्रिराणायनीयाः) सात्यमुग्रि- राणायनीयसामशाखाया अध्येतारः (अर्धम् एकारम्) ह्रस्वमेकारम् (अर्धम् ओकारम् च) ह्रस्वमोकारञ्च (पठन्ति) अधीयते।

१०. तेषामप्यष्टादशप्रभेदानि।

तेषाम् ६.३।। अपि-अव्ययम्।। अष्टादशप्रभेदानि १.३।।

समासः- अष्टादश प्रभेदाः सन्ति येषां तानि अष्टादशप्रभेदानि सन्ध्यक्षराणि- बहुव्रीहिः। 'तान्यपि.' (६.८) इत्यतो मण्डूकप्लुतगत्या 'तानि' इत्यनुवर्तते।

अर्थः-(तेषाम्) सात्यमुग्रिराणायनीयानां मते[१](तानि) सन्ध्यक्षराणि (अपि) अवर्णादिवत् (अष्टादशप्रभेदानि) अष्टादशप्रकाराणि भवन्ति।

११. अन्तस्था द्विप्रभेदा रेफवर्जिताः सानुनासिका निरनुनासिकाश्च।

अन्तस्थाः १.३।। द्विप्रभेदाः १.३।। रेफवर्जिताः १.३।। सानुनासिकाः १.३।। निरनुनासिकाः १.३।। च-अव्ययम्।।

समासः-द्वौ प्रभेदौ स्तो येषां ते द्विप्रभेदाः-बहुव्रीहिः। रेफो वर्जितो येषु ते रेफवर्जिताः-बहुव्रीहिः। वाहिताग्न्येराकृतिगणत्वान्निष्ठान्तस्य परनिपातो बोद्धव्यः। अनुनासिकेन सह विद्यन्त इति सानुनासिकाः-बहुव्रीहिः। निर्गता अनुनासिकादिति निरनुनासिकाः, प्रादितत्पुरुषः।

अर्थः-(रेफवर्जिताः) र-वर्णविरहाः (अन्तस्थाः) अन्तस्थसंज्ञका य-ल-वाः (सानुनासिकाः) अनुनासिकसहिताः (निरनुनासिकाः) अनुनासिकरहिताः (च) (द्विप्रभेदाः) द्विविधा इति ज्ञेयाः।

१२. रेफोष्मणां सवर्णा न सन्ति।

रेफोष्मणाम् ६.३।। सवर्णाः १.३।। न-अव्ययम्।। सन्ति-क्रियापदम्।।

समासः-रेफश्च ऊष्माणश्चेति रेफोष्माणः, तेषां रेफोष्मणाम्- इतरेतरयोगद्वन्द्वः। समाना वर्णाः सवर्णाः, समानजातीया वा वर्णाः सवर्णाः।

अर्थः-(रेफोष्मणाम्) रेफस्य ऊष्मसंज्ञकानां श-ष-स-हानां च (सवर्णाः) समानजातीया (न) नहि (सन्ति) विद्यन्ते।

---

१. सन्ध्यक्षराणां ह्रस्वत्वस्वीकारपक्ष इति भाव।

१३. वर्ग्यो वर्ग्येण सवर्णः।

वर्ग्यः १.१।। वर्ग्येण ३.१।। सवर्णः १.१।।

समासः- वर्गे भवो वर्ग्यः- भवार्थे 'दिगादिभ्यो यत्' (अष्टा. ४.३.५४) इति यत्प्रत्ययः।

अर्थः-(वर्ग्यः) कु चु टु तु पु इत्येवमादिषु वर्गेषु विद्यमानः कश्चिदपि वर्णः (वर्ग्येण) स्व-स्ववर्गस्थवर्णेन सह (सवर्णः) सवर्णसञ्ज्ञो भवति।

।। इति षष्ठं वृत्तिकारप्रकरणम्।।

अथ सप्तमं क्रमप्रकरणम्

अथातो वर्णसमाम्नायं व्याख्यास्यामः।।१।।

तत्र स्वराः प्रथमम्।।२।।

अ इति आ इति आ३ इति इ इति ई इति ई३ इति उ इति ऊ इति ऊ३ इति ऋ इति ॠ इति ॠ३ इति ऌ इति ल३ इति।।३।।

अथ सन्ध्यक्षराणि।।४।।

ए इति ए३ इति ऐ इति ऐ३ इति ओ इति ओ३ इति औ इति औ३ इति।।५।।

इति स्वराः।।६।।

अथ व्यञ्जनानि।।७।।

किति खिति गिति घिति ङिति कवर्गः।।८।।

चिति छिति जिति झिति ञिति चवर्गः।।९।।

टिति ठिति डिति ढिति णिति टवर्गः।।१०।।

तिति थिति दिति धिति निति तवर्गः।।११।।

पिति फिति बिति भिति मिति पवर्गः।।१२।।

इति स्पर्शाः।।१३।।

अथान्तस्थाः।।१४।।

यिति रिति लिति विति।।१५।।

अथोष्माणः।।१६।।

शिति षिति सिति हिति।।१७।।

अथायोगवाहाः।।१८।।

अः इति विसर्जनीयः।।२२।।

कः इति जिह्वामूलीयः।।१९।।

पः इत्युपध्मानीयः।।२०।।

अं इत्यनुस्वारः।।२१।।

हुँ इति नासिक्यः।।२३।।

कुँ खुँ गुँ घु इति यमाः।।२४।।

(इति व्यञ्जनानि) -वा.प्रा.८.१-२४।

१. एष क्रमो वर्णानाम्।

पूर्वप्रकरणे वर्णभेदा निर्दिष्टाः- अ, इ, उ, ऋ, लृ, ए, ऐ, ओ, औ इति नव स्वराः, तेषां भेदाश्च वृत्तिकारनिर्दिष्टसरण्या सप्तविंशतिः। कादयो मावसानाः स्पर्शाः पञ्चविंशतिः, यादय अन्तस्थाश्चत्वारः, शादय ऊष्माणश्चत्वारः, अं, अः इत्यतः परावनुस्वारविसर्जनीयौ, ≍क ≍ख इति कखाभ्यां परोऽर्द्धविसर्गसदृशः जिह्वामूलीयः, ≍प ≍फ इति पफाभ्यां परोऽर्द्धविसर्गसदृश उपध्मानीयः, एते चत्वारोऽयोगवाहान्तर्गताः, कुं, खुं, गुं, घुं इति चत्वारो यमाश्चेत्यष्टौ अयोगवाहाः, इत्थमष्टावयोगवाहाः परिगणण्यन्ते। एते साकल्येन त्रिषष्टिर्वर्णाः। केषाञ्चिन्मते 'हुं' इति नासिक्योऽपि वर्णः परिगण्यते, तन्मते चतुष्षष्टिर्वर्णाः[१]।

एषः १.१।। क्रमः १.१।। वर्णानाम् ६.३।।

अर्थः-(वर्णानाम्) अकारादिवर्णानाम् (एषः) वृत्तिकारैः प्रदर्शित उपरितनः (क्रमः) विज्ञातव्यः।

---

१. त्रिषष्टिः चतुष्षष्टिर्वर्णाः शम्भुमते मताः।
वर्णास्त्रिषष्टिः। चतुष्षष्टिरित्येके। (वृद्धपाठः)

तथैते कौशिकीयाः श्लोकाः-

सर्वान्तेऽयोगवाहत्वाद् विसर्गादिरिहाष्टकः।
अकार उच्चारणार्थो व्यञ्जनेष्वनुबध्यते।।१।।

क पयोः कपकारौ च तद्वर्गीयाश्रयत्वतः।
पलिक्क्ँनी चक्ख्ँनतुर्जग्ग्ँमिर्जघ्घ्ँनुरित्यत्र यद्वपुः।।२।।

नासिक्येनोक्तं कादीनां त इमे यमाः।
तेषामुकारः सस्थानवर्गीयलक्षकः।।३।।

सर्वान्ते (स्वर-स्पर्श-अन्तस्थ-ऊष्मवर्णप्रतिपादनानन्तरम्) कौशिकाचार्यस्येमे श्लोका भवन्ति- अयोगवाहत्वेति हेतोर्विसर्गादिरष्टकः= अष्टसंख्याको वर्णसमूहः (विसर्जनीय- जिह्वामूलीय-उपध्मानीय-अनुस्वाराश्चत्वारो यमाश्च) 'अयोगवाह' इति नाम्नाभिधीयते। व्यञ्जनेष्वकारसहितपाठस्य प्रयोजनमस्ति- केवलमुच्चारणमात्रम्। 'कुप्वोः ᳵक ᳶपौ च' (अष्टा.८.३.३७) इत्यादौ जिह्वामूलीय उपध्मानीयश्चेति वर्णद्वयेन सार्द्धं यौ ह्युत्तरवर्त्तिनौ कपकारौ पठ्येते तौ तद्वर्गीयाश्रयत्वं द्योतयितुम्। पाणिनिना 'क-ख' इति वर्णद्वये परतो विसर्जनीयस्य स्थाने 'जिह्वामूलीय' इत्यादेशो विधीयते, 'प-फ' इत्येतयोश्च परत 'उपध्मानीयः' इति।

पलिक्क्ँनी, चक्ख्ँनतुः, जग्ग्ँमिः, जघ्घ्ँनुरित्यत्र कादीनां उत्तरवर्त्तिनासिक्येन सम्बद्धं तेनोपरक्तं यद्वपुर्यत्स्वरूपं नासिक्यात्मकम्, तद् 'यम' इति नाम्नोच्यते। 'कुँ खुँ गुँ घुँ' इत्यादौ य उकारोऽस्ति स तस्य तस्य वर्णस्याधस्तात् तस्मिन् तस्मिन् वर्गे ये समानावस्थाना वर्णास्सन्ति तेषां लक्षकः=ज्ञापकः संकेतको वास्तीति। यथा 'कुँ' इत्यत्र य उकारः स 'च-ट-त-प' इत्येतेषां वर्णानां ज्ञापकः। तथैव खुँ-गुँ-घुँ इत्यत्राप्यवगन्तव्यम्।

२. तत्रैषां स्थानकरणप्रयत्नानां कथं प्रसिद्धिरित्युच्यते।

तत्र-अव्ययम्।। एषाम् ६.३।। स्थानकरणप्रयत्नानाम् ६.३।। कथम्-अव्ययम्।। प्रसिद्धिः १.१।। इति-अव्ययम्।। उच्यते-क्रियापदम्।।

समासः- स्थानञ्च करणञ्च प्रयत्नश्चेति स्थानकरणप्रयत्नाः, तेषां स्थानकरण- प्रयत्नानाम्-इतरेतरयोगद्वन्द्वः।

अर्थः-(तत्र) प्रदर्शिते वर्णक्रमे (एषाम्) विद्यमानानामेषां वर्णानाम् (स्थानकरणप्रयत्नानाम्) (प्रसिद्धिः) व्युत्पत्तिः (कथम्) कथं भवति (इति) (उच्यते) कथ्यते।

३. इह यत्र स्थाने वर्णा उपलभ्यन्ते तत् स्थानम्।

इह-अव्ययम्।। यत्र-अव्ययम्।। स्थान ७.१।। वर्णाः १.३।। उपलभ्यन्ते-क्रियापदम्।। तत् १.१।। स्थानम् १.१।। 'इत्युच्यते' इत्यनुवर्तते।।

अर्थः-(इह) एषु त्रिषु स्थानं तावद् उच्यते (यत्र) यस्मिन् मुखाद्यवयवभूते (स्थाने) वर्णोत्पत्त्यधिकरणे (वर्णाः) अकारादयो वर्णाः (उपलभ्यन्ते) उच्चरिताः प्राप्यन्ते, श्रूयन्ते (तत्) (स्थानम्) स्थानम् इत्युच्यते।

४. येन निर्वर्त्त्यन्ते तत् करणम्।

येन ३.१।। निर्वर्त्त्यन्ते-क्रियापदम्। तत् १.१।। करणम् १.१।। वर्णाः, इत्युच्यते' इत्यनुवर्तेते।

अर्थः-(येन) साधनभूतावयवेन (वर्णाः) (निर्वर्त्त्यन्ते) क्रियन्ते=उत्पाद्यन्ते (तत्) साधनम् (करणम्) (इत्युच्यते) इति कीर्त्त्यते।

५. प्रयतनं प्रयत्नः।

प्रयतनम् १.१।। प्रयत्नः१.१ ।।

समासः-प्रकृष्टं यतनमिति प्रयतनम्। प्रकृष्टो यत्न इति प्रयत्नः-उभयत्र प्रादिसमासः। 'इत्युच्यते' इत्यनुवर्तते।

अर्थः-(प्रयतनम्) प्रकृष्टं यतनम्, वर्णानामुच्चारणयोग्यः प्रयासः (प्रयत्नः) (इत्युच्यते) इति कथ्यते।

६. उत्साहः प्रयत्नः।

उत्साहः १.१।। प्रयत्नः १.१।। 'इत्युच्यते' इत्यनुवर्तते।

अर्थः- (उत्साहः) प्रयासो विवक्षा वा (प्रयत्नः) (इत्युच्यते) इत्यभिधीयते।

७. स्पृष्टतादिर्वर्णगुणः।

स्पृष्टतादिः १.१।। वर्णगुणः १.१।।

समासः- स्पृष्टता आदिर्यस्य (समुदायस्य) स्पृष्टतादिः-बहुव्रीहिः। वर्णस्य गुणः वर्णगुणः-षष्ठीतत्पुरुषः।

अर्थः-(स्पृष्टतादिः) स्पृष्टतेषत्स्पृष्टतादिप्रयतनम् (वर्णगुणः) वर्णस्य गुणः।

।। इति सप्तमं क्रमप्रकरणम्।।

अथाष्टमं नाभितलप्रकरणम्

१. तत्र नाभिप्रदेशात् प्रयत्नप्रेरितः प्राणो नाम वायुरूर्ध्वमाक्रामन्नुर-आदीनां स्थानानामन्यतमस्मिन् स्थाने प्रयत्नेन विधार्यते। विधार्यमाणः सोऽपि तत्स्थानानि विहन्ति। तस्मात् स्थानाभिघाताद् ध्वनिरुत्पद्यत आकाशे, सा वर्णश्रुतिः। स वर्णस्यात्मलाभः।

अर्थः-(तत्र) वर्णोत्पादने यत्न एवं भवति (प्रयत्नप्रेरितः) '**आत्मा बुद्ध्या समर्थ्यार्थान्**' इति श्लोकोक्तरीत्या आत्मनः प्रयत्नेन प्रेरितः (प्राणो नाम) उच्छ्वासात्मकः प्राणसंज्ञः (वायुः) अनिलः (नाभिप्रदेशात्) नाभिदेशतः (ऊर्ध्वम्) उपरि (आक्रामन्) उद्गच्छन् (उरआदीनां स्थानानाम्) उरः- कण्ठ-आदीनां स्थानानां मध्ये (अन्यतमस्मिन्) कस्मिंश्चिदेकस्मिन्नीप्सिते (स्थाने) कण्ठाद्यवयवे (प्रयत्नेन) यत्नेन (विधार्यते) धारितो भवति, अवरुद्धो भवति। (सः अपि) स एव (विधार्यमाणः) धारितः सन् (तत्स्थानानि) तानि स्थानानि (विहन्ति) अभिपीडयति। (तस्मात्) तेन (स्थानाभिघाताद्) स्थानाभिघातेन, स्थानपीडनेन (आकाशे) मुखाकाशे (ध्वनिः) शब्दः (उत्पद्यते) जायते, तस्मिन्नुत्पन्ने बाह्याकाशे यद्वर्णस्य श्रवणं भवति (सा) (वर्णश्रुतिः) वर्णश्रुतिरुच्यते। (सः) स एव (वर्णस्य) श्रुतस्य वर्णस्य (आत्मलाभः) स्वरूपोपलब्धिः, वर्णत्वमापन्नः स ध्वनिरेव शब्द इत्युच्यते।

२. तत्र वर्णध्वनावुत्पद्यमाने यदा[१] स्थानकरणं प्रयत्नपर्यन्तं परस्परं स्पृशति सा स्पृष्टता।

समासः- स्थानञ्च करणञ्चेति स्थानकरणम्-समाहारद्वन्द्वः।

---

१. स्थानकरणप्रयत्नपर्यन्तमिति उपलब्धपाठः, स्थानकरणं प्रयत्नपर्यन्तमिति शोधितपाठः।

अर्थः- (तत्र) तस्मिन् वर्णध्वनौ (उत्पद्यमाने) जन्यमाने (यदा) (स्थानकरणम्) (प्रयत्नपर्यन्तम्) प्रयत्ननिष्पत्तिं यावत् (परस्परम्) मिथः (स्पृशति) स्पर्शं करोति, तदा (सा) (स्पृष्टता) आभ्यन्तरप्रयत्नरूपा।

३. यदेषत् स्पृशति सा ईषत्स्पृष्टता।

अर्थः-(यदा) स्वरोच्चारणे स्थानकरणं परस्परम् (ईषत्) किञ्चित्, स्वल्पम् (स्पृशति) प्रयत्ननिष्पत्तिपर्यन्तं तदा (सा) (ईषत्स्पृष्टता) आभ्यन्तरप्रयत्नरूपा कथ्यते।

४. यदा दूरेण स्पृशति सा विवृतता।।

अर्थः-(यदा) स्थानकरणं परस्परम् (दूरेण) दूरतः (स्पृशति) प्रयत्ननिष्पत्तिं यावत्, तदा (सा) आभ्यन्तरचेष्टा (विवृतता) आभ्यन्तरप्रयत्नरूपाभिधीयते। यथा-हकारस्वराणां विवृतः प्रयत्नः (३.७, ८)।

५. यदा सामीप्येन स्पृशति सा संवृतता।

अर्थः- (यदा) स्थानकरणं परस्परम् (सामीप्येन) अदूरतः (स्पृशति) संस्पृशति, तदा (सा) (संवृतता) आभ्यन्तरप्रयत्नरूपा भवति। यथा अकारस्य संवृतः प्रयत्नः (३.१२)।

६. एषोऽन्तः प्रयत्नः।

अर्थः-(एषः) अनुपदमेव वर्णित एष (अन्तःप्रयत्नः) अन्तःप्रयत्नविषयः समाप्तः।

७. अथ बाह्यः प्रयत्नः।

अर्थः-(अथ) अन्तःप्रयत्नानन्तरं (बाह्यः प्रयत्नः) बाह्ययत्नः प्रारभ्यते।

८. स एवेदानीं प्राणो नाम वायुरूर्ध्वमाक्रम्य मूर्ध्नि प्रतिहते निवृत्तो भवति, तदा कण्ठे संहन्यमाने गलबिलस्य संवृतत्वात् संवारो नाम वर्णधर्मो जायते, विवृतत्वाद् विवारः।

अर्थः-(इदानीम्) सम्प्रति (स एव) आत्मनः प्रयत्नेन प्रेरितः स एव (प्राणो नाम) प्राणसंज्ञकः (वायुः) (ऊर्ध्वम्) उपरि (आक्रम्य) उद्गम्य (मूर्ध्नि) वेगातिशयात् मुखस्योच्चतमभागे[१] (प्रतिहते) सङ्घट्टिते सति (निवृत्तः) पृष्ठतो निवृत्तो भवति। (तदा) तदानीम् (कण्ठे) गलबिले (संहन्यमाने) संपीड्यमाने (गलबिलस्य) कण्ठबिलस्य, स्वरयन्त्रमुखस्य (संवृतत्वात्) संकुचितत्वाद्, संकीर्णत्वाद् (संवारो नाम) संवारनामकः (वर्णधर्मः) वर्णगुणः (जायते) उत्पद्यते, कण्ठबिलस्य (विवृतत्वाद्) प्रसृतत्वाद्, विततत्वाद् (विवारः) विवारनामको वर्णधर्मो जायते।

१. तत्र पूर्वं स्पृष्टतादयश्चत्वारः, पश्चान्मूर्धनि प्रतिहते निवृत्ते प्राणाख्ये वायौ विवारादयो बाह्या एकादश प्रयत्ना उत्पद्यन्ते (म.भा. प्रदीप १.१.९)।

२. तत्राभ्यन्तरश्चतुर्धा स्पृष्टता ईषत्स्पृष्टता विवृतता संवृतता चेति... एषां चतुर्णामप्याभ्यन्तरत्वं वर्णोत्पत्तिप्राग्भावित्वात्।....बाह्याः प्रयत्नाः पुनरेकादश विवारः, संवारः...एते च वर्णोत्पत्तेः: पश्चान्मूर्ध्नि प्रतिहते निवृत्ते प्राणाख्ये वायौ उत्पद्यन्ते। अत एव बाह्या इत्युच्यन्ते (श.कौ.-१.१.९)।

३. शब्दप्रयोगेच्छोत्पन्नयत्नाभिहताग्निप्रेरितनाभिप्रदेशगतवायुवेगान्मूर्धानं गत्वा प्रतिनिवृत्तो वक्त्रं प्राप्य यत्नविशेषसहायः ताल्वादितत्तत्स्थानेषु जिह्वाग्रादिस्पर्शपूर्वकमभिहतो वर्णविशेषानभिव्यनक्तीति त एते आभ्यन्तरप्रयत्नाः। ततो यत्नविशेषैर्गलविवरविकासादीन् करोति। त एते बाह्यप्रयत्नाः (अ.मी.कु.वृ.-१.३.२२)।

---

१. अयं शिरःप्रक्रमः सूचितः। य शीर्षण्यसवननाम्ना शिक्षासु वर्ण्यते-
तारं तु विद्यात् सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यम्।
मयूरहंसान्यभृतस्वराणां तुल्येन नादेन शिरःस्थितेन।। (पाणि.शि. श्लोकात्मिका- ३७)

९. तौ संवारविवारौ।

अर्थः-(तौ) उक्तौ वर्णधर्मौ (संवारविवारौ) संवारसंज्ञको विवारसंज्ञकश्च बाह्ययत्नाविति वेदितव्यौ।

१०. तत्र यदा कण्ठबिलं संवृतं तदा नादो जायते।

अर्थः-(तत्र) वर्णोच्चारणे (यदा) (कण्ठबिलम्) गलच्छिद्रम् (संवृतम्) संकुचितं भवति (तदा) तदानीम् (नादः) (जायते) उत्पद्यते।

११. विवृते तु कण्ठबिले श्वासोऽनुजायते।

अर्थः-(कण्ठबिले) गलच्छिद्रे (विवृते) वितते जाते (श्वासः) (अनुजायते) उत्पद्यते।

१२. तौ श्वासनादावनुप्रदानावित्याचक्षते।

अर्थः- (तौ) (श्वासनादौ) श्वासनादाख्यौ (अनुप्रदानौ) अनु पश्चात् प्रदानं ययोस्तावनुप्रदानौ पश्चाज्जायमानावित्यर्थः (इति) (आचक्षते) वदन्ति आचार्याः।

१३. अन्ये श्वासनादानुप्रदानं व्यञ्जने नादवत्।

अर्थः-(व्यञ्जने) वर्णानामभिव्यञ्जने (श्वासनादानुप्रदानम्) श्वासानुप्रदानम्, नादानुप्रदानञ्च (नादवत्) नादध्वनिवद् भवतः (इति) एवम् (अन्ये) अन्ये आचार्याः (आचक्षते) ब्रुवते।

१४. तत्र यदा स्थानाभिघातजध्वनौ नादोऽनुप्रदीयते तदा नादध्वनिसंसर्गाद् घोषो जायते।

अर्थः-(तत्र) तस्मिन् (स्थानाभिघातजध्वनौ) स्थानाभिघातेन ध्वनावुत्पन्ने गलबिलस्य संवृतत्वात् (यदा) यस्मिन् काले (नादः) नादध्वनिः (अनुप्रदीयते) अनु पश्चात् प्रदीयते (तदा) तदानीम्

(नादध्वनिसंसर्गाद्) तन्नादध्वनिसम्बन्धाद् (घोषः) नादानुरणनसमानो ध्वनिविशेषो घोषः (जायते) भवति।

१५. यदा श्वासोऽनुप्रदीयते तदा श्वासध्वनिसंसर्गाद् अघोषो जायते।

अर्थः-(तत्र) तस्मिन् (स्थानाभिघातजध्वनौ) स्थानाभिघातेन ध्वनावुत्पन्ने कण्ठबिलस्य विवृतत्वात् (यदा) (श्वासः) नादरहितो निःश्वासरूपः (अनुप्रदीयते) अनु पश्चात् प्रदीयते (तदा) तदानीम् (श्वासध्वनिसंसर्गाद्) श्वासगतिजन्य- शब्दसंसर्गाद् (अघोषः) वर्णध्वनौ घोषराहित्यम् (जायते) भवति।

१६. सा घोषवदघोषता।

अर्थः-(सा) क्रमेण तृतीयचतुर्थसूत्राभ्यां वर्णिता (घोषवदघोषता) घोषवत्ता अघोषता च समाप्ता, वर्णितेति बोद्धव्यम्।

१७. महति वायौ महाप्राणः।

अर्थः-वर्णोच्चारणे (महति) अधिके (वायौ) अनिले निःस्रियमाणे (महाप्राणः) इत्याख्यो बाह्यः प्रयत्नो भवति। तद्वन्तश्च वर्णा महाप्राणाः कथ्यन्ते।

१८. अल्पे वायावल्पप्राणः।

अर्थः-वर्णोच्चारणे (अल्पे) स्वल्पे (वायौ) अनिले निःस्रियमाणे (अल्पप्राणः) इत्याख्यो बाह्यः प्रयत्नो भवति। तद्वन्तश्च वर्णा अल्पप्राणा भवन्ति।

१९. साल्पप्राणमहाप्राणता।

अर्थः-(सा) असावित्थं निर्दिष्टा (अल्पप्राणमहाप्राणता) अल्पप्राणता महाप्राणता च वर्णिता।

२०. (यत्र) महाप्राणत्वम् ऊष्माणस्ते।

अर्थः-(यत्र) येषु वर्णेषु (महाप्राणत्वम्) महाप्राणता (ते) ते वर्णाः (ऊष्माणः) इत्याख्या भवन्ति।

२१. तत्र यदा सर्वाङ्गानुसारी प्रयत्नस्तीव्रो भवति, तदा गात्राणां निग्रहः, कण्ठबिलस्य चाल्पत्वं स्वरस्य च वायोस्तीव्रगतित्वाद्रौक्ष्यं भवति। तमुदात्तमाचक्षते।

अर्थः- (तत्र) वर्णानामुच्चारणे (यदा) (सर्वाङ्गानुसारी) सर्वगात्रगतः (प्रयत्नः) (तीव्रः) अधिकः (भवति) (तदा) (गात्राणाम्) शरीरावयवानाम् (निग्रहः) सङ्कोचः (कण्ठबिलस्य च) गलच्छिद्रस्य च (अल्पत्वम्) सङ्कुचितत्वम् तथा च (स्वरस्य) ध्वनेः (वायोः) मारुतस्य (तीव्रगतित्वाद्) तीव्रगतिहेतोः (रौक्ष्यम्) रूक्षता (भवति) जायते। (तम्) तादृशतयोच्चारितं वर्णम् (उदात्तम्) (आचक्षते) ब्रुवत आचार्याः।

२२. यदा मन्दः प्रयत्नो भवति तदा गात्राणां प्रसन्नत्वम्, कण्ठबिलस्य च महत्त्वम्, स्वरस्य च वायोर्मन्दगतित्वात् स्निग्धता भवति। तमनुदात्तमाचक्षते।

अर्थः- (तत्र) वर्णोच्चारणे (यदा) (सर्वाङ्गानुसारी) सकलगात्रगतः (प्रयत्नः) (मन्दः) अल्पो (भवति) (तदा) (गात्राणाम्) शरीरावयवानाम् (प्रसन्नत्वम्) सुखापन्नत्वम् (कण्ठबिलस्य च) गलच्छिद्रस्य च (महत्त्वम्) विस्तृतत्वम् तथा च (स्वरस्य) ध्वनेः (वायोः) (मन्दगतित्वाद्) अल्पगतित्वाद् (स्निग्धता) मृदुता (भवति) जायते। (तम्) तादृशतयोच्चारितं वर्णम् (अनुदात्तम्) (आचक्षते) वदन्ति आचार्याः।

२३. उदात्तानुदात्तसन्निकर्षात् स्वरित इति।

अर्थः-(उदात्तानुदात्तसन्निकर्षात्) उदात्तस्यानुदात्तस्य च सन्निकर्षात्, समाहारात् (स्वरितः) इत्याख्यो बाह्यः प्रयत्नो जायते।

२४. स एवं प्रयत्नोऽभिनिर्वृत्तः कृत्स्नः प्रयत्नो भवति।

अर्थः-(एवम्) इत्थम् (अभिनिर्वृत्तः) निष्पन्नः (सः) स उभयविधः (प्रयत्नः) आन्तरो बाह्यश्च (कृत्स्नः) सम्पूर्णः (प्रयत्नः) यत्नः (भवति) सम्पद्यते।

२५. स एवमापिशलेः पञ्चदशभेदाख्या वर्णधर्मा भवन्ति।

अर्थः-(सः) स वर्णधर्मप्रतिपादक उभयविधप्रयत्नविषय साकल्येन कतिविधो भवतीत्याकांक्षामुत्थाप्य परिहरत्याचार्यः (एवम्) उक्तप्रकारेण (आपिशलेः) आपिशल्याचार्यस्य मते (अपि) (पञ्चदशभेदाख्याः) पञ्चदशभेदाः (वर्णधर्माः) (भवन्ति) विद्यन्ते। (आपिशलिग्रहणमिह पूजार्थम्, न तु मतप्रदर्शनार्थम्। पाणिनेरपीह तात्पर्यात्)।

२६. तद्यथा-

स्पृष्टता ईषत्स्पृष्टता विवृतता संवृतता च। संवारविवारौ श्वासनादौ घोषवदघोषता। अल्पप्राणमहाप्राणता उदात्तानुदात्तस्वरिताः।।इति।।

अर्थः-(तद्यथा) ते च वर्णधर्माः स्पृष्टता-ईषत्स्पृष्टता-विवृतता-संवृतताभेदेन चत्वारोऽन्तःप्रयत्नाः। संवार-विवार-श्वास-नाद-घोष-अघोष-अल्पप्राण-महाप्राण-उदात्त-अनुदात्त-स्वरित-भेदेनैकादश बाह्ययत्नाः। साकल्येन पञ्चदश भवन्ति।

२७. इदानीं शिक्षाग्रन्थः श्लोकैरुपसंह्रियते।

अर्थः- (इदानीम्) सम्प्रति (शिक्षाग्रन्थः) शिक्षाप्रतिपादकोऽयं ग्रन्थः (श्लोकैः) अग्रिमपद्यैः: (उपसंह्रियते) समाप्यते-

२८. **अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।**
जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च।।

अर्थः-वर्णानाम् उद्भवस्थानानि अष्टौ सन्ति। तानि च-उरः, कण्ठः, शिरः मूर्धा, जिह्वामूलम्, दन्ताः, नासिका, उपरितन ओष्ठः, तालु च (जिह्वामूलं तु स्थानत्वेन करणत्वेन चोभयथा मन्यते।)

२९. स्पृष्टत्वमीषत्स्पृष्टत्वं संवृतत्वं तथैव च।
विवृतत्वं च वर्णानामन्तःकरणमुच्यते।।

अर्थः- स्पृष्टत्वम्, ईषत्स्पृष्टत्वम्, संवृतत्वम्, विवृतत्वञ्च इत्येते वर्णानामन्तःकरणम् आभ्यन्तरप्रयत्ना उच्यन्ते।

३०. कालो विवारसंवारौ श्वासनादावघोषता।
घोषोऽल्पप्राणता चैव महाप्राणः स्वरास्त्रयः।।

३१. बाह्यं करणमाहुस्तान् वर्णानां वर्णवेदिनः।

अर्थः-कालः (ह्रस्व-दीर्घ-प्लुतोच्चारणे प्रयोजक एक-द्वि-त्रिमात्रात्मकः) विवारः, संवारः, श्वासः, नादः, अघोषः, घोषः, अल्पप्राणः, महाप्राणः, उदात्तोऽनुदात्तः स्वरितश्चेत्येतान् वर्णवेत्तार आचार्या बाह्यं करणमाहुर्बाह्यं प्रयत्नमाचचक्षिरे।

परिशिष्टम्-१
अथ उणादि-सूत्रपाठः
प्रथमः पादः

१. कृवापाजिमिस्वदिसाध्यशूभ्य उण्।	१. कारुः, वायुः, पायुः, जायुः, मायुः, स्वादुः, साधुः, आशुः।
२. छन्दसीणः।	२. आयुं न यं नमसा रातहव्या।
३. दृसनिजनिचरिचटिरहिभ्यो ञुण्।	३. दारु, सानुः, जानु, चारु, चाटु, राहुः।
४. किञ्जरयोः श्रिणः।	४. किंशारुः, जरायुः।
५. त्रो रश्च लः।	५. तालुः [आलुः, भालुः, शालुः]
६. कृके वचः कश्च	६. कृकवाकुः।
७. भृमृशीङ्तॄचरित्सरितनिध-निमि-मस्जिभ्य उः।	७. भरुः, मरुः, शयुः, तरुः, चरुः, त्सरुः, तनुः, धनुः, मयुः, मद्गुः।
८. अणश्च।	८. अणुः [कटुः, वटुः]
९. धान्ये नित्।	९. 'अर्णवश्च मे '[यज्ञेन कल्पन्ताम्]
१०. शॄस्वृस्निहित्रप्यसिवसिहनि-क्लिदिबन्धिमनिभ्यश्च।	१०.शरुः, स्वरुः, स्नेहुः, त्रपु, असुः, वसुः, हनुः, क्लेदुः, बन्धुः, मनुः [बिन्दुः]
११. स्यन्देः सम्प्रसारणं धश्च।	११.सिन्धुः।
१२. उन्देरिच्चादेः।	१२.इन्द्रं गच्छन्त इन्दवः।
१३. ईषेः किच्च।	१३.इषुः।
१४. स्कन्देः सलोपश्च।	१४.कन्दुः।
१५. सृजेरसुँम् च।	१५.रज्जुः।
१६. कृतेराद्यन्तविपर्ययश्च।	१६.तर्कुः।
१७. नावञ्चेः।	१७.न्यङ्कुः।
१८. फलिपाटिनमिमनिजनां क्पटिनाकिधतश्च।	१८.फल्गुः, पटुः, नाकुः, मधु, जतुः।
१९. वलेगुर्क् च।	१९.वल्गुः।
२०. शः कित् सन्वच्च।	२०.शिशुः।
२१. यो द्वे च।	२१.ययुः।
२२. कुर्भ्रश्च।	२२.बभ्रुः [चक्रुः, जघ्नुः, पपुः]
२३. पॄभिदिव्यधिगृधिधृषिहृषिभ्यः।	२३.पुरुः, भिदुः, विधुः, गृधुः, धृषुः, हृषुः [हृशुः]।
२४. कृग्रोरुच्च।	२४.कुरुः, गुरुः।
२५. अपदुः सुषु स्थः।	२५.अपष्ठु, दुष्ठु, सुष्ठु।

२६. रपेरिच्चोपधायाः।	२६.रिपुः।
२७. अर्जिदृशिकम्यमिपंसिबाधामृजि-पशितुक्धुक्दीर्घ हकाराश्च।	२७.ऋजुः पशुः, कन्तुः, अन्धुः पांसुः, बाहू।
२८. प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च।	२८.पृथुः, मृदुः, भृगुः।
२९. ल ङ्घिबंह्योर्नलोपश्च।	२९.लघुः, बहुः।
३०. ऊर्णोतेर्णुलोपश्च।	३०.ऊरुः।
३१. महति ह्रस्वश्च।	३१.उरुः।
३२. श्लिषेः कश्च।	३२.श्लीकुः।
३३. आङ्परयोः खनिशृभ्यां डिच्च।	३३.आखुः, परशुः।
३४. हरिमितयोर्द्रुवः।	३४.हरिद्रुः, मितद्रुः।
३५. शते च।	३५.शतद्रुः [द्रुः]।
३६. खरुशङ्कुपीयुनीलङ्गुलिगु।	३६.खरुः, शंकुः, पीयुः, नीलङ्गुः, लिगु, [पङ्गुः, हिङ्गुः]।
३७. मृगय्वादयश्च।	३७.मृगयुः, मित्रयुः, देवयुः, [कुहुः]।
३८. मन्दिवाशिमथिचतिचङ्क्यङ्किभ्यउरच्।	३८.मन्दुरा, वाशुरा, मथुरा, चतुरः, चङ्कुरः, अङ्कुरः।
३९. व्यथेः सम्प्रसारणं धः किच्च।	३९.विधुरः [विथुरः]।
४०. मकुरदर्दुरौ।	४०.मकुरः दर्दुरः, [मुकुरः]।
४१. मद्गुरादयश्च।	४१.मुरः, कर्बुरः, बन्धुरः, चिकुरः।
४२. असेरुरन्।	४२.असुरः।
४३. मसेश्च।	४३.मसुराः।
४४. शावशेराप्तौ।	४४.श्वशुरः।
४५. अविमह्योष्टिषच्।	४५.अविषः, अविषी, महिषः, महिषी।
४६. अमेर्दीर्घश्च।	४६.आमिषम्।
४७. रुहेर्वृद्धिश्च।	४७.रौहिषम्, रौहिषः।
४८. तवेर्णद्वा।	४८.तविषः, ताविषः, तविषी, ताविषी।
४९. नञि व्यथेः।	४९.अव्यथिषः, अव्यथिषी।
५०. किलेबरुक् च।	५०.किल्विषम्।
५१. इषिमदिमुदिखिदिच्छिदिभिदिमन्दि-चन्दितिमिमिहिमुहिमुचिरुचिरुधि-बन्धिशुषिभ्यः किरच्।	५१.इषिरः, मदिरः, मुदिरः, खिदिरः, छिदिरः, भिदिरः, मन्दिरम्, चन्दिरम्, तिमिरम्, मिहिरः, मुहिरः, मुचिरः, रुचिरम्, रुधिरम्, बधिरः, शुषिरम्।
५२. अशेर्नित्।	५२.अशिरः।

५३. अजिरशिशिरशिथिलस्थिर-स्फिर-स्थविरखदिराः।	५३.अजिरम्, शिशिरम्, शिथिलः, स्थिरः, स्फिर : स्थविरः, खदिरः, [शिविरः]।
५४. सलिकल्यनिमहिभडिभण्डि-शण्डिपिण्डितुण्डिकु किभूभ्य इलच्।	५४.सलिलम्, कलिलम्, अनिलः, महिला, भडिलः, भण्डिलः, शण्डिलः; पिण्डिलः, तुण्डिलः, कोकिलः, भविलः [कुटिलः]।
५५. कमेः पश्च।	५५.कपिलः।
५६. गुपादिभ्यः कित्।	५६.गुपिलः, गुहिलः, तिजिलः।
५७. मिथिलादयश्च।	५७.मिथिला, गतिला, तकिला।
५८. पतिकठिकुठिगडिगुडिदंशिभ्य एरक्।	५८.पतेरः, कठेरः, कुठेरः, गडेरः, गुडेरः, दशेरः।
५९. कुम्बेर्नलोपश्च।	५९.कुबेरः।
६०. शदेस्तश्च।	६०.शतेरः।
६१. मूलेरादयः।	६१.मूलेरः, गुधेरः, गुहेरः, मुहेरः।
६२. कबेरोतः पश्च।	६२.कपोतः।
६३. भातेर्डवतुप्।	६३.भवान्, भवन्तौ, भवन्तः।
६४. कठिचकिभ्यामोरन्।	६४.कठोरः, चकोरः।
६५. किशोरादयश्च।	६५.किशोरः, सहोरः, गौरः।
६६. कपिगडिगण्डिकटिपटिभ्य ओलच्।	६६.कपोलः, गडोलः, गण्डोलः, कटोलः, पटोलः, [कण्डोलः]।
६८. मीनातेरूरः।	६७.मयूरः।
६९. स्यन्देः सम्प्रसारणञ्च।	६८.सिन्दूरः।
७०. सितनिगमिमसिसच्यविधाञ्- क्रुशिभ्यस्तुन्।	६९.सेतुः, तन्तुः, गन्तुः, मस्तुः, सक्तुः, ओतुः, धातुः, क्रोष्टुः।
७०. वसेरगारे णिच्च।	७०.'वास्तु मे दत्त वाजिनः'।
७१. पः किच्च।	७१.पीतुः।
७२. अर्तेश्च तुः।	७२.ऋतुः।
७३. कमिमनिजनिगाभायाहिभ्यश्च।	७३.कन्तुः, मन्तुः, जन्तुः, गातुः, भातुः, यातुः, हेतुः।
७४. चायः की।	७४.केतुः, 'केतुं कृण्वन्नकेतवे।
७५. आतेर्हस्वश्च।	७५.अप्तुः, 'अप्तुराज्यस्य'।
७६. कृञः कतुः।	७६.क्रतुः, स हि क्रतुः स मयर्।
७७. एधिवह्योश्चतुः।	७७.एधतुः, वहतुः।

७८. जीवेरातुः।	७८.जीवातवे प्रतरं साधया धियः, जीवातुः।
७९. आतृकन् वृद्धिश्च।	७९.जैवातृकः।
८०. कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः स्त्रियाम्।	८०.कर्षूः, चमूः, तनूः, धनूः, सर्जूः, खर्जूः।
८१. मृजेर्गुणश्च।	८१.मर्जूः।
८२. खडेडरुड् वा।	८२.खडूः, खड्डूः।
८३. वहेर्धश्च।	८३.सुमङ्गलीरियं वधूः।
८४. कषेश्छश्च।	८४.कच्छूः।
८५. णित् कशिपद्यर्तेः।	८५.काशूः, पादूः, आरूः।
८६. अणो डश्च।	८६.आडूः।
८७. नञि लम्बेर्नलोपश्च।	८७.अलाबूः।
८८. के श्र एरङ् चास्य।	८८.कशेरूः।
८९. त्रो दुट् च।	८९.तदरूः।
९०. दरिद्रातेर्यालोपश्च।	९०.ददूः।
९१. नृतिशृध्यो : कूः।	९१.नृतूः, शृधूः।
९२. ऋतेरम् च।	९२.रतूः।
९३. अन्दूदृम्फूजम्बूकम्बूकफेलू- कर्कन्धूदिधिषूः।	९३.अन्दूः, दृम्फू :, जम्बूः, कम्बूः, कफेलूः, कर्कन्धूः, दिधिषूः।
९४. मृग्रोरुतिः।	९४.मरुत्, गरुत्।
९५. ग्रो मुट् च।	९५.गर्मुत्।
९६. हृषेरुलच्।	९६.हर्षुलः [चटुलः]
९७. हृसृरुहियुषिभ्य इतिः।	९७.हरितः, सरित्, रोहितः, योषित्।
९८. ताडेर्णिलुक् च।	९८.तडित्।
९९. शमेढः।	९९.शण्ढः।
१००. ०कमेरठः।	१००. ०कमठः [जरठः, शमठः]।
१०१. रमेर्वृद्धिश्च।	१०१. रामठम्।
१०२. शमेः खः।	१०२. शङ्खो नो विश्वभेषजः।
१०३. कणेष्ठः।	१०३. कण्ठः।
१०४. कलस्तृपश्च।	१०४. तृपला [कमलम्, मण्डलम्, कुण्डलम्]।
१०५. शपेर्बश्च।	१०५. शबलः।
१०६. वृषादिभ्यश्चित्।	१०६. वृषलः, कुशलः, पललम्, देवलः, सरलः, धवलः, केवलम्।
१०७. कमेर्बुक्।	१०७. कम्बलः।
१०८. लङ्गेर्वृद्धिश्च।	१०८. लाङ्गलम्।

१०९. कुटिकशिकौतिभ्यो मुँट् च।	१०९. कुट्मलम्, कश्मलम्, कोमलम् [पिङ्गलः, कुड्मलम्]।
११०. मृजेष्टिलोपश्च।	११०. मलम्।
१११. चुपेरच्चोपधायाः।	१११. चपलः।
११२. शकिशम्योर्नित्।	११२. शकलः, शमलः।
११३. छो गुँग्घ्रस्वश्च।	११३. छगलः।
११४. ञमन्ताड् डः।	११४. दण्डः, रण्डा, खण्डः, पण्डा।
११५. क्वादिभ्यः कित्।	११५. कुण्डम्, काण्डम्, गुडः, घुण्डः।
११६. स्थाचतिमृजेरालज्वालञालीयरः।	११६. स्थालम्, चात्वालः, मार्जालीयः।
११७. पतिचण्डिभ्यामालञ्।	११७. पातालम्, चाण्डालः।
११८. तमिविशिविडिमृणिकुलिकपिपलि-पञ्चिभ्यः कालन्।	११८. तमालः, विशालः [विडालः, मृणालम्, कुलालः, कपालम्, पलालः, पञ्चालः]।
११९. पतेरङ्गच् पक्षिणि।	११९. पतङ्गः।
१२०. तरत्यादिभ्यश्च।	१२०. तरङ्गः [लवङ्गः]।
१२१. विडादिभ्यः कित्।	१२१. विडङ्गः, मृदङ्गः, कुरङ्गः।
१२२. सृवृञोर्वृद्धिश्च।	१२२. सारङ्गः, वारङ्गः [नारङ्गः]।
१२३. गन् गम्यद्योः।	१२३. गङ्गा, अद्गः [अङ्गम्]।
१२४. छापूखडिभ्यः कित्।	१२४. छागः, पूगः, खड्गः [षिङ्गः]।
१२५. भृञः किन्नुट् च।	१२५. भृङ्गः।
१२६. शृणातेर्ह्रस्वश्च।	१२६. शृङ्गम्। 'शृङ्गाभ्यां रक्षो नुदते'।
१२७. गण् शकुनौ।	१२७. शार्ङ्गः[शारङ्गः]।
१२८. मुदिग्रोर्गग्गौ।	१२८. मुद्गः, गर्गः।
१२९. अण्डन् कृसृभृवृञः।	१२९. करण्डः, सरण्डः, भरण्डः, वरण्डः [तरण्डः, वतण्डः]।
१३०. शृदृभसोऽदिः।	१३०. शरद्, दरद्, भसद् [पर्षद्]।
१३१. दृणातेः षुग्घ्रस्वश्च।	१३१. दृषद्।
१३२. त्यजितनियजिभ्यो डित्।	१३२. त्यत्, तत्, यत्।
१३३. एतेस्तुटँ च।	१३३. एतत्,।
१३४. सर्तेरटिः।	१३४. सरट्।
१३५. लङ्घेनलोपश्च।	१३५. लघट्।
१३६. पारयतेरजिः।	१३६. पारक्।
१३७. प्रथेः कित् सम्प्रसारणञ्च।	१३७. पृथक् प्रायन् प्रथमा देवहूतयः।
१३८. भियः षुग्घ्रस्वश्च।	१३८. भिषक्।
१३९. युष्यसिभ्यां मदिक्।	१३९. युष्मद्, अस्मद्।

१४०. अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदि-यक्षिनीभ्यो मन्।	१४०. अर्मः, स्तोमः, सोमः, होमः, सर्मः, धर्मः, क्षेमः, क्षोमः, भामः, यामः, वामः, पद्मम्, यक्ष्मः, नेमः।
१४१. जहातेः सन्वदाकारलोपश्च।	१४१. 'जिह्मं (जिह्मः) नुनुद्रेऽवतम् '।
१४२. अवतेष्टिलोपश्च।	१४२. ओम्। 'ओम् खं ब्रह्म'।
१४३. ग्रसेरा च।	१४३. ग्रामः।
१४४. अविसिविसिशुषिभ्यः कित्।	१४४. ऊमम्, उमा, स्यूमः, सिमः, शुष्मम्।
१४५. इषियुधीन्धिदसिश्याधूसूभ्यो मक्।	१४५. इष्मः, युध्मः, इध्मः, दस्मः, श्यामः, धूमः, सूमः।
१४६. युजिरुचितिजां कुँश्च।	१४६. युग्मम्, रुक्मः, तिग्मम्।
१४७. हन्तेर्हि च।	१४७. हिमम्।
१४८. भियः षुग् वा।	१४८. भीमा जाया ब्राह्मणस्य, भीष्मो हि देवः।
१४९. घर्मग्रीष्मौ।	१४९. घर्मः, ग्रीष्मः।
१५०. प्रथेः षिवन्षवन्ष्वनः सम्प्रसारणञ्च।	१५०. पृथिवी, पृथवी, पृथ्वी।
१५१. अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्।	१५१. अश्वः प्रुष्वः, लट्वा, कण्वः, खट्वा, विश्वः।
१५२. इण्शीभ्यां वन्।	१५२. एवः, शेवः।
१५३. सर्वनिघृष्वरिष्वलष्वशिव- पद्वप्र-ह्वेष्वा अतन्त्रे।	१५३. सर्वः, निघृष्वः, रिष्वः, लष्वः, शिवः, पद्वः, प्रह्वः, ईष्वः [ह्रस्वः]।
१५४. शेवायह्वजिह्वाग्रीवाप्वामीवाः।	१५४. शेवा, यह्वः, जिह्वा, ग्रीवा, अप्वा, मीवः, अमीवा।
१५५. कृगृशृदृभ्यो वः।	१५५. कर्वः, गर्वः, शर्वः, दर्वः।
१५६. कनिन्ँ युवृषितक्षिराजिधन्वि-द्यु-प्रतिदिवः।	१५६. युवा, वृषा, तक्षा, राजा, धन्वा, द्युवा, प्रतिदिवा।
१५७. सप्यशूभ्यां तुट्ँ च।	१५७. 'सप्त च मे सप्त च मे'। 'अष्टौ च मेऽष्टौ च मे'।
१५८. नञि जहातेः।	१५८. 'अहानि (अहः) शं भवन्तु नः'।
१५९. श्वनुक्षन्पूषन्प्लीहन्क्लेदन्स्नेह-न्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्-परिज्वन्मातरिश्वन्मघवन्निति।	१५९. श्वा, उक्षा, पूषा, प्लीहा, क्लेदा, स्नेहा, मूर्धा, मज्जा, अर्यमा, विश्व-प्सा, परिज्वा, मातरिश्वा, मघवा।

इति प्रथमः पादः

द्वितीयः पादः

१. कृहृभ्यामेणुः।	१. करेणुः, हरेणुः।
२. हनिकुषिनीरमिकाशिभ्यः क्थन्।	२. हथः, कुष्ठः, नीथः, रथः, काष्ठम्।
३. अवे भृञः।	३. अवभृथः।
४. उषिकुषिगार्तिभ्यस्थन्।	४. ओष्ठः, कोष्ठम्, गाथा, अर्थः [शोथः]।
५. सर्तेर्णित्।	५. सार्थः।
६. जृवृञ्भ्यामूथन्।	६. जरूथः, वरूथः।
७. पातृतुदिवचिरिचिसिचिभ्यस्थक्।	७. पीथः, तीर्थम्, तुत्थः, उक्थम्, रिक्थम्, सिक्थम्।
८. अर्तेर्निरि।	८. निऋथः।
९. निशीथगोपीथावगथाः।	९. निशीथः, गोपीथः, अवगथः।
१०. गश्चोदि।	१०. उद्गीथः।
११. समीणः।	११. समिथः।
१२. तिथपृष्ठगूथयूथप्रोथाः।	१२. तिथः, पृष्ठम्, गूथम्, यूथः, प्रोथः।
१३. स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपितृपिदृपिवन्द्युन्दिश्वितिवृत्यजिनीपदिमदिमुदिखिदिछिदिभिदिमन्दिचन्दिदहिदसि-दम्भिवसिवाशिशीङ्हसिसिधिशुभिभ्यो रक्।	१३. स्फारः, तक्रम्, वक्रः, शक्रः, क्षिप्रम्, क्षुद्रः, सृप्रः, तृप्रः, दृप्रः, वन्द्रः, उद्रः, श्वित्रम्, वृत्रः, वीरः, नीरम्, पद्रः, मद्रः, मुद्रा, खिद्रः, छिद्रम्, भिद्रम्, मन्द्रः, चन्द्रः, दह्रः, दस्रः, दभ्रः, उस्रा, वाश्रः, शीरम्, हस्रः, सिध्रः, शुभ्रः, [मिश्रः, पुण्ड्रः, सिरा]।
१४. चकिरम्योरुच्चोपधायाः।	१४. चुक्रम्, रुम्रः।
१५. वौ कसेः।	१५. विकुस्रः।
१६. अमितम्योर्दीर्घश्च।	१६. आम्रम्, ताम्रम्।
१७. निन्देर्नलोपश्च।	१७. निद्रा।
१८. अर्देर्दीर्घश्च।	१८. आर्द्रा।
१९. शुचेर्दश्च।	१९. शूद्रः।
२०. दुरीणो लोपश्च।	२०. दूरम्।

२१. कृतेश्छः क्रू च।	२१. कृच्छ्रम्, क्रूरः।
२२. रोदेर्णिलुक् च।	२२. रुद्रः।
२३. बहुलमन्यत्रापि सञ्ज्ञाछन्दसोः।	२३. पाशधरः, शूलधरः, चक्रधरः, शक्ति-धरः, दण्डधरः, [पर्णशुट्]।
२४. जोरी च।	२४. जीरः।
२५. सुसूधाञ्गृधिभ्यः क्रन्।	२५. सुरा, सूरः, धीरः, गृध्रः।
२६. शुसिचिमीनां दीर्घश्च।	२६. शूरः, सीरः, चीरम्, मीरः।
२७. वाविन्धेः।	२७. वीध्रम्।
२८. वृधिवपिभ्यां रन्।	२८. वधम्, वप्रः।
२९. ऋज्रेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रो-ग्रभेरभेलशुक्रशुक्लगौरवेरामालाः।	२९. ऋज्रः, इन्द्रः, अग्रम्, वज्रः, विप्रः, कुब्रम्, चुब्रम्, क्षुरः, खुरः, भद्रम्, उग्रः, भेरः, भेलः, शुक्रम्, शुक्लम्, गौरः, वज्रः, इरा, माला [तीव्रम्]।
३०. समि कस उकन्।	३०. सङ्कसुकः।
३१. पचिनशोर्णुकन्कनुमौ च।	३१. पाकुकः, नंशुकः।
३२. भियः क्रुकन्।	३२. भीरुकः।
३३. क्वुन् शिल्पिसञ्ज्ञयोरपूर्वस्यापि।	३३. रजकः, इक्षुकुट्टकः, तक्षकः, अभ्रक-म्, चरकः, शालभञ्जिका [कनकम्, कटकः,आमलकी]।
३४. रमेरश्च लो वा।	३४. रमकः, लमकः।
३५. जहातेर्द्वे च।	३५. जहकः।
३६. ध्मो धम च।	३६. धमकः
३७. हनो वध च।	३७. वधकः।
३८. बहुलमन्यत्रापि।	३८. कुहकः, कृतकम्, भिदकः, छिदकम्।
३९. कृषेर्वृद्धिश्चोदीचाम्।	३९. कार्षकः, कृषकः।
४०. उदकञ्च।	४०. उदकम्।
४१. वृश्चिकृषोः किकन्।	४१. वृश्चिकः, कृषिकः।
४२. प्राङि पणिकषः।	४२. प्रापणिकः, प्राकषिकः।
४३. मुषेर्दीर्घश्च।	४३. मूषिकः।

४४.स्यमेः सम्प्रसारणञ्च।	४४. सीमिकः।
४५.क्रिय इकन्।	४५. क्रयिकः, विक्रयिकः।
४६.आङि पणिपनिपतिखनिभ्यः।	४६. आपणिकः, आपनिकः, आपतिकः, आखनिकः।
४७.श्यास्त्याहृञविभ्य इनच्।	४७. श्येनः, स्त्येनः, हरिणः, अविनः।
४८.वृजेः किच्च।	४८. वृजिनम्।
४९.अजेरज च।	४९. अजिनम्।
५०.बहुलमन्यत्रापि।	५०. कठिनम्, बर्हिणः, नलिनम्, दिनम्।
५१.द्रुदक्षिभ्यामिनन्।	५१. द्रविणम्, दक्षिणा।
५२.अर्तेः किदिच्च।	५२. इरिणम्।
५३.वेपितुह्योस्वश्च।	५३. विपिनम्, तुहिनम्।
५४.तलिपुलिभ्यां च।	५४. तलिनम्, पुलिनम्।
५५.गर्वेरत उच्च।	५५. गुर्विणी।
५६.रुहेश्च।	५६. रोहिणी।
५७.महेरिनण्च।	५७. माहिनम्, महिनम्।
५८.क्विब् वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसम्प्रसारणञ्च।	५८. वाक्, प्राट्, श्रीः, स्रूः, द्रूः, प्रूः, जूः, [प्रावृट्, द्वाः, उदश्वित्, ऋक्]।
५९.आप्नोतेस्वश्च।	५९. आपो भूयिष्ठाः, अपः, अद्भिः।
६०.परौ व्रजेः षश्च पदान्ते।	६०. परिव्राट्।
६१.हुवः श्लुवच्च।	६१. जुहूः।
६२.स्रुवः कः।	६२. स्रुवः [ध्रुवम्]।
६३.चिक् च।	६३. स्रुक्।
६४.तनोतेरनश्च वः।	६४. त्वक्, अग्निष्टे त्वचं मा हिंसीत्।
६५.ग्लानुदिभ्यां डौ।	६५. ग्लौः, नौः।
६६.च्विरिव्ययम्।	६६. ग्लौकरोति, नौकरोति।
६७.रातेर्डैः।	६७. राः, रायौ, रायः।
६८.गमेर्डोः।	६८. गौः [द्यौः]।
६९.भ्रमेश्च डूः।	६९. भ्रूः, 'पन्थानं भ्रूभ्याम्'।
७०.दमेर्डोसिः।	७०. दोः, दोषौ, दोर्भ्याम्।

७१. पणेरिज्यादेश्च वः।	७१. वणिक्।
७२. वशः कित्।	७२. उशिक्, 'उशिक् पावकः'।
७३. भृञ उच्च।	७३. भुरिक्।
७४. जसिसहोरुरिन्।	७४. जसुरिः, सहुरिः।
७५. सुयुरुवृञो युच्।	७५. सवनम्, यवनः, रवणः, वरणः।
७६. अशे रश च।	७६. रशना।
७७. उन्देर्नलोपश्च।	७७. ओदनः।
७८. गमेर्गश्च।	७८. गगनम्।
७९. बहुलमन्यत्रापि।	७९. द्योतनः, स्यन्दनः, नयनम्।
८०. रञ्जेः क्युन्।	८०. रजनम्, रजनी।
८१. भूसूधूभ्रस्जिभ्यश्छन्दसि।	८१. भुवनम्, सुवनः, धुवनम्, भृज्जनम्।
८२. कपवृजिमन्दिनिधाञः क्युः।	८२. किरणः, पुरणः, वृजनम्, मन्दनम्, निधनम् [धनम्]।
८३. धृषेर्धिष च सञ्ज्ञायाम्।	८३. धिषणा।
८४. हन्तेघरुरुँ च।	८४. घुरणः।
८५. वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च।	८५. पृषत्, बृहत्, महत्, जगत्।
८६. संश्चत्तृपद्वेहत्।	८६. संश्चत्, तृपत्, वेहत्।
८७. छन्दस्यसानच् शुजॄभ्याम्।	८७. शवसानः, जरसानः [दरसानः, तरसानः, वरसानः]।
८८. ऋञ्जिवृधिमन्दिसहिभ्यः कित्।	८८. ऋञ्जसानः, वृधसानः, मन्दसानः, सहसानः।
८९. अर्तेर्गुणः शुट् च।	८९. अर्शसानः।
९०. सम्यानच् स्तुवः।	९०. संस्तवानः।
९१. युधिबुधिदृशः किच्च।	९१. युधानः, बुधानः, दृशानः [कृपाणः, पाषाणः]।
९२. हुछेर्ः सनो लुक् छलोपश्च।	९२. जुहुराणः, युयोध्यस्मज्जुहुराणमेनः।
९३. श्वितेर्दश्च।	९३. शिश्विदानः।
९४. मुचियुधिभ्यां सन्वच्च।	९४. मुमुचानः, युयुधानः।
९५. तृन्तृचौ शंसिक्षदादिभ्यः सञ्ज्ञायां चानिटौ।	९५. शंस्ता, शंस्तारौ क्षत्ता, क्षत्तारौ, शास्ता, शास्तारौ, प्रशास्तारौ।
९६. बहुलमन्यत्रापि।	९६. मन्ता, हन्ता, धाता, उपदेष्टा।

९७. नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ।	९७. नप्ता, नेष्टा, त्वष्टा, होता, पोता, भ्राता, जामाता, माता, पिता, दुहिता।
९८. सावसेर्ऋन्।	९८. स्वसा।
९९. यतेर्वृद्धिश्च।	९९. ऊर्मिलामाण्डवीसीताः श्रुतिकीर्त्तिश्च यातरः (याता)।
१००. ०नञि च नन्देः।	१००. ०ननान्दा। 'ननान्दरि साम्राज्ञी भव'।
१०१. दिवे।	१०१. देवा। 'साम्राज्ञी अधि देवृषु'।
१०२. नयतेर्डिच्च।	१०२. ना, नरौ, नरः। 'नृभिर्नृवन्तः स्याम'।
१०३. सव्ये स्थश्छन्दसि।	१०३. सव्येष्ठा।
१०४. अर्तिसृधृधम्यम्यश्यवितृभ्योऽनिः।	१०४. अरणिः, सरणिः, धरणिः, धमनिः, अमनिः, अशनिः, अवनिः, तरणिः, [रजनी]।
१०५. आङि शुषेः सनश्छन्दसि।	१०५. आशुशुक्षणिः।
१०६. कृषेरादेश्च धः।	१०६. धर्षणिः।
१०७. अदेर्मुट् च।	१०७. अद्मनिः।
१०८. वृतेश्च।	१०८. वर्त्तनिः।
१०९. क्षिपेः किच्च।	१०९. क्षिपणिः।
११०. अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः।	११०. अर्चिः, शोचिः, हविः, सर्पिः, छदिः, छर्दिः।
१११. बृंहेर्नलोपश्च।	१११. बर्हिः।
११२. द्युतेरिसिँन्नादेश्च जः।	११२. ज्योतिः। 'ज्योतिषां ज्योतिरेकम्'।
११३. वसौ रुचेः सञ्ज्ञायाम्।	११३. वसुरोचिः [रोचिः]।
११४. भुवः कित्।	११४. भुविः। 'रमन्ते भुविषि मत्स्याः'।
११५. सहो धश्च।	११५. सधिः। 'अप्स्वग्ने सधिष्टव'।
११६. पिबतेस्थुक्।	११६. पाथिः।
११७. जनेरुसिँः।	११७. जनुः।
११८. मनेर्धश्छन्दसि।	११८. मधु। 'मधुषा संयौति'।
११९. अर्तिपृवपियजितनिधनितपिभ्यो नित्।	११९. अरुः, परुः, वपुः, यजुः, तनुः, धनुः, तपुः [मनुः, मनुषी]।
१२०. एतेर्णिच्च।	१२०. 'प्र ण आयूंषि तारिषत्', आयुः (जटायुः)।

१२१. चक्षेः शिच्च।	१२१. चक्षुः | 'चक्षुभ्या मे वर्चोदसौ'।
१२२. मुहेः किच्च।	१२२. 'मुहुरुक्था (मुहुः) च शंसत'।
१२३. कृगृशृवृञ्चतिभ्यः ष्वरच्।	१२३. कर्वरः, कर्वरी, गर्वरः, गर्वरी, शर्वरः, शर्वरी, वर्वरः, वर्वरी, चत्वरम्।
१२४. नौ षदेः।	१२४. निषद्वरः।

इति द्वितीयः पादः

तृतीयः पादः

१. छित्त्वरछत्वरधीवरपीवरमीवर-चीवर-तीवरनीवरगह्वरकद्वर-संयद्वराः।	१. छित्वरः, छत्वरः, धीवरः, पीवरः, मीवरः, चीवरम्, तीवरः, नीवरः, गह्वरम्, कद्वरम्, संयद्वरः।
२. इण्सिञ्जिदीङुष्यविभ्यो नक्।	२. इनः, सिनः, जिनः, दीनः, उष्णम्, ऊनः।
३. फेनमीनौ।	३. फेनः, मीनः।
४. कृषेर्वर्णे।	४. कृष्णः [घृणा]।
५. बन्धेर्ब्रधिबुधी च।	५. ब्रध्नः, बुध्नः।
६. धापॄवस्यज्यतिभ्यो नः।	६. धानाः, पर्णम्, वस्नः, वेनः, अत्नः [श्रोणः]।
७. लक्षेरट् मुँट् च।	७. लक्षणम्, लक्ष्मणम्, लक्ष्मणः।
८. वनेरिच्चोपधायाः।	८. वेन्ना।
९. सिवेष्टेर्यू च।	९. स्यूनः।
१०. कृवृजॄसिद्रूपन्यनिस्वपिभ्यो नित्।	१०. कर्णः वर्णः, जर्णः, सेना, द्रोणः, पन्नः, अन्नम्, स्वप्नः।
११. धेट इच्च।	११. धेना।
१२. तृषिशुषिरसिभ्यः कित्।	१२. तृष्णा, शुष्णः, रस्नम्।
१३. सुञो दीर्घश्च।	१३. सूना।
१४. रमेस्त च।	१४. रत्नम्। 'स्त्रीरत्नं दुष्कुलादपि'।
१५. रास्नासास्नास्थूणावीणाः।	१५. रास्ना, सास्ना, स्थूणा, वीणा।
१६. गादाभ्यामिष्णुच्।	१६. गेष्णुः, देष्णुः।
१७. कृत्यशूभ्यां क्स्नः।	१७. कृत्स्नम्, अक्ष्णम्।
१८. तिजेर्दीर्घश्च।	१८. तीक्ष्णम्। 'तीक्ष्णो राजा विषासहिः'।
१९. श्लिषेरच्चोपधायाः।	१९. श्लक्ष्णम्।
२०. यजिमनिशुन्धिदसिजनिभ्यो युच्।	२०. यज्युः, मन्युः, शुन्ध्युः, दस्युः, जन्युः।
२१. भुजिमृङ्भ्यां युक्त्युकौ।	२१. भुज्युः, मृत्युः।
२२. सरतेरयुः।	२२. सरयुः, सरयूः।
२३. पानीविषिभ्यः पः।	२३. पापम्, नेपः, वेष्पः।
२४. च्युवः किच्च।	२४. च्युपः।
२५. स्तुवो दीर्घश्च।	२५. स्तूपः।

२६. सुशृभ्यां निच्च।	२६. सूपः, शूर्पम्।
२७. कुयुभ्यां च।	२७. कूपः, यूपः।
२८. खष्पशिल्पशष्पवाष्परूपपर्पतल्पाः।	२८. खष्पः, शिल्पम्, शष्पम्, वाष्पम्, रूपम्, पर्पम्, तल्पम् [पम्पा, चम्पा]
२९. स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच्।	२९. स्तनयित्नुः, हर्षयित्नुः, पोषयित्नुः, गदयित्नुः, मदयित्नुः।
३०. कृहनिभ्यां क्त्नुः।	३०. कृत्नुः, हत्नुः।
३१. गमेः सन्वच्च।	३१. जिगत्नुः।
३२. दाभाभ्यां नुः।	३२. दानुः, भानुः।
३३. वचेर्गश्च।	३३. वग्नुः।
३४. धेट इच्च।	३४. धेनुः।
३५. सुवः कित्।	३५. सूनुः।
३६. जहातेर्द्वे ऽन्त्यलोपश्च।	३६. जह्नुः।
३७. स्थो णुः।	३७. 'स्थाणुरयं भारहारः किलाभूद्'।
३८. अजिवृरीभ्यो निच्च।	३८. वेणुः, वर्णुः, रेणुः।
३९. विषेः किच्च।	३९. विष्णुः।
४०. कृदाधारार्चिकलिभ्यः कक्।	४०. कर्कः, दाकः, धाकः, राका, अर्कः, कल्कमः [रङ्कः, लङ्का]
४१. सृवृभूशुषिमुषिभ्यः कक्।	४१. सृकः, वृकः, भूकम्, शुष्कः, मुष्कः- [ओकः, मूकः]।
४२. शुकवल्कोल्काः।	४२. शुकः, वल्कम्, उल्का।
४३. इण्भीकापाशल्यतिमर्चिभ्यः कन्।	४३. एकः, भेकः, काकः, पाकः, शल्कम्, अत्कः, मर्कः [शाकम्] ।
४४. नौ हः।	४४. निहाका।
४५. नौ सदेर्डिच्च।	४५. निष्कः।
४६. स्यमेरीट् च।	४६. स्यमीकः।
४७. अजियुधुनीभ्यो दीर्घश्च।	४७. वीकः, यूका, धूकः, नीकः।
४८. ह्रियो रश्च लो वा।	४८. ह्लीका, ह्रीका।
४९. शकेरुनोन्तोन्त्युनयः।	४९. शकुनः, शकुन्तः, शकुन्तिः, शकुनिः।
५०. भुवो झिच्।	५०. भवन्तिः [कुन्तिः, कुन्ती, अवन्तिः, वदन्तिः]।
५१. कन्युच् क्षिपेश्च।	५१. क्षिपण्युः, भुवन्युः।

५२. अनुङ् नदेश्च।	५२. नदनुः, क्षिपणुः।
५३. कृवृदारिभ्य उनन्।	५३. करुणा, वरुणः, दारुणम्।
५४. त्रो रश्च लो वा।	५४. तरुणः, तलुनः।
५५. क्षुधिपिशिमिथिभ्यः कित्।	५५. क्षुधुनः, पिशुनः, मिथुनम्।
५६. फलेगरुक् च।	५६. फल्गुनः।
५७. अशेर्लशश्च।	५७. लशुनम्।
५८. अर्जेर्णिलुक् च।	५८. अर्जुनः।
५९. तृणाख्यायां चित्।	५९. अर्जुनानि तृणानि तृट्शान्तये।
६०. अर्तेश्च।	६०. अरुणः।
६१. अजियमिशीङ्भ्यश्च।	६१. वयुनम्, यमुना, शयुनः।
६२. वृतॄवदिवचिवसिहनिकमिकषिभ्यः सः।	६२. वर्षम्, तर्षः, वत्सः, वक्षः, वत्सम्, हंसः, कंसः, कक्षः [राक्षा, लाक्षा, योषा]।
६३. प्लुषेरच्चोपधायाः।	६३. प्लक्षः।
६४. मनेर्दीर्घश्च।	६४. मांसम्। 'वर्जयेन्मधु मांसं च'।
६५. अशेर्देवने।	६५. 'अक्षैर्मा दीव्यः'।
६६. स्नुव्रश्चिकृत्यृषिभ्यः कित्।	६६. स्नुषा, वृक्षः, कृत्सम्, ऋक्षम्।
६७. ऋषेर्जातौ।	६७. ऋक्षा उक्तास्तु भल्लुकाः।
६८. उन्दिगुधिकुषिभ्यश्च।	६८. उत्सः, गुत्सः, कुक्षः।
६९. गृधिपण्योर्दकौ च।	६९. गृत्सः, पक्षः।
७०. अशेः सरन्।	७०. 'अक्षरं ब्रह्म परमम्'।
७१. वसेश्च।	७१. वत्सरः, 'वत्सराय विजर्जराम्'।
७२. सम्पूर्वाच्चित्।	७२. 'संवत्सराय पर्यायणीम्'।
७३. कृधूमदिभ्यः कित्।	७३. कृसरः, धूसरः, मत्सरः।
७४. पतेरश्च लः।	७४. रक्षितः पत्सलो ग्राह्यः।
७५. तन्यृषिभ्यां क्सरन्।	७५. तसरः, ऋक्षरः।
७६. पीयुक्वणिभ्यां कालन् ह्रस्वं सम्प्रसारणञ्च।	७६. पियालः, कुणालः।
७७. कठिकषिभ्यां काकुः।	७७. कठाकुः कषाकुः।
७८. सर्तेर्दुक् च।	७८. सृदाकुः।
७९. वृतेर्वृद्धिश्च।	७९. वात्तार्कुः।

८०.पर्देर्नित् सम्प्रसारणमलोपश्च।	८०. पृदाकुः। 'निपिष्टासः पृदाकवः', 'पृदाकू रक्षिताऽन्नमिषवः'।
८१.सृयुवचिभ्योऽन्युजागूजक्नुचः।	८१. सरण्युः, 'सरत् सरण्युः कारवे'। यवागूः, वचक्नुः।
८२.आनकः शीङ्भियः।	८२. शयानकः, भयानकः।
८३.आणको लूधूशिङ्घिधाञ्भ्यः।	८३. लवाणकः, धवाणकः, शिखाणकः, धाणकः [शिङ्घाणम्]
८४.उल्मुकदर्विहोमिनः।	८४. उल्मुकः, दर्विः, होमी।
८५.ह्रियः कुग् रश्च लो वा।	८५. ह्रीकुः, ह्लीकुः।
८६.हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन्।	८६. हस्तः, मत्तर्ः, गत्तर्ः, एतः, वातः, अन्तः, दन्तः, लोतः, पोतः, धूर्त्तः [तूस्तम्, छातः]
८७.नञ्याप इट् च।	८७. नापितः।
८८.तनिमृङ्भ्यां किच्च।	८८. ततम्, मृतम्।
८९.अञ्जिघृसिभ्यः क्तः।	८९. अक्तम्, घृतम्, सितम् [मुहूर्तम्, ऋतम्]।
९०.दुतनिभ्यां दीर्घश्च।	९०. दूतः, तातः।
९१.जेर्मूट् चोदात्तः।	९१. जीमूतः।
९२.लोष्टपलितौ।	९२. लोष्टम्, पलितम्।
९३.हृश्याभ्यामितन्।	९३. हरितः, श्येतः।
९४.रुहेरश्च लो वा।	९४. रोहितः, लोहितः।
९५.पिशेः किच्च।	९५. पिशितम्।
९६.श्रुदक्षिस्पृहिगृहिभ्य आय्यः।	९६. श्रवाय्यः, दक्षाय्यः, स्पृहयाय्यः, गृहयाय्यः।
९७.दधिषाय्यः।	९७. दधिषाय्यः।
९८.वृञ एण्यन् ।	९८. 'वरेण्यम् भर्गो देवस्य धीमहि'।
९९.स्तुवः केय्यश्छन्दसि ।	९९. स्तुवेय्यः। [स्तुषेय्यः]।
१००. ०राजेरन्यः।	१००. ०राजन्यः।
१०१. शृरम्योश्च।	१०१. शरण्यम्, रमण्यम्।
१०२. अर्तेर्निच्च।	१०२. 'अरण्यं ते पृथिवि स्योनमस्तु'।
१०३. पर्जन्यः।	१०३. 'पर्जन्यः स्तनयन् हन्ति दुष्कृतः'।
१०४. वदेरान्यः।	१०४. वदान्यः, वदान्या।

१०५. अमिनक्षियजिवधिपतिभ्योऽत्रन्।	१०५. अमत्रम्, नक्षत्रम्, यजत्रम्, वधत्रम्, पतत्रम्।
१०६. गडेरादेश्च कः।	१०६. कडत्रम् [कलत्रम्]।
१०७. वृञश्चित्।	१०७. वरत्रा।
१०८. सुविदेः कत्रन्।	१०८. सुविदत्रम्।
१०९. कृतेर्नुम् च।	१०९. कृन्तत्रम्।
११०. भृमृदृशियजिपर्विपच्यमितमि-नमि-हर्यिभ्योऽतच्।	११०. भरतः, मरतः, दर्शतः, यजतः, पर्वतः, पचतः, अमतः, तमतः, नमतः, हर्यतः [मालती]।
१११. पृषिरञ्जिभ्यां कित्।	१११. पृषतः, रजतम्।
११२. खलतिः।	११२. खलतिः, युवखलतिः।
११३. शीङ्शपिरुगमिवञ्चिजीविप्राणि-भ्योऽथः।	११३. शयथः, शपथः, रवथः, गमथः, वञ्चथः, जीवथः, प्राणथः [दरथः, शमथः, दमथः]
११४. भृञश्चित्।	११४. भरथः।
११५. रुविदिभ्यां ङित्।	११५. रुवथः, विदथः।
११६. उपसर्गे वसेः।	११६. आवसथः, संवसथः।
११७. अत्यविचमितमिनमिरभिलभि-नभि-तपिपतिपनिपणिमहिभ्योऽसच्।	११७. अतसः, अवसः, चमसः, तमसः, नमसः, रभसः, लभसः, नभसः, तपसः, पतसः, पनसः, पणसः, महसम् [तामसम्, साध्वसम्, कीकसम्, तरसम्]
११८. वेञस्तुट् च।	११८. वेतसः।
११९. वहियुभ्यां णित्।	११९. वाहसः, यावसः।
१२०. वयश्च।	१२०. वायसः।
१२१. दिवः कित्।	१२१. दिवसः।
१२२. कृशृशलिकलिगर्दिभ्योऽभच्।	१२२. करभः, शरभः, शलभः, कलभः, गर्दभः।
१२३. ऋषिवृषिभ्यां कित्।	१२३. ऋषभः, वृषभः।
१२४. रुषेर्निल्लुष् च।	१२४. लुषभः।
१२५. रासिवल्लिभ्यां च।	१२५. रासभः, वल्लभः।
१२६. जॄविशिभ्यां झच्।	१२६. जरन्तः, वेशन्तः।

१२७. रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि।	१२७. रोहन्तः, रोहन्ती, नन्दन्तः, नन्दन्ती, जीवन्तः, जीवन्ती, प्राणन्तः, प्राणन्ती।
१२८. तृभूवहिवसिभासिसाधिगडिमण्डि-जिनन्दिभ्यश्च।	१२८. तरन्तः, तरन्ती; भवन्तः, वहन्तः, वसन्तः, भासन्तः, साधन्तः, गण्डयन्तः, मण्डयन्तः, जयन्तः, नन्दयन्तः।
१२९. हन्तेर्मुट् हि च।	१२९. हेमन्तः। 'हेमन्तेन ऋतुना देवाः'।
१३०. भन्देर्नलोपश्च।	१३०. भदन्तः।
१३१. ऋच्छेररः।	१३१. ऋच्छरः, [वदरम्, शवरः, समरः, तोमरः]।
१३२. अर्तिकमिभ्रमिचमिदेविवासि-भ्यश्चित्।	१३२. अररः, कमरः, भ्रमरः, चमरः, देवरः, वासरः।
१३३. कुवः क्ररन्।	१३३. कुररः।
१३४. अङ्गिमदिमन्दिभ्य आरन्।	१३४. अङ्गारः, मदारः, मन्दारः।
१३५. गडे : कड च।	१३५. कडारः।
१३६. शृङ्गारभृङ्गारौ।	१३६. शृङ्गारः, भृङ्गारः।
१३७. कञ्जिमृजिभ्यां चित्।	१३७. कञ्जारः, मार्जारः।
१३८. कमेः किदुच्चोपधायाः।	१३८. कुमारः।
१३९. तुषारादयश्च।	१३९. तुषारम्, कासारः, सहारः, तर्कारः।
१४०. दीङो नुट् च।	१४०. दीनारः।
१४१. सर्तेरपः षुक् च।	१४१. सर्षपः।
१४२. उषिकुटिदलिकचिखजिभ्यः कपन्।	१४२. उषपः, कुटपः, दलपः, कचपम्, खजपम्।
१४३. क्वणेः सम्प्रसारणञ्च।	१४३. कुणपः।
१४४. कपश्चाक्रवर्मणस्य।	१४४. कुणपः।
१४५. विटपविष्टपविशिपोलपाः।	१४५. विटपः, विष्टपम्, विशिपम्, उलपम्।
१४६. वृतेस्तिकन्।	१४६. वर्त्तका।
१४७. कृतिभिदिलतिभ्यः कित्।	१४७. कृत्तिका, भित्तिका, लत्तिका।
१४८. इष्यशिभ्यां तकन्।	१४८. इष्टका, अष्टका।
१४९. इणस्तशन्तशसुनौ।	१४९. एतशः, एतशौ, एतशाः।
१५०. वीपतिभ्यां तनन्।	१५०. वेतनम्, पत्तनम्।

१५१. दृदलिभ्यां भः। — १५१. दर्भः, दल्भः।
१५२. अर्तिगृभ्यां भन्। — १५२. अर्भः, गर्भः।
१५३. इणः कित्। — १५३. इभः।
१५४. असिसञ्जिभ्यां क्थिन्। — १५४. अस्थि, सक्थि।
१५५. प्लुषिकुषिशुषिभ्यः क्सिः। — १५५. प्लुक्षिः, कुक्षिः, शुक्षिः।
१५६. अशेर्नित्। — १५६. अक्षि।
१५७. इषेः क्सुः। — १५७. इक्षुः।
१५८. अवितॄस्तृतन्त्रिभ्य ईः। — १५८. अवीः, तरीः, स्तरीः, तन्त्रीः।
१५९. यापोः किद् द्वे च। — १५९. ययीः, पपीः।
१६०. लक्षेमरुट् च। — १६०. लक्ष्मीः। भद्रैषां लक्ष्मीः।

इति तृतीयः पादः

चतुर्थः पादः

१. वातप्रमीः।	१. वातप्रमीः।
२. ऋतन्यञ्जिवन्यञ्ज्यर्पिमद्यत्यङ्गि-कुयुकृ-शिभ्यःकत्निज्यतुजलिजिष्णुजिष्ठजि-सन्स्यनिथिन्नुल्य-सासानुकः।	२. रत्निः, तन्यतुः, अञ्जलिः, वनिष्णुः, अञ्जिष्ठः, अर्पिसः, मत्स्यः, अतिथिः, अङ्गुलिः, कवसः, यवासः, कृशानुः [कवचम्]
३. श्रः करन्।	३. शर्करा।
४. पुषः कित्।	४. पुष्करम्।
५. कलँश्च।	५. पुष्कलम्।
६. गमेरिनिः।	६. गमी।
७. आङि णित्।	७. आगामी।
८. भुवश्च।	८. भावी।
९. प्रे स्थः।	९. प्रस्थायी।
१०. परमे कित्।	१०. परमेष्ठी।
११. मन्थः।	११. मन्थाः, मन्थानौ, मन्थानः।
१२. पतः थ च।	१२. पन्थाः, पन्थानौ, पन्थानः।
१३. खजेराकः।	१३. खजाकः [मन्दाकः]।
१४. बलाकादयश्च।	१४. वलाका, मनाका, पवाका [शलाका, पटाकः, पताका]।
१५. पिनाकादयश्च।	१५. पिनाकः [तडाका, तडागः, पिण्याकः]।
१६. कषिदूषीभ्यामीकन्।	१६. कषीका, दूषीका।
१७. अनिहृषिभ्यां किच्च।	१७. अनीकम्, हृषीकम्।
१८. चङ्कणः कङ्कणश्च।	१८. कङ्कणीका।
१९. शृपृवृञां द्वे रुँक् चाभ्यासस्य।	१९. शर्शरीकः, पर्परीकः, वर्वरीकः।
२०. फर्फरीकादयश्च।	२०. फर्फरीकम्, दर्दरीकम्, तिन्तिडीकम्, पुण्डरीकम्।
२१. ईषेः किद्धस्वश्च।	२१. इषीका।
२२. ऋजेश्च।	२२. ऋजीकः।
२३. सर्तेर्नुम् च।	२३. सृणीका।
२४. मृडः कीकच्कङ्कणौ।	२४. मृडीकः, मृडङ्कणः।
२५. अलीकादयश्च।	२५. अलीकम्, वल्मीकम्, वलीकम्।
२६. कॄतॄभ्यामीषन्।	२६. करीषः, तरीषः।

२७. शॄपॄभ्यां किच्च।	२७. शिरीषः, पुरीषम्।
२८. अर्जेऋरज् च।	२८. ऋजीषम्।
२९. अम्बरीषः।	२९. अम्बरीषः।
३०. कॄशॄपॄकटिपटिशौटिभ्य ईरन्।	३०. करीरः, शरीरम्, परीरम्, कटीरः, पटीरः, शौटीरः [हिण्डीरः, तूणीरः]।
३१. वशेः किच्च।	३१. उशीरम्।
३२. कशेर्मुट् च।	३२. कश्मीरः।
३३. कॄञ उच्च।	३३. कुरीरम्।
३४. घसेः किच्च।	३४. क्षीरम्। 'सरस्वती दुहे क्षीरम्'।
३५. गभीरगम्भीरौ।	३५. गभीरः, गम्भीरः।
३६. विषाविहा।	३६. विषा, विहा।
३७. पच एलिमच्।	३७. पचेलिमः।
३८. शीङो धुक्लग्वलञ्वालनः।	३८. शीधु, शीलम्, शैवलम्, शेवालम्।
३९. मृकणिभ्यामूकोकणौ।	३९. मरूकः, काणूकः।
४०. वलेरूकः।	४०. वलूकः।
४१. उलूकादयश्च।	४१. उलूकः, वावदूकः, शम्बूकः, जम्बूकः।
४२. शलिमण्डिभ्यामूकण्।	४२. शालूकः, मण्डूकः।
४३. नियो मिः।	४३. नेमिः [यामिः, जामिः]
४४. अर्तेरुच्च।	४४. ऊर्मिः। 'मध्वः पवन्त ऊर्मयः'।
४५. भुवः कित्।	४५. भूमिः [भूमी]।
४६. अश्नोते रश च।	४६. रश्मिः | 'रश्मीन् देव यमसे'।
४७. दल्मिः।	४७. दलन्तु दल्मिना शत्रून्।
४८. वीज्याज्वरिभ्यो निः।	४८. वेणिः, ज्यानिः, जूर्णिः।
४९. सृवृषिभ्यां कित्।	४९. सृणिः, वृष्णिः।
५०. अङ्गेर्नलोपश्च।	५०. अग्निः। 'अग्निनाऽग्निः समिध्यते'।
५१. वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्।	५१. वह्निः, श्रेणिः, श्रोणिः, योनिः, द्रोणिः, ग्लानिः, हानिः, तूर्णिः, [शिनिः, म्लानिः]।
५२. घृणिपृश्निपार्ष्णिचूर्णिभूर्णयः।	५२. घृणिः, पृश्निः, पार्ष्णिः, चूर्णिः, भूर्णिः [घूर्णिः]।
५३. वॄदॄभ्यां विन्।	५३. वर्विः, दर्विः।
५४. जॄशॄस्तॄजागृभ्यः क्विन्।	५४. जीर्विः, शीर्विः, स्तीर्विः, जागृविः।
५५. दिवो द्वे दीर्घश्चाभ्यासस्य।	५५. दीदिविः।

५६.कृविघृष्विछविस्थविकिकीदिवि।	५६. कृविः, घृष्विः, छविः, स्थविः, किकीदिविः।
५७.पातेर्डतिः।	५७. पतिः। 'दीर्घायुरस्या यः पतिः'।
५८.शकेतिन्।	५८. शकृत् [यकृत्]।
५९.अमेरतिः।	५९. अमतिः [व्रततिः, व्रतती, मालतिः]।
६०.वहिवस्यर्तिभ्यश्चित्।	६०. वहतिः, वसतिः, अरतिः [अलतिः]।
६१.अञ्चेः को वा।	६१. अङ्कतिः, अञ्चतिः।
६२.हन्तेरंह च।	६२. अंहतिः।
६३.रमेर्नित्।	६३. रमतिः।
६४.सूङः क्रिः।	६४. सूरिः। 'रातिमुपसृजन्ति सूरयः'।
६५.अदिशदिभूशुभिभ्यः क्रिन्।	६५. अद्रिः, शद्रिः, भूरिः, शुभ्रिः।
६६.वङ्क्यादयश्च।	६६. वङ्क्रिः, वप्रिः, अंिः, तन्द्रिः, भेरिः।
६७.राशदिभ्यां त्रिप्।	६७. रात्रिः, शत्रिः।
६८.अदेस्त्रिनिश्च।	६८. अत्री, अत्रिणौ। अत्रिः।
६९.पतेरत्रिन्।	६९. पतत्रिः।
७०.मृकणिभ्यामीचिः।	७०. मरीचिः, कणीचिः।
७१.श्वयतेश्चित्।	७१. श्वयीचिः।
७२.वेञो डच्च।	७२. वीचिः।
७३.ऋहनिभ्यामूषन्।	७३. अरूषः, हनूषः।
७४.पुरः कुषन्।	७४. पुरुषः। 'वेदाहमेतं पुरुषम्'।
७५.पृनहिकलिभ्य उषच्।	७५. परुषम्, नहुषः, कलुषम्।
७६.पीयेरूषन्।	७६. पीयूषम्, पेयूषम् [अूषः]
७७.मस्जेर्नुम् च।	७७. मञ्जूषा।
७८.गण्डेश्च।	७८. गण्डूषः।
७९.अर्तेररुः।	७९. अररुः।
८०.कुटः किच्च।	८०. कुटरुः।
८१.शकादिभ्योऽटन्।	८१. शकटः, वरटः, सरटः, चपेटः।
८२.कृकदिकडिकटिभ्योऽम्बच्।	८२. करम्बः, कदम्बः, कडम्बः, कटम्बः।
८३.कदेर्णित्पक्षिणि।	८३. कादम्बः।
८४.कलिकर्द्योरमः।	८४. कलमः, कर्दमः।
८५.कुणिपुल्योः किन्दच्।	८५. कुणिन्दः, पुलिन्दः [अलिन्दः]।
८६.कुपेर्वा वश्च।	८६. कुविन्दः, कुपिन्दः।
८७.नौ षञ्जेर्घथिन्।	८७. निषङ्गथिः।

८८. उद्यर्तेश्चित्।	८८. उदरथिः।
८९. सर्तेर्णिच्च।	८९. सारथिः।
९०. खर्जिपिञ्जादिभ्य ऊरोलचौ।	९०. खर्जूरः, कर्पूरः, धुस्तूरः, पिञ्जूलः, लाङ्गूलम्, शार्दूलः।
९१. कुवश्चट् दीर्घश्च।	९१. कूचः, कूची।
९२. समीणः।	९२. समीचः, समीची।
९३. सिवेष्टेरू च।	९३. सूचः, सूची।
९४. शमेर्बन्।	९४. शम्बः।
९५. उल्बादयश्च।	९५. उल्बः, शुल्बम्, निम्बः, धन्वम्।
९६. स्थः स्तोऽम्बजवकौ।	९६. स्तम्बः, स्तवकः।
९७. शाशपिभ्यां ददनौ।	९७. शादः, शब्दः।
९८. अब्दादयश्च।	९८. अब्दः, कुन्दः, वृन्दम्, कन्दः।
९९. वलिमलितनिभ्यः कयन्।	९९. वलयम्, मलयः, तनयः।
१००. ०वृह्रोः षुक्दुकौ च।	१००. ०वृषयः, हृदयम्।
१०१. मीपीभ्यां रुः।	१०१. मेरुः, पेरुः।
१०२. जत्र्वादयश्च।	१०२. जत्रुः, शिग्रुः, कद्रुः, अस्रुः, अश्रु।
१०३. रुशातिभ्यां क्रुन्।	१०३. रुरुः, शत्रुः।
१०४. जनिदाच्युसृवृमदिषमिनमि- भृञ्भ्य इत्वन्त्वन्त्नण् क्वन्शक्-स्यढडटो-टचः।	१०४. जनित्वः, दात्वः, च्यौत्नम्, सृणिः, वृशः, मत्स्यः, षण्ढः, नटः, भरटः।
१०५. अन्येभ्योऽपि दृश्यन्ते।	१०५. पेत्वम्, कच्छः, सरटः, ध्यात्वम्, हौत्नः।
१०६. कुसेरुम्भोमेदेताः।	१०६. कुसुम्भम्, कुसुमम्, कुसीदम्, कुसितः।
१०७. सानसिवर्णसिपर्णसितण्डुलाङ्कुश-चषालेल्वलपल्व-लधिष्ण्यशल्याः।	१०७. सानसिः, वर्णसिः, पर्णसिः, तण्डुलः, अङ्कुशः, चषालः, इल्वलः, पल्वलम्, धिष्ण्यः, शल्यम्।
१०८. मूशक्यम्बभ्यः क्लः।	१०८. मूलम्, शक्लः, अम्ब्लः [अम्लम्]।
१०९. माछाशसिभ्यो यः।	१०९. माया, छाया, शस्यम् [अन्यः]।
११०. सुनोतेश्च।	११०. सव्यम्। 'सव्येन यमति व्राधतः।
१११. जनेर्यक्।	१११. जन्यम् [जाया] ।
११२. अघ्न्यादयश्च।	११२. अघ्न्या, सन्ध्या, कन्या, वन्ध्या [कुड्यम्, वह्यम्, अहल्या]।

११३. स्नामदिपद्यर्तिपॄशकिभ्यो वनिप्।	११३. स्नावा, मद्वा, पद्वा, अर्वा, पर्व, शक्वा, शक्वरी।
११४. शीङ्क्रुशिरुहिजिक्षिसृधृभ्यः क्वनिप्।	११४. शीवा, क्रुश्वा, रुह्वा, जित्वा, क्षित्वा, सृत्वा, धृत्वा।
११५. ध्याप्योः सम्प्रसारणञ्च।	११५. धीवा, पीवा, पीवरी।
११६. अदेर्ध च।	११६. अध्वा।
११७. प्र ईरशदोस्तुट् च।	११७. प्रेत्वार्, प्रेत्वरी, प्रशत्त्वा।
११८. सर्वधातुभ्य इन्।	११८. पचिः, तुण्डिः, वलिः, मणिः, कटिः।
११९. हृपिषिरुहिवृतिविदिछिदिकीर्ति-भ्यश्च।	११९. हरिः, पेषिः, रोहिः, वत्तिः, वेदिः, छेदिः कीत्तिर्ः।
१२०. इगुपधात् कित्।	१२०. कृषिः, ऋषिः, रुचिः, शुचिः, लिपिः।
१२१. भ्रमेः सम्प्रसारणञ्च।	१२१. भृमिः [भ्रमिः]।
१२२. क्रमितमिशतिस्तम्भामत इच्च।	१२२. क्रिमिः, तिमिः, शितिः, स्तिभिः।
१२३. मनेरुच्च।	१२३. मुनिः।
१२४. वर्णेबर्लिँश्चाहिरण्ये।	१२४. वलिः। 'प्रहुतो भौतिको बलिः'।
१२५. वसिवपियजिराजिव्रजिसदि-हनि-वाशिवादिवारिभ्य इञ्।	१२५. वासिः, वापिः, याजिः, राजिः, व्राजिः, सादिः, घातिः, वाशिः, वादिः, वारिः [हारिः, खाटिः]।
१२६. नहो भश्च।	१२६. नाभिः। 'नाभिर्मे चित्तं विज्ञानम्'।
१२७. कृषेर्वृद्धिश्छन्दसि।	१२७. कार्षिः। 'कार्षिरसि समुद्रस्य'।
१२८. श्रः शकुनौ।	१२८. शारिः [शरिः]।
१२९. कृञ उदीचां कारुषु।	१२९. कारिः।
१३०. जनिघसिभ्यामिण्।	१३०. जनिः, घासिः [शालिः, पालिः]।
१३१. अज्यतिभ्याञ्च।	१३१. आजिः, आतिः।
१३२. पादे च।	१३२. पदाजिः, पदातिः।
१३३. अशिपणाय्यो रुडायलुकौ च।	१३३. राशिः, पाणिः।
१३४. वातेर्डिच्च।	१३४. विः। 'वयो नकिष्टे पप्तिवांस'।
१३५. प्रे हरतेः कूपे।	१३५. प्रहरिः।
१३६. नौ व्यो यलोपः पूर्वस्य च दीर्घः।	१३६. नीविः।
१३७. समाने ख्यः स चोदात्तः।	१३७. सखा, सखायौ, सखायः।
१३८. आङि श्रहनिभ्यां ह्रस्वश्च।	१३८. अश्रिः, अहिः। 'अहन्नहिम्'।
१३९. अच इः।	१३९. लविः, पविः, रविः, कविः, अरिः।
१४०. खनिकष्यञ्ज्यसिवसिवनि-सनिध्व-निग्रन्थिचरिभ्यश्च।	१४०. खनिः, कषिः, अञ्जिः, असिः, वसिः, वनिः, सनिः, ध्वनिः, ग्रन्थिः, चरिः।

१४१. वृतेश्छन्दसि।	१४१. वर्तिः।
१४२. भुजेः किच्च।	१४२. भुजिः। भगस्येव भुजिं हुवे।
१४३. कॄगॄशॄपॄकुटिभिदिछिदिभ्यश्च।	१४३. किरिः, गिरिः, शिरिः, पुरिः, कुटिः, भिदिः, छिदिः [तित्तिरिः]।
१४४. कुण्ठिकम्प्योर्नलोपश्च।	१४४. कुठिः, कपिः।
१४५. सर्वधातुभ्यो मनिन्।	१४५. कर्म, चर्म, भस्म, जन्म, हेम।
१४६. बृंहेनोर्ऽच्च।	१४६. ब्रह्म। 'ज्येष्ठाय ब्रह्मणे नमः'।
१४७. अशिशकिभ्यां छन्दसि।	१४७. अश्मा, शक्मा।
१४८. हृभृधृसृस्तृशॄभ्य इमनिच्।	१४८. हरिमा, भरिमा, धरिमा, सरिमा, स्तरिमा, शरिमा।
१४९. जनिमृङ्भ्यामिमनिन्।	१४९. जनिमा, मरिमा।
१५०. वेञः सर्वत्र।	१५०. वेमा।
१५१. नामन्सीमन्व्योमन्रोमन्-लोमन्पापमन्ध्यामन्।	१५१. नाम, सीमा, व्योम, रोम, लोम, पाप्मा, ध्यामा [यक्ष्मा, धाम]।
१५२. मिथुने मनिः।	१५२. सुशर्मा, सुधर्मा।
१५३. सातिभ्यां मनिन्मनिणौ।	१५३. साम, आत्मा।
१५४. हनिमशिभ्यां सिकन्।	१५४. हंसिका, मक्षिका।
१५५. कोररन्।	१५५. कवरः।
१५६. गिर उडच्।	१५६. गरुडः।
१५७. इन्देः कमिर्नलोपश्च।	१५७. इदम्। 'इदं श्रेष्ठं ज्योतिषाम्'।
१५८. कायतेर्डिमिः।	१५८. किम्। 'किम्वावपनं महत्'।
१५९. सर्वधातुभ्यः ष्ट्रन्।	१५९. वस्त्रम्, अस्त्रम्, छत्रम्, राष्ट्रम्।
१६०. भ्रस्जिगमिनमिहनिविश्यशां वृद्धिश्च।	१६०. भ्राष्ट्रम्, गान्त्रम्, नान्त्रम्, हान्त्रम्, वैष्ट्रम्, आष्ट्रम्।
१६१. दिवेर्द्युच्च।	१६१. द्यौत्रम्।
१६२. उषिखनिभ्यां कित्।	१६२. उष्ट्रः खात्रम्।
१६३. सिविमुच्योष्टेरू च।	१६३. सूत्रम्, मूत्रम्।
१६४. अमिचिमिशसिभ्यः क्त्रः।	१६४. अन्त्रम्, चित्रम्, मित्रम्, शस्त्रम्।
१६५. पुवो ह्रस्वश्च।	१६५. पुत्रः [पुत्राणां नो असः पिता]।
१६६. स्त्यायतेर्ड्ट्।	१६६. 'स्त्री हि ब्रह्मा बभूविथ'।
१६७. गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः।	१६७. गोत्रम्, धर्त्रम्, वेत्रम्, पक्त्रम्, वक्त्रम्, यन्त्रम्, सत्रम्, क्षत्रम् [गोत्रा]।
१६८. हुयामाश्रुभसिभ्यस्त्रन्।	१६८. होत्रम्, यात्रा, मात्रा, श्रोत्रम्, भस्त्रा।
१६९. गमेरा च।	१६९. गात्रम्,। 'गात्रे गात्रे निषसत्थाः'।

१७०. दादिभ्यश्छन्दसि।	१७०. दात्रम्, पात्रम्, क्षेत्रम्।
१७१. भूवादिगृभ्यो णित्रन्।	१७१. भावित्रम्, वादित्रम्, गारित्रम्।
१७२. चरेर्वृत्ते।	१७२. चारित्रेणैव रक्ष्यन्ते योषितः।
१७३. अशित्रादिभ्य इत्रोत्रौ।	१७३. अशित्रम्, कटित्रम्, त्रोत्रम्, लोत्रम्।
१७४. अमेर्द्विषति चित्।	१७४. अमित्रान् प्र णुदेत्छीघ्रम्।
१७५. आः समिण्निकषिभ्याम्।	१७५. समया, निकषा, [दिवा, दोषा, स्वधा]।
१७६. चितेः कणः कश्च।	१७६. चिक्कणा त्वक्तु बालानाम्।
१७७. सूचेः स्मन्।	१७७. सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यः स्त्रियो रक्ष्याः।
१७८. पातेडर्म्सुँन्।	१७८. 'पुमान् पुमांसं परि पातु'।
१७९. रुचिभुजिभ्यां किष्यन्।	१७९. रुचिष्यम्, भुजिष्यः।
१८०. वसेस्तिः।	१८०. वस्तिः [शास्तिः, यष्टिः, गभस्तिः]।
१८१. सावसेः।	१८१. 'स्वस्ति न इन्द्रो वृद्धश्रवाः'।
१८२. वौ तसेः।	१८२. वितस्तिः।
१८३. पदिप्रथिभ्यां नित्।	१८३. पत्तिः, प्रथितिः।
१८४. दृणातेर्ह्रस्वश्च।	१८४. 'दृतिं वहेथे मधुमन्तमश्विना'।
१८५. कृतॄकृपिभ्यः कीटन्।	१८५. किरीटम्, तिरीटम्, कृपीटम्।
१८६. रुचिवचिकुचिकुटिभ्यः कितच्।	१८६. रुचितम्, उचितम्, कुचितम्, कुटितम्।
१८७. कुटिकुषिभ्यां क्मलन्।	१८७. कुड्मलम्, कुष्पलम्।
१८८. कुषेर्लश्च।	१८८. कुल्मलं वाङ्नाडीकादन्ताः।
१८९. सर्वधातुभ्योऽसुँन्।	१८९. वर्चः, रक्षः, चेतः, तपः, रोदसी।
१९०. रपेरत एच्च।	१९०. रेपः [पयः]।
१९१. अशेर्देवने युट् च।	१९१. यशश्च मे यज्ञेन कल्पन्ताम् ।
१९२. उब्जेर्बले बलोपश्च।	१९२. ओजोऽस्योजो मयि धेहि।
१९३. श्वेः सम्प्रसारणञ्च।	१९३. शवः। शवसा ह्यसि श्रुतः।
१९४. श्रयतेः स्वाङ्गे शिरः किच्च।	१९४. शिरः।
१९५. अर्तेरुच्च।	१९५. उरः।
१९६. व्याधौ शुटुँ च।	१९६. अर्शः। नाशयित्री...अर्शसः।
१९७. उदके नुट् च।	१९७. अर्णः। अणास्यैरयतं नदीनाम्।
१९८. इण आगसि।	१९८. एनः। एनस एनसोऽव यजनम्।
१९९. रिचेर्धने घिच्च।	१९९. रेक्णः। रेक्णः परमं वनोषि।
२००. ०चायतेरन्ने ह्रस्वश्च।	२००. ०चनो दधिष्व पचतोत सोमम्।
२०१. वृङ्शीङ्भ्यां रूपस्वाङ्गयोः पुट् च।	२०१. वर्पः। अन्यद् वर्पः पित्रोः।
२०२. स्रुरीभ्यां तुट् च।	२०२. स्रोतः, रेतः।

२०३. पातेर्बले जुट् च।	२०३. पाजः। उग्रं ते पाजो ननु।
२०४. उदके थुटँ च।	२०४. पाथः। वनस्पते: प्रिया पाथांसि।
२०५. अन्ने च।	२०५. देवानां प्रियं पाथोऽपीहि।
२०६. अदेर्नुम्धौ च।	२०६. अन्ध स्थान्धो वो भक्षीय।
२०७. स्कन्देश्च स्वाङ्गे।	२०७. स्कन्धांसीव कुलिशेना विवृक्णा।
२०८. आपः कर्माख्यायां ह्रस्वो नुट् च वा।	२०८. अपः। 'एक...अपांसि कर्त्ता', देवेषु चकृषे भद्रमप्नः।
२०९. रूपे जुट् च।	२०९. अब्जः, अब्जसी, अब्जांसि।
२१०. उदके नुम्भौ च।	२१०. 'अम्भः किमासीद् गहनम्'।
२११. नहेर्दिवि भश्च।	२११. नभश्च नभस्यंश्च वार्षिकौ।
२१२. इण आगोऽपराधे च।	२१२. आगः। 'किमाग आस' ?
२१३. अमेहुक् च।	२१३. अंहः। 'स नो मुञ्च त्वंहसः'।
२१४. रमेश्च।	२१४. रंहः। भीमो जगाम रंहसा।
२१५. देशे ह च।	२१५. रहः। राजा रहसि मन्त्रयेत्।
२१६. अञ्च्यञ्जियुजिभृजिभ्यः कुश्च।	२१६. अङ्कः, अङ्कसी, अङ्कांसि, अङ्गः, अङ्गसी, योगः, योगसी, भर्गः, भर्गसी।
२१७. भूरञ्जिभ्यां कित्।	२१७. भुवः, रजः।
२१८. वसेर्णित्।	२१८. वर्म वासांसि तन्वे भवन्ति।
२१९. चन्देरादेश्च छः।	२१९. छन्दः। त्रिष्टुब्गायत्री छन्दांसि।
२२०. पचिवचिभ्यां सुट् च।	२२०. पक्षः, वक्षः, पक्षांसि, वक्षांसि।
२२१. वहिहाधाञ्भ्यश्छन्दसि।	२२१. वक्षाः, हासाः, धासाः (वाहाः, विहायाः, धायाः)।
२२२. इणश्चासिँः।	२२२. अयाः। 'सत्यमित्त्वमया असि'।
२२३. मिथुनेऽसिँः पूर्ववच्च सर्वम्।	२२३. सुपयाः, सुतपाः, सुयशाः, न्योजाः, सुजवाः, सुस्रोताः।
२२४. नञि हन एह च।	२२४. 'अनेहा विश्वं विवेष्टि'।
२२५. विधाञो वेध च।	२२५. 'ऋतस्य पथि वेधा अपायि'।
२२६. नुवो धुट् च।	२२६. 'सद्यो भुवद् वीर्याय नोधाः।
२२७. गतिकारकोपपदयोः पूर्वपद- प्रकृतिस्वरत्वञ्च।	२२७. सुतपाः, सुतेजाः, सुवक्षाः, जातवेदाः, वृद्धश्रवाः
२२८. चन्द्रे मो डित्।	२२८. 'चन्द्रमा अस्वन्तरा'।
२२९. वयसि धाञः।	२२९. 'अग्निवीर्रतमो वयोधाः'।
२३०. पयसि च।	२३०. पयोधाः।

२३१. पुरसि च।	२३१. पुरोधाः।
२३२. पुरूरवाः।	२३२. 'आयुर्रसि पुरूरवा असि'।
२३३. चक्षेर्बहुलं शिच्च।	२३३. विचक्षाः, नृचक्षाः।
२३४. उषः किच्च।	२३४. उषाः। य उषसि प्रशंसात् ।
२३५. दमेरुनसिः।	२३५. दमुनाः, दमूनाः।
२३६. अङ्गिराः।	२३६. 'त्वमग्ने प्रथमो अङ्गिरा ऋषिः'।
२३७. अप्सराः।	२३७. 'तस्य मरीचयोऽप्सरसः'।
२३८. विदिभुजिभ्यां विश्वे।	२३८. विश्ववेदाः, विश्वभोजाः।
२३९. वशेः कनसिः।	२३९. उशनाः।

इति चतुर्थः पादः

पञ्चमः पादः

१. अदिभुवो डुतच्।	१. अद्भुतम्।
२. गुधेरूमः।	२. गोधूमाः।
३. मसेरूरः।	३. मसूराः। 'गोधूमाश्च मे मसूराश्च मे।
४. स्थः किच्च।	४. स्थूरः। 'धा रत्नं महि स्थूरम्।
५. पातेरतिः।	५. पातिः। 'पालनात् पातिरीश्वरः।
६. वातेर्नित्।	६. वातिः।
७. अर्तेश्च।	७. अरतिमः।
८. तृहेः क्नो हलोपश्च।	८. तृणम्।
९. वृञ्लुठितनिताडिभ्य उलच्तण्डश्च।	९. तण्डुलाः। मितास्तण्डुलाः प्र दिशो यदीमाः।
१०. दंसेष्टटनौ न आ च।	१०. दासः, दासी।
११. दंशेश्च।	११. दाशम्, दाशः।
१२. उदि चेर्डैसिः।	१२. उच्चैर्घोषाऽभ्येति (उच्चैः) या व्रतम्।
१३. नौ दीर्घश्च।	१३. नीचैः।
१४. सौ रमेः क्तो दमे पूर्वपदस्य च दीर्घः।	१४. सूरतः स दयानन्दो गरदमप्यमूमुचत्।
१५. पूञो यण्णुँग्घ्रस्वश्च।	१५. पुण्यांश्च (पुण्यम्) लोकान् जयति ।
१६. स्रंसेः शिः कुँट् किच्च।	१६. शिक्यम्।
१७. अर्तेः क्युरुच्च।	१७. उरणमः।
१८. हिंसेरीरन्नीरचौ।	१८. हिंसीरः।
१९. उदि दृणातेरलचौ पूर्वपदान्त्यलोपश्च।	१९. उदरम्। 'पिबा सुपूर्णमुदरम्'।
२०. डित्खनेर्मुट् चोदात्तः।	२०. मुखम् (मुखादग्निरजायत)।
२१. अमेः सन्।	२१. अंसः। 'ऋष्टयों वो मरुतो अंसयोः।
२२. मुहेः खो मूर्च।	२२. मूर्खः।
२३. नहेर्हलोपश्च।	२३. नखः।
२४. शीङो ह्रस्वश्च।	२४. 'यशसे श्रियै शिखा'।
२५. माङ ऊखो मय च।	२५. 'इमे मयूखाः उप सेदरू सदः'।
२६. कलिगलिभ्यां फगस्योच्च।	२६. कुल्फः, गुल्फः।

२७.स्पृशेः श्वण्शुनौ पृ च।	२७. पार्श्वः, पशुर्ः।
२८.श्मनि श्रयतेर्डुन्।	२८. श्मश्रु। 'इन्द्रः श्मश्रूणि ...प्रुष्णुते'।
२९.अश्वादयश्च।	२९. अश्रु।
३०.जनेष्टन् नलोपश्च।	३०. जटा।
३१.अच् तस्य जङ्घ च।	३१. जङ्घा।
३२.हन्तेः शरीरावयवे द्वे च।	३२. जघनम्।
३३.क्लिशेरन् लो लोपश्च।	३३. केशः। 'कुतः केशान्...आभंरत्'।
३४.फलेरितजादेश्च पः।	३४. पलितम्।
३५.कृञादिभ्यः सञ्ज्ञायां वुन्।	३५. करकः, कटकः, नरकम्, सरकम्, अलकम्, कोरकः।
३६.चीकयतेराद्यन्तविपर्ययश्च।	३६. कीचकः।
३७.पचिमच्योरिच्चोपधायाः।	३७. पेचकः, मेचकः।
३८.जनेररष्ठ च।	३८. 'आ सिञ्चस्व जठरे (जठरम्) मध्व ऊर्मिम्।
३९.वचिमनिभ्यां चिच्च।	३९. वठरः, मठरः।
४०.ऊर्जि दृणातेरलचौ।	४०. ऊर्दरः।
४१.कृदरादयश्च।	४१. कृदरः, मृदरः, सृदरः।
४२.हन्तेर्युन्नाद्यन्तयोर्घत्वतत्वे।	४२. घातनः।
४३.क्रमिगमिक्षमिभ्यस्तुन् वृद्धिश्च।	४३. क्रान्तुः, गान्तुः, क्षान्तुः।
४४.हर्यतेः कन्यन् हिरँ च।	४४. इदं हिरण्यं वर्चस्वद्।
४५.कृञः पासः।	४५. कर्पासात् (कर्पासः, कार्पासम्) क्रियते सूत्रम्।
४६.जनेस्तु रश्च।	४६. जर्तुः।
४७.ऊर्णोतेडर्ः।	४७. 'ऊर्णा वसत शुन्ध्यवः।
४८.दधातेर्यन्नुँट् च।	४८. 'धान्यमसि (धान्यम्) धिनुहि देवान्'।
४९.जीर्यतेः क्रिन् रश्च वः।	४९. जिव्रिः।
५०.मव्यतेर्यलोपो मश्चापतुँट् चालः।	५०. ममाप्तालः।
५१.ऋजेः कीकच्।	५१. ऋजीकः।

५२.तनोतेर्ड उः सन्वच्च।	५२. 'सक्तुमिव तितउना पुनन्तो यत्र तितउ:'।
५३.अर्भकपृथुकपाका वयसि।	५३. अर्भकः, पृथुकः, पाकः, अर्भकेभ्यश्च वो नम:।
५४.अवद्यावमाधमार्वरेफाः कुत्सिते।	५४. अवद्यम्, अवमम्, अधमम्, अर्व:, रेफ:।
५५.लीरीङोर्ह्रस्वः पुट् च तरौ श्लेषणकुत्सनयो:।	५५. लिप्तम्, रिप्रम् 'रिप्रमस्मत् (प्रवहन्तु)'।
५६.क्लिशेरीच्चोपधाया: कन् लोपश्च लो नाम् च।	५६. कीनाश:। 'शुनं कीनाशा अभि यन्तु वाहै:'।
५७.अश्नोतेराशुकर्मणि वरट् च।	५७. 'मामा हिंसिषुरीश्वरा:', ईश्वरी (ईश्वर:)।
५८.चतेरूरँन्।	५८. 'चत्वार: (चतु:, चत्वार:, चतस्र:) स्थन देवा:'।
५९.प्राततेररँच्।	५९. प्रातरग्निं प्रातरिन्द्रं हवामहे। (प्रात:)
६०.अमेस्तुँट् च।	६०. 'प्रजापतिश्चरति गर्भे अन्त:'। अन्त:
६१.दहेर्गो हलोपो दश्च न:।	६१. नग:।
६२.सिचे: संज्ञायां हनुँमौ कश्च।	६२. सिंह:।'सिंहो न दमे अपांसि वस्तो:'।
६३.व्याङि घ्रातेश्च जातौ।	६३. 'व्याघ्र: श्वपदामिव'।
६४.हंतेरच् घुरँ च।	६४. नमो व: पितरो घोराय (घोरम्)।
६५.क्षमेरुपधा लोपश्च।	६५. क्ष्मा। 'स प्ररिक्वा....क्ष्मो दिवश्च'।
६६.तरतेड्रिर्ः।	६६. (त्रि:, त्रयः, त्रीन्)।
६७.ग्रहेरनि:।	६७. ग्रहणि:, ग्रहणी।
६८.प्रथेरमच्।	६८. 'प्रथमो विन्दते वसु'। प्रथम:
६९.चरेश्च।	६९. स नो रक्षिषच्चरमम्। चरम:
७०.मङ्गेरलच्।	७०. मंगलं पाठकानां स्यात्। मंगलम्

इति पञ्चम: पाद:

परिशिष्टम्- २

उणादिसूत्र - निर्दिष्टशब्दानां सस्थलनिर्देशा सार्था वर्णानुक्रमणिका

अंसः [५.२१] स्कन्धः।

(अंसलः) [५.२१] बलवान्।

अंहः [४. २१३] अपराधः, पापम्।

अंहतिः [४.६२] दानं, पापः, हननम् वा।

अंह्रिः [४.६६] पादः, वृक्षमूलं वा।

अक्तः [३.८९] व्याघ्रः, परिमितः।

अक्षः [३.६५] द्यूतपाशः, इन्द्रियं (न.), रथधुरा।

अक्षरम् [३.७०] ब्रह्म, वर्णः, मोक्षः, उदकम्।

(अक्षाणि) [३.६५] इन्द्रियाणि।

अक्षि [३.१५६] नेत्रम्।

अक्ष्णम् [३.१७] अखण्डम्, सम्पूर्णम्।

अगस्तिः [४.१८०] मुनिः।

अग्निः [४.५०] ईश्वरः, पावको वा।

अग्रम् [२.२९] प्रधानम्, उपरिभागः।

अग्रेगूः [२.६९] अग्रगन्ता।

अघ्न्यः [४.११२] अहन्तव्यः।

अघ्न्या [४.११२] गौः।

अङ्कस् [४.२१६] कुटिलत्वं, कुटिलम्।

अङ्कतिः [४.६१] वायुः।

अङ्कुरः [१.३८] सस्योद्गमः।

अङ्कुशः [४.१०७] शस्त्रभेदः, गजप्रेरककीलकं वा।

अङ्कूरः [१.३८] सस्योद्गमः।

अङ्कूषः [४.७६] अङ्कुशः।

अङ्गम् [१.१२३] अवयवः।

अङ्गस् [४.२१६] पक्षिविशेषः।

अङ्गारः [३. १३४] निर्धूमोऽग्निः, इङ्गालः।

अङ्गिराः [४.२३६] ईश्वरः, अग्निः, ऋषिविशेषः।

अङ्गुलिः [४.२] करशाखा, पादशाखा वा।

अजिनम् [२.४९] चर्म, मृगचर्म।

अजिरम् [१.५३] गतिशीलम्, गृहाङ्गनम्।

अञ्चतिः [४.६१] वायुः।

अञ्जलिः [४.२] संयुक्तौ करौ।

अञ्जि : [४.१४०] कान्तिः, प्रेषकः।

अञ्जिष्ठः [४.२] सूर्यः।

(अञ्जी) [४.१४] मङ्गलम्।

अणवः [१.९] धान्यविशेषः।

अणुः [१.८] सूक्ष्मः।

अण्डः [१.११४] प्राण्यवयवः।

अतसः [३.११७] वायुः, काष्ठं वा।

अतिथिः [४.२] प्राघुणिकः।

अत्कः [३.४३] पथिकः, शरीराङ्गं वा।

अत्नः [३.६] सूर्यो वा।

अत्त्रिः [४.६८] भक्षकः।

अत्रिः [४.६८] भक्षको वा।

अद्गः [१.१२३] पुरोडाशः।

अद्भुतम् [५.१] आश्चर्यं, विचित्रं, रसभेदो वा।

अद्मनिः [२.१०७] अग्निः।

अद्रिः [४.६५] मेघः, पर्वतो वा।

अधमम् [५.५४] नीचैः स्थितं वा।

अध्वर्युः [१.३७] ऋत्विग्विशेषः।

अध्वा [४.११६] मार्गः।
अनः [४.१८९] अन्नं, शकटं वा।
अनलः [१.१०६] अग्निः।
अनिलः [१.५४] प्राणदाता, वायुः।
अनीकम् [४.१७] बलं, सैन्यं वा।
अनेहाः [४.२२४] कालः, पापरहितो वा।
अन्तः [३.८६] चरमं, नाशः, सीमा, संख्या वा।
अन्तर् [५.६०] मध्यम्।
अन्त्रम् [४.१६४] उदरनाडी वा।
अन्दूः [१.९३] गजबन्धनी शृङ्खला।
अन्धः [४.२०६] अन्नं, रसो वा।
अन्धुः [१.२७] कूपः।
अन्नम् [३.१०] ओदनादिकम्।
अन्यः [४.१०९] इतरो वा।
अपः [४. २०८] कर्म, अपत्यं वा।
अपष्ठुः [१.२५] प्रतिकूलः, वामभागो वा।
अप्तुः [१.७५] शरीरं वा।
अप्नः [४.२०८] कर्म, अपत्यं वा।
अप्वा [१.१५४] कण्ठस्थानं रोगविशेषो वा।
अप्सरसः [४.२३७] किरणाः।
अप्सराः [४.२३७] विद्युत्।
अब्जस् [४.२०९] रूपम्।
अब्दः [४.९८] संवत्सरः, मेघः, अवसरो वा।
अभिम्लातः [३.८६] क्षीणहर्षः।
अभ्रकम् [२.३३] खनिजविशेषः।
अमतः [३.११०] रेणुः।
अमतिः [४.५९] गतिशीलः, कालो वा।
अमत्रम् [३.१०५] पात्रम्।
अमनिः [२.१०४] पन्थाः।
अमित्रः [४.१७४] शत्रुः।
अमीवा [२.१५४] रोगः, रोगकृमिर्वा।
अम्बरम् [१.१३१] आकाशं, वस्त्रं वा।
अम्बरीषः [४.२९] वाक्पटुः, स्वेदनी 'भाड़'
अम्ब्लः [४.१०८] वाग्ग्मी, वाचालो वा।
अम्भः [४.२१०] उदकम्।
अम्लः [४.१०८] रसविशेषः।
अयः [४. १८९] लोहः, स्वर्णं वा।
अयाः [४.२२३] अग्निः, गतिशीलो वा।
अरणिः [२.१०४] अग्न्युत्पादकं काष्ठद्वयम्।
अरण्यम् [३.१०२] वनम्।
अरतिः [४.६१] क्रोधः, प्रापको वा।
अरतिः [५.४] प्रापकः, उद्वेगो वा।
अररः [३.१३२] कपाटः।
अररुः [४.७९] शत्रुः, आयुधं वा।
अरिः [४.१३९] शत्रुः।
अरुः [२.११९] व्रणः।
अरुणः [३.६०] सूर्यः, ईषद्रक्तवर्णो वा।
अरूषः [४.७३] सूर्यः।
अर्कः [३.४०] सूर्योऽग्निः क्षुपविशेषो वा।
अर्चिः [२.११०] दीप्तिः, अग्निशिखा।
अर्जुनः [३.५८] शुक्लः, वृक्षभेदः, भीमानुजो वा।
अर्जुनम् [३.५९] तृणभेदः।
अर्णः [४,१९७] उदकम्।
अर्थः [२.४] शब्दानां वाच्यः, धनम्, प्रयोजनम्, विषयो, वस्तु वा।
अर्पिसः [४.२] हृदयम्, अग्रमांसं वा।
अर्भः [३.१५२] गतिशीलः, शिशुर्वा।
अर्भकः [५.५३] बालकः।

अर्मः [१.१४०] नेत्ररोगो वा।
अर्यमा [१.१५९] आदित्यः, ईश्वरो वा।
अर्वः [५.५४] कुत्सितोऽश्वो वा।
अर्वा [४.११३] अश्वः।
अर्शः [४.१९६] गुदरोगः।
अर्शसानः [२.८९] गतिशीलः, अग्निः।
अर्हन्तः [३. १२६] पूज्यः।
अलकम् [५.३५] स्त्रियो लघुकेशपाशी।
अलकः [५.३५] विक्षिप्तकुक्कुरः।
अलतिः [४.६०] गीतविशेषः।
अलाबूः [१.८७] तुम्बी।
अलिः [४.१३९] भ्रमरः।
(अलिन्दः) [४.८५] गृहैकदेशः, प्रघाणः।
अलीकम् [४.२५] मिथ्या, कुटिलो वा।
अवगथः [२.६] प्रातः स्नानम्।
अवद्यम् [५.५४] निन्दनीयम्।
अवनिः [२.१०४] रक्षकः, भूमिः।
अवन्तिः [३.५०] राजा, राजविशेषो वा।
अवभृथः [५.५४] यज्ञान्तस्नानं, पक्षिभेदो वा।
अवमम् [५.५४] अधमम्, अन्तिकं वा।
अवसः [३.११७] रक्षकः, राजा, हिंसको वा।
असुः [१.१०] प्राणः।
असुर : [१.४२] ईश्वरः, देवः, दुर्जनः, मेघो वा।
अस्तिः [४.१८०] सत्त्वं, वर्त्तमानता वा।
अस्त्रम् [४. १५९] आयुधम्।
अस्थि [३. १५४] कीकसम, मेदोजधातु-विशेषः।
अस्मद् [१.१३९] सर्वनामसञ्ज्ञः।
अविनः [२.४७] अध्वर्युः।
अविषः [१.४५] समुद्रः।
अवीः [३.१५८] ऋतुमती स्त्री।
अव्यथिषः [१.४९] सागरः।
अव्यथिषी [१.४९] पृथिवी।
अशनिः [२.१०४] विद्युद्, वज्रः।
अशित्रम् [४. १७४] चरुः (यज्ञियः पाकः)
अशिरः [१.५२] अग्निः।
अश्मा [४. १४७] मेघः, पाषाणो वा।
अश्रिः [४. १३८] अस्त्रादेरग्रभागः, कोणो वा।
अश्रु [५.२९] नेत्रजलम्।
अश्रुः [४.१०२] नेत्रवारि।
अश्वः [१.१५१] हयः, वह्निर्वा।
अष्टका [३.१४८] तिथिविशेषः, वैदिककर्मविशेषो वा।
अष्टन् [१.१५७] संख्याविशेषः।
असनः [२.७९] पीतवर्णः, शालवृक्षो वा।
असिः [४.१४०] खड्गः।
अहल्या[४.११२] रात्रिः, अपतिपरायणा स्त्री वा।
अहिः [४. १३८] मेघः, सर्पो वा।
अस्रम् [२.१३] रक्तं वा।
अस्रुः [४.१०२] नेत्रवारि।
अहः [१.१५८] दिनम्।
आखनिकः [२.४६] मूषकः, वराहो वा।
आखुः [१.३३] मूषकः, वराहो वा।
आख्याः [४.२३३] विशिष्टवक्ता।
आगः [४.२१२] अपराधः।
आगामी [४.७] भविष्यति समागन्ता।
आजिः [४.१३१] सङ्ग्रामः।

आडम्बर : [३.१३१] वाद्यविशेषः, शब्दविशेषः, पटहो वा।
आडूः [१.८६] नौका।
आतिः [४. १३१] पक्षिविशेषः, तित्तिरिः।
आतुरः [१.४१] रुग्णः।
आत्मा [४. १५४] जीवः।
आपः [२.५९] जलम्।
आपस् [४.२०८] जलम्।
आपणिकः [२.४६] वैश्यः, वस्तुव्यापारी वा।
आपतिकः [२.४६] श्येनः।
आपनिकः [२.४६] श्येनः।
आमयः [४.९९] रोगः।
आमलकः [२.३३] वृक्षविशेषः।
आमलकम् [२.३३] धात्रीफलम्।
आमिक्षा [३.६६] क्षीरविकारः।
आमिषम् [१.४६] मांसम्।
आम्रम् [२.१६] रसालफलम्।
आयुः [१.२] जीवनकालः, मनुष्यो वा।
आयुस् [२.१२०] वयः।
आरूः [१.८५] पिङ्गलवर्णो वा।
आर्द्रम् [२.१८] क्लिन्नम्।
आर्द्रा [२.१८] नक्षत्रविशेषः।
(आलिन्दः) [४.८५] गृहैकदेशः, प्रघाणो वा।
आलुः [१.५] शाककन्दं वा।
आवसथः [३.११६] गृहम्।
आविः [२.११०] प्राकट्यम्।
आशुः [१.१] शीघ्रकारी, अश्वः, शीघ्रं वा।
आशुशुक्षणिः [२.१०५] अग्निः।
आष्ट्रम् [४.१६०] आकाशम्।
इक्षुः [३.१५७] मधुतृणम्।
इक्षुकुट्टकः [२.३३] गौडिकः।
इदम् [४.१५७] प्रत्यक्षविषयबोधकः सर्वनामसञ्ज्ञः।
इध्मः [१.१४५] समिध्।
इनः [३.२] ईश्वरः, स्वामी।
इन्दुः [१.१२] ईश्वरः, मुमुक्षुः, चन्द्रमा वा।
इन्द्रः [२.२९] ईश्वरः, समर्थः, आत्मा, सूर्यो वा।
इभः [३.१५३] गजः।
इरा [२.२९] उदकं, मद्यं वा।
इरिणम् [२.५२] शून्यम्, ऊषरभूमिर्वा।
इल्वलः [४.१०७] नक्षत्रविशेषः।
इषिरः [१.५१] अभीष्टोऽग्निर्वा।
इषीका [४.२१] मुञ्जादिशलाका, काशतृणं वा।
इषुः [१.१३] बाणः, वीरो वा।
इष्टका [३. १४८]इष्टपदार्थः, पक्वमृद्विकारो वा।
इष्मः [१. १४५] कामो वसन्तऋतुर्वा।
ईर्मम् [१.१४५] व्रणम्।
ईश्वरः [५.५७] परमात्मा, राजा वा।
ईष्वः [१.१५३] आचार्यः।
उक्थम् [२.७] साममन्त्रविशेषाः विशिष्टं वचनं वा।
उक्षा [१.१५९] बलीवर्दः, सूर्यो वा।
उग्रः [२.२९] उत्कटः, क्षत्रं वा।
उग्रतेजाः [४.२२७] उग्रतेजोमयः।
उचितम् [४. १८६] युक्तम्।
उच्चैः [५.१२] उच्छ्रितो महान् वा।
उज्झकः [२.३८] योगी, मेघो वा।
उत्सः [३.६८] जलप्रस्रवणस्थलं, स्रोतो वा।

उदकधरः [२.२३] मेघः।

उदकम् [२.४०] जलम्।

उदरथिः [४.८८] समुद्रः।

उदरम् [५.१९] जठरम्।

उदश्वित् [२.५८] तक्रं वा।

उद्गीथः [२.१०) सामध्वनिः प्रणवो वा।

उद्रः [२.१३] जलचरो वा।

उन्नेता [२.९५] ऋत्विक्।

उपदेष्टा [२.९६] गुरुः।

उपह्वरः [३.१] रथः।

(उमा) [१.१४४] अतसी, स्त्रीविशेषो वा।

उरः [४. १९५] वक्षःस्थलम्।

उरणः [५.१७] अपगतिशीलः, मेषो वा।

उरु [१.३१] महत्, बहु वा।

उलपम् [३.१४५] कोमलतृणं, पल्लवं वा।

उलूकः [४. ४२] घूकः।

उल्का [३.४२] विद्युदग्नेर्ज्वाला वा।

उल्मुकम् [३.८४] ज्वलत्प्रान्तं काष्ठं, ज्वलदङ्गारो वा।

उल्वः [४.९५] जरायुः, गर्भो वा।

उशनाः [४.२३९] आचार्यः शुक्राचार्यो वा।

उशिक् [२.७२] अग्निः, घृतं वा।

उशीः [४.१] वाञ्छा।

उशीरम् [४.३१] वीरणमूलम्।

उषः [४.२३४] प्रभातप्रकाशः।

उषपः [३.१४२] अग्निः, सूर्यो वा।

उषाः [४.२३४] प्रभातप्रकाशः।

उष्ट्रः [४.१६२] क्रमेलकः।

उष्णम् [३.२] तापयुक्तम्।

उष्म [४. १४५] वाष्पः।

उस्रः [२.१३] रश्मिः।

उस्रा [२.१३] गौः।

ऊधः [४.१९३] गवादेर्दुग्धस्थानं वा।

ऊनः [३.२] असम्पूर्णः।

ऊमम् [१.१४४] नगरम्।

ऊरुः [१.३०]जङ्घा, जानुत उपरिभागः।

ऊर्णा [५.४७] अविमेषयो रोमाणि वा।

ऊर्दरः [५.४०] आवपनं कुसूल इति।

ऊर्मिः [४.४४] जलतरङ्गः।

ऊष्मा [४. १४५] ग्रीष्मर्तुः।

ऋक् [२.५८] मन्त्रः।

ऋक्थम् [२.७] धनम्।

ऋक्षः [३.६६] नक्षत्रम्।

ऋक्षः [३.६७] भल्लूकः।

ऋक्षरः [३.७५] ऋत्विक्, कण्टको वा।

ऋच्छरः [३.१३१] शरीरभागविशेषो वा।

ऋजीकः [४.२२] उपहतः।

ऋजीकः [५.५१] सूर्यः, धूमो वा।

ऋजीषम् [४.२८] नीरसः, सोमलताशेषः, सोमो वा।

ऋजुः [१.२७] सरलः, कोमलो वा।

ऋज्रः [२.२६] नायकः।

ऋञ्जसानः [२.८८] पाचनकर्त्ता, अग्निः।

ऋतम् [३.८९] उदकं, यथार्थं, यज्ञो वा।

ऋतुः [१.७२] कालावयवः।

ऋषभः [३.१२३] बलीवर्दः, श्रेष्ठपर्यायो वा।

ऋषिः [४.१२०] मन्त्रार्थद्रष्टा।

ऋष्यः [४. ११२] मृगभेदः।

एकः [३.४३] केवलः, मुख्यः, अन्यो वा।

एतः [३.८६] गतिशीलः, प्राप्तिकामः, मृगो वा।
एतत् [१.१३३] सर्वनामसञ्ज्ञः।
एतशः [३.१४९] गतिशीलः, प्राप्तिशीलः, ज्ञानी वा।
एतशा : [३.१४९] गतिशीलः।
प्राप्तिशीलः,
ज्ञानी वा।
एधतुः [१.७७] वृद्धिः, पुरुषो वा।
एनः [४.१९८] पापम्।
एलूकः [४.४२] सुन्दरपक्षिविशेषः।
एवः [१.१४२] प्राप्तिकर्ता।
ओकः [३.४१] आश्रमः, गृहं वा।
ओकस् [४.२१६] निवासस्थानम्।
ओजः [४.१९२] बलम्।
ओतुः [१.६९] विडालः।
ओदनः [२.७७] भक्तं वा।
ओम् [१.१४२] परमेश्वरः,
आरम्भोऽनुमतिर्वा।
ओष्ठः [२.४] मुखावयवः, दन्तच्छदः।
कंसः [३.६२] तस्करः, पात्रभेदो वा।
कक्खटः [४.८१] प्रफुल्लमुखः, कठिनो वा।
कक्षः [३.६२] बाहुमूलं, तृणं, वनसमीपं वा।
कङ्कटः [४.८१] कवचः।
कङ्कणः [४.२४] करभूषणम्।
कङ्कणीका[४.१८] घण्टिका, वाद्यसाधन-
विशेषो वा।
कचपम् [३. १४२] तृणं, शाकपत्रं वा।
कच्छः [४.१०५] सागरसरित्तटः,
देशविशेषः, शाकमूलं वा।
कच्छूः [१.८४] पामा।
कञ्चूलः [४.९०] स्त्रीणां वक्षोवस्त्रं वा।
कञ्जारः [३.१३७] मयूरः, व्यञ्जनं वा।
कटकः [५.३५] पर्वतैकदेशः, वलयः, सेना वा।
कटकम् [२.३३] आभूषणम्,
गिरिमध्यभागः,
राजधानी वा।
कटप्रूः [२.५८] कामुकः।
कटम्बः [४.८२] वादित्रविशेषः, बाणो वा।
कटिः [४.११८] शरीरमध्यभागः।
कटित्रम् [४.१७३] कवचभेदः।
कटीर : [४.३०] कुटी, जघनदेशो वा।
कटुः [१.८] रसविशेषो मरिचादिस्थः।
कटोलः [१.६६] कटः, दुष्टवाक् वा।
कद्वरम् [३.१] दधिसारः, तक्रम्।
कठाकुः [३.७७] पक्षिविशेषः।
कठिनम् [२.५०] कठोरं वा।
कठेरः [१.५८] कारागारिकः।
कठोर : [१.६४] क्लिष्टः।
कडत्रम् [३.१०६] पात्रविशेषः।
कडम्बः [४.८३] अग्रभागः, शाकनाडिका,
कोणं वा।
कडारः [३.१३५] पीतवर्णः, पिङ्गलवर्णो वा।
कणीचिः [४.७०] पत्रादियुक्ता शाखा।
कण्ठः [१.१०३] गलः।
कण्डोलः [१.६६] दुष्टः।
कण्वः [१.१५१] मेधावी, मुनिविशेषः।
कण्वम् [१.१५१] पापम्।
कदम्बः [४.८२] वृक्षभेदः, नीपो वा।
कदर : [३.१३१] रोगविशेषः, श्वेतखदिरो वा।
कदली [१.१०८] रम्भाफलम्।
कद्रुः [४.१०२] वर्णभेदः।

कनकम् [२.३३] सुवर्णं वा।
कन्तुः [१.१७] कामः।
कन्तुः [१.७३] चित्तं, कामो वा।
कन्दः [४.९८] सस्यमूलं, सूरणो वा।
कन्दरः [३.१३१] गिरिनितम्बभागः।
कन्दरा [३.१३१] गुहा।
कन्दुः [१.१४] 'गेंद'।
कन्या [४. ११२] कुमारी।
कपटः [४.८१] माया, अयथार्थव्यवहारो वा।
कपालम् [१.११८] नृशिरः, घटखण्डो वा।
कपिः [४.१४४] वानरः, वर्णभेदो वा।
कपिलः [१.५५] वर्णभेदः, मुनिविशेषो वा।
कपोतः [१.६२] पारावतः।
कपोलः [१.६६] गल्लः।
कफेलूः [१.९३] ओषधिविशेषः।
कमठः [१.१००] कच्छपः।
कमरः [३.१३२] कामुकः।
कमलः [१.१०४] अरविन्दः, रोगविशेषो वा।
कम्बलः [१.१०७] ऊर्णाप्रावारः।
कम्बूः [१.९३] परद्रव्यहारकः।
करकः [५.३५] वृष्टिपाषाणः, कमण्डलुः वा।
करटः [४.८२] काकः, हस्तिगण्डो वा।
करण्डः [१.१२९] वंशनिर्मितपात्रं,
मधुमक्षिकागृहं वा।
करभः [३.१२२] हस्तबहिर्भागः, हस्तिशुण्डा,
उष्ट्रशिशुः, गजशिशुर्वा।
करम्बम् [४.८२] व्यामिश्रः, नीलकण्ठो वा
करिः [४. १२९] हस्ती।
करीरः [४.३०] वृक्षभेदः, वंशाङ्कुरो वा।
करीषः [४.२६] शुष्कगोमयः।
करुणः [३.५३] कर्म, रसभेदो वा।
करुणा [३.५३] दया वा।
करेणुः [२.१] हस्ती, हस्तिनी वा।
कर्कः [३.४०]अग्निः,शुक्लोऽश्वः, राशि- विशेषो वा।
कर्कटः [४.८१] जलजन्तुभेदः।
कर्कन्धूः [१.९३] बदरीफलम्।
कर्करः [३.१३१] प्रस्तरलघुखण्डः, दर्पणो वा।
कर्करीकम् [४.२०] शरीरम्।
कर्णः [३.१०] श्रोत्रम्।
कर्दमः [४.८४] पङ्कः।
कर्पटः [४.८२] जीर्णवस्त्रखण्डः।
कर्परः [३.१३१] कपालः (खप्पर)।
कर्पासः [५.४५] पिचुकोशः।
कर्पूरः [४.९०] सुगन्धिद्रव्यं, घनसारो वा।
कर्बुर : [१.४१] श्वेतो वर्णविशेषो वा।
कर्म [४. १४५] क्रिया।
कर्वः [१.१५५] कामः।
कर्वरः [२.१२३] व्याधः, दुष्टः।
कर्षूः [१.८०] शुष्कगोमयः।
कलत्रम् [३.१०६] भार्या।
कलभः [३.१२२] उष्ट्रशिशुः, गजशिशुर्वा।
कलमः [४.८४] शालिभेदः।
कलापकः [२.३३] चन्द्रमा वा।
कलिः [४.११८] कलहो विवादः।
कलिलम् [१.५४] गहनम्।
कलुषम् [४.७५] पापं, मालिन्यं, बद्धं, निन्दितं वा।
कल्कम् [३.४०] चूर्णं, घृततैलादिशेषः, दम्भो वा।
कवचम् [४.२] वर्म।
कवरः [४. १५५] पाठकः।

कवलः [१.१०६] ग्रासः।
कवसः [४.२] कण्टकजातिवृक्षः, कवचं वा।
कविः [४.१४०] ईश्वरः, विद्वान्,काव्यकर्त्ता वा।
कशेरुः [१.८८] पृष्ठवंशास्थि, कन्दविशेषो वा।
कश्मलम् [१.१०९] मलं, पापम्, औदासीन्यं वा।
कश्मीरः [४.३२] प्रान्तविशेषः।
कश्यः [४.११२] मद्यम्।
कषाकुः [३.७७] अग्निः, सूर्यो वा।
कषिः [४.१४०] हिंसकः।
कषीका [४.१६] पक्षिजातिविशेषः।
कस्तूरः [४.९०] मृगमदः।
(कस्तूरी) [४.९०] मृगमदः।
काकः [३.४३] वायसः।
काकुः [१.१] ध्वनिविकारः, जिह्वा वा।
काणूकः [४.३९] काकः।
काण्डम् [१.११५] ग्रन्थभागः, समूहो वा।
कादम्बः [४.८३] पक्षिभेदः, वको वा।
कारिः [४.१२९] शिल्पी वा।
कारुः [१.१] कर्त्ता, शिल्पी वा।
कार्षकः [२.३९] कृषीवलः।
कार्षिः [४.१२७] अग्निर्घृतं वा।
काशिः [४. ११८] देशविशेषः, मुष्टिर्वा।
(काशी) [४.११८] वाराणसी।
काशूः [१.८५] कष्टाश्रितः।
काष्ठपुत्रिकः [२.३३] क्रीडाविशेषः।
काष्ठम् [२.२] इन्धनम्।
(काष्ठा) (२.२) कालमानं, दिग् वा।
कासारः [३.१३९] तडागः।
किंवदन्ती [३.५०] जनश्रुतिः।
किंशारुः [१.४] धान्यविशेषः, धान्य शिम्बा वा।
किकिदिवः [४.५६] पक्षिविशेषः चाषो वा।
किकिदिविः [४.५६] पक्षिविशेषः, चाषो वा।
किकिदीविः [४.५६] पक्षिविशेषः, चाषो वा।
किकिदीवः [४.५६] पक्षिविशेषः, चाषो वा।
किकीदिविः [४.५६] पक्षिविशेषः, चाषो वा।
किङ्कणीका [४.१८] क्षुद्रघण्टिका।
किम् [४.१५८] प्रश्नाद्यर्थकं सर्वनाम।
किरणः [२.८२] रश्मिः।
किरिः [४.१४३] वराहः।
किरीटम् [४.१८५] मुकुटं, शिरोवेष्टनं वा।
किर्मीरः [४.३०] नागरङ्गवृक्षो वा।
किल्बिषम् [१.५०] पापम्।
कीचकः [५.३६] वंशभेदः।
कीनाशः [५.५६] कृषकः, न्यायाधीशो वा।
कीर्तिः [४.११९] यशः।
कुकुरः [१.४१] श्वा।
कुक्कुरः [१.४१] श्वा।
कुक्षः [३.६८] जठरस्थानम्।
कुक्षिः [३. १५५] जठरं, गर्भाशयः,
अन्तरवकाशो वा।
कुचितम् [४.१८६] परिमितम्।
कुटपः [३.१४२] मानपात्रं, गृहोपवनं वा।
कुटरुः [४.८०] वस्त्रनिर्मितगृहम् (तम्बू)।
कुटिः [४. १४३] पर्णगृहं वा।
कुटितम् [४. १८६] कुटिलम्।
कुटिल : [१.५४] छद्मकः।
(कुटी) [४. १४३] पर्णतृणछन्नगृहम्।
(कुटीरः) [४.३०] पर्णतृणगृहम्।
कुट्मलः [१.१०९] कलिका।

कुठिः [४. १४४] पर्वतः, तरुर्वा।
कुठेरः [१.५८] पणसफलम्।
कुड्मलः [१.१०९] कलिका।
कुड्मलम् [४.१८७] मुकुलम्।
कुड्यम् [४.११२] भित्तिः।
कुणपः [३.१४३] मृतदेहः शव इति।
कुणपः [३.१४४] मृतदेहः, शव इति।
(स्वरे भेदः)।
कुणालः [३.७६] वावदूकः, देशभेदो वा।
कुणिन्दः [४.८५] शब्दः।
कुण्डः [१.११५] द्रवाधारः।
कुण्डलम् [१.१०४] कर्णाभूषणम्।
कुण्डिनः [२.५०] ऋषिविशेषः नगरविशेषो वा।
कुन्तिः [३.५०] राजविशेषः।
(कुन्ती) [३.५०] पाण्डुपत्नी।
कुन्दः [४.९८] पुष्पवृक्षविशेषः।
कुपिन्दः [४.८६] तन्तुवायः।
कुबेर : [१.५६] धनिकः, विद्वान् वा।
कुब्रम् [२.२९] अरण्यम्।
कुमारः [३.१३८] शिशुः, युवराजो वा।
कुमारयुः [१.३७] युवराजः।
कुम्भीरः [४.३०] नक्रः।
कुरङ्गः [१.१२१] हरिणः।
कुररः [३.१३३] पक्षिविशेषः।
कुरीरम् [४.३४] मैथुनम्।
कुरुः [१.२४] राजविशेषः।
कुलालः [१.११८] कुम्भकारः।
कुलीरः [४.३४] कर्कटः।
कुल्फः [५.२६] शरीरावयवः, रोगो वा।
कुल्मलम् [४. १८८] शराद्यग्रभागः, पापं वा।
कुविन्दः [४.८६] तन्तुवायः।
कुशलः [१.१०६] क्षेमवान् निपुणो वा।
कुष्ठः [२.२] ओषधिविशेषो रोगविशेषो वा।
कुष्मलम् [४.१८७] पर्णम्।
कुसितः [४.१०६] देशविशेषः।
कुसीदम् [४. १०६] ऋणदानजीविका।
कुसुमम् [४.१०६] पुष्पम्।
कुसुम्भम् [४.१०६] पुष्पविशेषः, महारजनं वा।
कुसूलः [४.९०] धान्यभण्डारः, कीटविशेषो वा।
कुहकः [२.३८] दाम्भिकः।
कुहुः [१.३७] अमावास्या।
कूचः [४. ९१] स्तनः, हस्ती वा।
(कूची) [४.९१] चित्रलेखनी, तूलिका वा।
कूपः [३.२७] प्रहिः।
कृकवाकुः [१.६] यवनादिः, मयूरो वा।
कृच्छ्रः [२.२१] कठिनः, दुःखं वा।
कृतकम् [२.३८] कृत्रिमं, मिथ्या वा।
कृत्तिका [३.१४७] नक्षत्रविशेषः।
कृत्नुः [३.३०] कर्त्ता, शिल्पी।
कृत्सम् [३.६६] जलम्।
कृत्स्नम् [३.१७] सम्पूर्णम्।
कृदरः [५.४१] कुसूलः।
कृन्तत्रम् [३.१०९] लाङ्गलम्।
कृपणः [२.८०] लोभयुक्तः।
कृपाणः [२.९१] खड्गः।
कृपीटम् [४. १८५] जलम्, इन्धनं वा।
कृमिः [४. १२२] क्षुद्रजन्तुः।
कृविः [४.५६] कर्त्ता, कर्मसाधनं वा।
कृशानुः [४.२] अग्निः।

कृषक : [२.३९] कृषीवलः।

कृषिः [४.१२०] कर्षणकर्म।

कृषिकः [२.४१] फालः, कृषको वा।

कृष्णः [३. ४] नीलवर्णः, आकर्षकः।

(कृष्णा) [३. ४] द्रौपदी।

कृसरः [३.७३] तिलौदनं मिश्रम्।

केतुः [१.७४] पताका, प्रज्ञापको वा।

केलिः [४.११८] क्रीडा।

केवलः [१.१०६] अनन्यो वा।

केशः [५.३३] शिरोलोम।

कोकिलः [१.५४] पिकः।

कोटर : [३.१३१] वृक्षगह्वरः।

कोटिः [४.११८] सङ्ख्या, धनुरग्रं वा।

कोमलः [१.१०९] मृदुः।

कोरकः [५.३५] कलिका।

कोष्ठम् [२.४] कुक्षिः, कुसूलमन्तर्गृहं वा।

क्रतुः [१.७६] कर्मशीलः, यज्ञो वा।

क्रयिकः [२.४५] क्रयकर्त्ता।

क्रान्तुः [५.४३] पक्षी।

क्रिमिः [४.१२२] क्षुद्रजन्तुः।

क्रुश्वा [४.११४] शृगालः।

क्रूरः [२.२१] खलो वा ।

क्रेणिः [४.४८] क्रयकर्त्ता।

क्रोष्टुः [१.६९] शृगालः।

क्लेदा [१.१५९] चन्द्रमाः।

क्लेदुः [१.१०] चन्द्रमाः।

क्षत्ता [२.९५] सारथिः, द्वारपालः।

क्षत्रम् [४.१६७] वर्णभेदो वा।

क्षान्तुः [५.४३] सहनशीलः।

क्षित्वा [४. ११४] वायुः।

क्षिपणिः [२.१०९] अश्वस्य गतिविशेषः, आयुधम्, जालम्।

क्षिपणुः [३.५२] व्याधः, वायुर्वा।

क्षिपण्युः [३.५१] शरीरं, वसन्ततुर्वा।

क्षिप्रम् [२.१३] शीघ्रम्।

क्षीरम् [४.३] दुग्धम्।

क्षुद्रः [२.१३] अधमः, स्वल्पकायो वा।

क्षुधुनः [३.५५] भोजनपरायणः।

क्षुमा [१.१४५] अतसी।

क्षुरः [२.२८] छेदनद्रव्यम्, नापितशस्त्रं, गोक्षुरो वा।

क्षेत्रम् [४.१७०] केदारः, कलत्रं वा।

क्षेमम् [१.१४०] कुशलं वा।

क्षोणिः [४.४८] मनुष्यसङ्घः, भूमिर्वा।

क्षोता [२.९५] मुसलः।

क्षोमम् [१.१४०] द्वितीयतलप्रकोष्ठः, पटविशेषो वा।

क्ष्मा [५.६५] पृथिवी।

खजपम् [३. १४२] घृतम्।

खजाकः [४.१३] पक्षिविशेषः।

(खजाका) [४.१३] दर्विः।

खट्वा [१.१५१] शय्याभेदः।

खडूः [१.८२] आभूषणविशेषो, मृतशय्या वा।

खङ्गः [१.१२४] असिः। गण्डको वा।

खड्डूः [१.८२] आभूषणविशेषः, मृतकशय्या वा।

खण्डः [१. ११४] विभागः, मिष्टभेदो वा।

खदिरः [१.५३] वृक्षविशेषः।

खनिः [४.१४०] कुद्दालः, आकरो वा।

खनित्रम् [४. १६१] कुद्दालः।

खरुः [१.३६] कामः, श्वेतवर्णो वा।

खर्जूः [१.८०] चर्मरोगः।

खर्जूरः [४.९०] वृक्षभेदः तत्फलं च।

खलति : [३. ११२] खल्वाटः, निष्केशशिराः पुरुषः।

खष्पः [३.२८] क्रोधः, बलात्कारः।

खाटिः [४. १२५] शुष्कव्रणः।

खात्रम् [४. १६२] खनित्रं, जलाधारविशेषो वा।

खानिः [४.१४०] खनिः।

खिदिरः [१.५१] दरिद्रः।

खिद्रः [२.१३] भारः, दारिद्र्यं वा।

खुरः [२.२९] शफं वा।

गगनम् [२.७८] आकाशं वा।

गङ्गा [१.१२३] जाह्नवी नदी।

(गजरत्नम्) [३.१४] उत्कृष्टो गजः।

गडेरः [१.५८] मेघः।

गडोलः [१.६६] सेचनपात्रं (' झारी')।

गण्डः [१.११४] कपोलः।

गण्डयन्तः [३.१२८] मेघः।

गण्डि [४.११८] वदनैकदेशः, वृक्षस्थूलतमभागो वा।

गण्डुः [१.७] उपधानम् ('तकिया')

गण्डूषः [४.७८] जलादिना पूर्णं मुखम्।

गण्डोलः [१.६६] वदनैकदेशः।

गतिला [१.५७] वेत्रलता (बेंत)।

गदयित्नुः [३.२९] शब्दकर्ता, वावदूकः।

गन्तुः [१.६९] पथिकः।

गन्त्री [४.१५९] महच्छकटम्।

गभस्तिः [४.१८१] किरणः |

गंभीरः [४.३५] शान्तः, महाशयो या।

गमथः [३.११३] पथिकः।

गमी [४.६] पथिकः।

गम्भीर : [४.३५] शान्तः, महाशयो वा

गरुडः [४.१३६] भुजगान्तकः, सुपर्णो वा।

गरुत् [१.९४] पक्षिविशेषः, खगपक्षः निगरणं वा।

गर्गः [१.१२८] ऋषिविशेषः।

गर्तः [३.८६] रथः, उच्चासनं, दरः, खातो वा।

गर्दभः [३.१२२] कोलाहलकरः, खरो वा।

गर्भः [३.१५२] कुक्षिस्थोऽपत्यदेहः, अन्तः स्थितं वस्तु, अन्तरालं वा।

गर्मुत् [१.९५] सुवर्णं, तृणविशेषो वा।

गर्वः [१.१५५] अहङ्कारः।

गर्वरः [२.१२३] अहङ्कारः।

गवयः [२.६८] गोसदृशो वन्यपशुविशेषः।

गह्वरम् [३.१] गहनं, गुहा, निकुञ्जः।

गातुः [१.७३] गायनः, गन्ता वा।

गात्रम् [४. १६९] अवयवः, शरीरं वा।

गाथा [२.४] श्लोकः, वाग्विन्यासो वा।

गान्तुः [५.४३] पथिकः।

गान्त्रम् [४.१६०] शकटम्।

गारित्रम् [४.१७१] ओदनम्।

गिरिः [४. १४३] पर्वत, मेघो वा।

गुडः [१.११५] इक्षुपक्वरसः।

गुडेर : [१.५८] रक्षकः।

गुत्सः [३.६८] हारभेदः, पुष्पगुच्छो वा।

गुधेर : [१.६१] रक्षकः।

गुपिलः [१.५६] रक्षकः।

गुरुः [१.२४] आचार्यः, उपदेष्टा वा।

गुर्विणी [२.५५] गर्भिणी।

गुल्फः [५.२६] पादग्रन्थिः।

गुवाकः [४.१५] पूगीफलम्।
गुहिलम् [१.५६] वनम्।
गुहेर : [१.६१] लोहघातनः (हथौड़ा)।
गूः [२.६९] गन्ता।
गूथम् [२.१२] अपानमार्गः, पुरीषं वा।
गृत्सः [३.६९] अग्निः, इन्द्रः, कविर्वा।
गृधुः [१.२३] लोभी, कामो वा।
गृध्रः [२.२५] पक्षिविशेषः, लोभी वा।
गृहयाय्यः [३.९६] गृहस्थः।
गेष्णुः [३.१६] सामगानकर्त्ता गाथकः।
गोत्रम् [४.१६७] वंशः, नाम वा।
(गोत्रा) [४.१६८] पृथिवी।
गोधूमः [५.२] अन्नविशेषः।
गोपीथः [२.९] पण्डितः, राजा,
जलाशयः,
पयःपानम्, सोमपानं वा।
(गोमायुः) [१.१] शृगालः।
गौः [२.६८] धेनुः, पशुः, इन्द्रियं भूमिः,
वाणी, किरणो वा।
गौरः [१.६५] गायकः, श्वेतः, अरुणवर्णो वा।
गौरः [२.२९] श्वेतः, ईषद्रक्तवर्णो वा।
ग्रन्थि : [४.१४०] पर्व वा।
ग्रहणिः [५.६७] रोगविशेषः।
ग्रामः [१.१४३] शालासमुदायः, प्राणिनिवासः,
समूहः, स्वरभेदो वा।
ग्रीवा [१.१५४] शिरोधरा।
ग्रीष्मः [१.१४९] अत्युष्णकालऋतुः।
ग्लानिः [४.५२] हर्षक्षयः, हानिर्वा।
ग्लौः [२.६५] चन्द्रमाः।
घटि [४.११८] सङ्घातकर्ता।
घटी [४.११८] कालमानविशेषः, क्षुद्रघटो वा।
घर्मः [१.१४९] आतपः यज्ञो वा।
घातिः [४. १२५] प्रहरणम्।
घासिः [४.१३०] अग्निः।
घुण्डः [१.११५] भ्रमरः।
घुरणः [२.८४] शब्दः।
घूर्णिः [४.५३] भयङ्करः।
घृणा [३.४] करुणा, जुगुप्सा।
घृणिः [४.५२] दीप्तिः, आतपः किरणो वा।
घृतम् [३.८६] सर्पिः, उदकं वा।
घोरम् [५.६४] भयानकम्।
चकोरः [१.६४] पक्षिविशेषः।
चक्रधरः [२.२३] चक्रधारकः।
चक्रुः [१.२२] ईश्वरः।
चक्षुः [२.१२१] नेत्रम्।
चङ्कुरः [१.३८] रथः।
चञ्चरीकः [४.२०] भ्रमरः।
चटुलः [१.६६] शोभनः।
चण्डः [१.११४] क्रोधनः, हिंसको वा।
चण्डिला [१.५७] नदीविशेषः।
चतस्रः [५.५८] सङ्ख्यावाची।
चतुरः [१.३८] निपुणः।
चत्वरम् [२.१२३] अङ्गनम्, चतुष्पथम्।
चत्वारः [५.५८] संख्यावाची।
चनः [४.२००] अन्नम्।
चन्दनम् [२.७९] मलयजसुगन्धिवृक्षः।
चन्दिरः [१.५१] चन्द्रमाः।
चन्द्रः [२.१३] आह्लादकः, चन्द्रमाः, कर्पूरं वा।
चन्द्रमाः [४.२२८] निशानाथः।

चपलः [१.१११] चञ्चलः।
(चपला) [१.१११] विद्युत्।
चपेटः [४.८१] प्रहस्तः।
चमरः [३. १३२] पशुविशेषः।
(चमरी) [३.१३२] चमरी गौः।
चमसः [३.११७] पात्रविशेषः।
चमूः [१.८०] सेना, पात्रविशेषो वा।
चम्पा [३.२८] विद्युत्, नगरीविशेषः।
चरकः [२.३३] गन्ता।
चरकम् [२.३३] वैद्यशास्त्रं वा।
चरमः [५.६९] अन्त्यः, पश्चिमो वा।
चरिः [४. १४०] पशुः।
चरित्रम् [४.१७२] सुशीलम्।
चरुः [१.७] यज्ञियः पाकः।
चर्पटः [४ . ८ १] प्रहस्तः।
चर्म [४.१४५] त्वक्।
चषकम् [२.३३] पानपात्रं वा।
चषालः [४. १०६] यूपकङ्कणम्।
चाटु [१.३] प्रियं वचो वा।
चाण्डालः [१.११७] क्रोधी।
चात्वालः [१.११६] यज्ञकुण्डं, दर्भो वा।
चारित्रम् [४. १७२] शीलं सद्व्यवहारो वा।
चारु [१.३] शोभनं वा।
चिकुराः [१.४१] केशपाशः।
चिक्कणम् [४.१७६] मसृणं, स्निग्धं वा।
चित्रम् [४. १६४] विस्मयकरम्, आलेख्यं वा।
(चित्रा) [४.१६४] नक्षत्रविशेषः।
चीरम् [२.२६] वल्कलवस्त्रं वा।
चीवरम् [३.१] मुनिपरिधानम्।
चुक्रः [२.१४] अम्लः।
चुब्रम् [२.२९] मुखम्।
चूर्णिः [४.५३] विवरणम्।
चेतः [४.१८९] चित्तम्।
च्युपः [३.२४] मुखम्।
च्यौत्नम् [४.१०४] बलम्।
छगलः [१.११३] वर्करः।
छत्रम् [४.१५९] वर्षातपादिनिवारणसाधनं, राजछत्रं वा।
छत्वरः [३.१] गृहं, कुञ्जः।
छदिः [२.११०] आच्छादनं, गृहावरणम्।
छद्म [४.१४६] माया, कपटं वा।
छन्दस् [४.२१९] गायत्र्यादि, स्वेच्छाचारः, इच्छा, वेदो वा।
छमण्डः [१.१२९] अनाथः।
छर्दिः [२.११०] तेजः, दीप्तिः, वमनम्, व्याधिः।
छलम् [१.१०४] कपटम्।
छविः [४.५६] शोभा, दीप्तिर्वा ।
छागः [१.१२४] वर्करः।
छातः [३.८६] दुर्बलः।
छाया [४.१०९] प्रकाशावरणम् आश्रयो वा।
छित्वरः[३.१] छेदनसाधनं, धूर्त्तः, वैरी ।
छिदकम् [२.३८] वज्रो वा।
छिदिः [४. १४३] परशुः।
छिदिरः [१.५१] कुठारः।
छिद्रम् [२.१३] विवरं वा।
छेदिः [४.११९] वर्धकिः, छेत्ता वा।
जगत् [२.८५] जङ्गमप्राणी, विश्वः।
(जगती) [२.८५] छन्दोभेदः।
जघनम् [५.३२] जानोरुपरिभागः।

जघ्नुः [१.२२] हन्ता।

जङ्घा [५.३१] जानोरधोभागः।

जटा [५.३०] दीर्घा केशाः, मूलम्, ओषधिविशेषः, वेदपाठभेदो वा।

जटिः [४.११८] जटाधारी, प्लक्षवृक्षो वा।

जठरम् [५.३८] उदरम्।

जतु [१.१८] लाक्षा, प्राणिविशेषो वा।

जत्रुः [४.१०२] स्कन्धसन्धिः।

जनिः [४. १३०] जन्म, जाया, स्त्री वा।

जनित्वः [४. १०४] जातः, जनयिता वा।

जनिमा [४. १४९] जन्म।

जनुः [२.११७] जननं जन्म।

जन्तुः [१.७३] प्राणी।

जन्म [१.१४५] उत्पत्तिः।

जन्मन् [४.१४५] उत्पत्तिः।

जन्यम् [४. १११] युद्धं, निर्वादो वा।

जन्याः [४. १११] वरयात्रिणः।

जन्युः [३.२०] शरीरधारी, जन्म वा।

जम्बः [४.९५] पङ्कः।

जम्बीरः [४.३०] अम्लरसफलवृक्षः।

जम्बुः [१.९३] फलविशेषः।

जम्बूः [१.९३] फलविशेषः।

जम्बूकः [४.४१] शृगालः।

जम्भल : [१.१०६] नाशवान्।

जयन्तः [३. १२८] विजयशीलः।

जरठः [१.१००] वृद्धः।

जरन्तः [३.१२६] वृद्धः, महिषो वा।

जरसानः [२.८७] वृद्धः।

जरायुः [१.४] गर्भाशयः, गर्भावरणं वा।

जरूथः [२.६] कटुवाक्, मांसं वा।

जर्जर : [३.१३१] वृद्धः, जीर्णो वा।

जर्णः [३.१०] वृद्धः, चन्द्रमाः वा।

जर्तुः [५.४६] स्त्रिय उपस्थेन्द्रियं, हस्ती वा।

जसुरिः [२.७४] हिंसकः, हिंसितः, क्षुधितो वा।

जहकः [२.३५] त्यागी, कालो वा।

जह्नुः [३.३६] दोषत्यागी, ऋषिविशेषः।

जागृविः [४.५४] जागरूकः।

जातवेदाः [४.२२७] अग्निः, ईश्वरो वा।

जानु [१.३] जङ्घावयवो वा।

जामाता [२.९७] दुहितुः पतिः।

जामिः [४. ४३] स्वसा, कुलस्त्री वा।

जाया [४.१११] पत्नी।

जायुः [१.१] शूरः, वैद्यः, औषधं वा।

जिगत्नुः [३.३१] गतिशीलः, प्राणः।

जित्वा [४. ११४] जयशीलः।

जिनः [३.२] जयशीलः।

जिव्रिः [५.४९] जीर्णः, पक्षी, कालो वा।

जिह्मः [१. १४१] कुटिलः, मन्दो वा।

जिह्वा [१.१५४] रसना, अग्निशिखा वा।

जीमूतः [३.९१] मेघः, पर्वतो वा।

जीरः [२.२४] उपस्कारद्रव्यविशेषः।

जीर्विः [४.५४] कुठारः, पशुर्वा।

जीवथः [३. ११३] प्राणी, आयुष्मान् वा।

जीवन्तः [३.१२७] ओषधिविशेषः।

जीवातुः [१.७८] जीवनम्।

जुहुराणः [२.९२] कुटिलतायुक्तः।

जुहूः [२.६१] स्रुग्भेदो वा।

जूः [२.५८] गतिशीलः, शशः, अश्वः, वृषभो वा।

जूर्णिः [४.४८] रोगः, ज्वरो वा।
जैवातृकः [१.७९] आयुष्मान्।
ज्यानिः [४.४८] क्षतिः।
ज्योतिः [२. ११२] दीप्तिः, अग्निः, सूर्यः।
डमरुः [१.३०] वाद्यविशेषः।
तकिला [१.५७] ओषधिविशेषः।
तक्रम् [२.१३] सजलं मथितं दधि।
तक्षकः [२.३३] छेदकः, वर्धकिर्वा।
तक्षा [१.१५६] वर्धकिः।
तडाका [४.१५] प्रभा।
तडागः [४.१५] सरोवरः।
तडिः [४. ११८] पीडकः।
तडित् [१.१९८] विद्युत्, समीपस्थं वस्तु वा।
तण्डुलः [४.१०७] व्रीहिः।
तण्डुलाः [५.९] शालयः, अपक्वा ओदना वा।
ततम् [३.८८] विस्तृतं, व्याप्तं, वीणा दिकं वा।
तद् [१.१३२] सर्वनामसञ्ज्ञः।
तनयः [४.९९] पुत्रः, पौत्रो वा।
तनुः [१.७] शरीरम्।
तनुस् [२.११९] शरीरम्।
तनूः [१.८०] शरीरम्।
तन्तुः [१.६९] सूत्रं वा।
तन्त्रीः [३. १५८] वीणा, वीणागुणो वा।
तन्द्रिः [४.६६] आलस्यं, मोहो वा।
(तन्द्री) [४.६६] आलस्यं, मोहो वा।
तन्यतुः [४.२] वायुः, विद्युद् वा।
तपः [४.१८९] द्वन्द्वसहनं, माघमासो वा।
तपसः [३.११७] चन्द्रः।
(तपस्यः) [४. १८६] फाल्गुनमासः।
तपुः [२.११९] तीव्रम्, प्रचण्डं, शत्रुः, अग्निः।
तमः [४.१८९] गुणः, अन्धकारः, क्लेशो वा।
तमतः [३. ११०] तृष्णापरः।
तमसः [३.११७] ध्वान्तं, ध्वान्तशीलो वा।
तमालः [१. ११८] वृक्षभेदः।
तरङ्गः [१.१२०] जलोर्मिर्वा।
तरणिः [२.१०४] तारकः, नौका, सूर्यः।
तरण्डः [१.१२९] तरणसाधनं नौका वा।
तरन्तः [३. १२८] पारं गन्ता, तरणसाधनं, समुद्रो वा।
तरलः [१.१०६] द्रवः, चञ्चलो वा।
तरसम् [३.११७] मांसम्।
तरसानः [२.८७] नौका।
तरिः [४. १३९] नौका, वस्त्राधानी वा।
तरी [४.१३९] वस्त्राधानी।
तरीः [३.१५८] नौका, वस्त्रादिरक्षकं भाण्डं वा। तरीषः [४.२६] नौका।
तरुः [१.७] वृक्षः।
तरुणः [३.५४]कुमारः,युवा,नुतानो वा।
तर्कारः [३.१३९] प्रभाषकः।
(तर्कारी) [३.१३९] शाकविशेषः, जयन्तीक्षुपो वा।
तर्कुः [१.१६] कर्तनी, वेष्टनम्।
तर्दूः [१.८९] यष्टिः, यष्टिमान् वा।
तर्म [४.१४८] यूपाग्रम्।
तर्षः [३.६२] प्लवः, समुद्रो वा।
तलिनम् [२.५४] विरलं, स्वल्पं, शय्या वा।
तलुनः [३.५४] कुमारो, युवा, नूतनो वा।
तल्पम् [३.२८] शय्या, स्त्री वा।
तविषः [१.४८] बलवान्।
(तविषी) [१.४८] बलवती।

तसरः [३.७५] सूत्रवेष्टनः।

तातः [३.९०] पिता, पूज्यः, पुत्रादिर्वा।

ताम्बूलम् [४.९०] मुखशोभिपर्णं वा।

ताम्रम् [२.१६] धातुविशेषः।

तालुः [१.५] मुखैकदेशः।

ताविषम् [१.४८] बलम्।

(ताविषी) [१.४८] बलवती।

(तिग्मम्) [१.१४६] तीक्ष्णम्।

तिजिलः [१.५६] चन्द्रमाः।

तितउः [५.५२] परिपवनम् (चालनी)

तित्तिरिः [४.१४३] पक्षिविशेषः।

तिथः [२.१२] अग्निः, कामो वा।

तिन्तिडीकः [४.२०] अम्ला चिञ्चिका।

तिमिः [४.१२२] मत्स्यभेदः।

तिमिरम् [१.५१] अन्धकारः।

तिरीटम् [४. १८५] मुकुटं, लोध्रौषधिर्वा।

(तीक्ष्णम्) [३.१८] असह्यम्, तीव्रम्।

तीर्थम् [२.७] घट्टः, नौकादिर्वा।

तीवरः [३.१] व्याधः।

तीव्रम् [२.२९] तीक्ष्णम्।

